पि ज्ञानतत्सोकारणत्वात्तदभावे ज्ञानतत्सिरनुपपत्तेरित्यर्थः ज्ञानतत्सेरभावात्तज्ज्ञानसंनिकारणत्वेन ज्ञेयसिद्धिरित्यभिप्रेत्य स्वं
पक्षं निषेधं प्रतिजानीते नेति ज्ञानं किं व्यवहारार्थं स्वातिरिक्तं ज्ञानमपेक्षते उत विषयव्यवहारार्थं नाद्यः ज्ञानातिरिक्त-
विषयस्याप्यासिद्धेः अयं दूषयन्नेति प्रतिज्ञायां हेतुमाह ज्ञानस्येति स्वयंप्रकाशमानत्वेनेति अवेद्यत्वे सत्यपरोक्षत्व-

घटस्य हि ज्ञानाभीत्यानकारकाद्यव्यवस्था

तयोः प्रमाप्रमाभासयोः १=

विषयव्यतिरेकेण १=

विषयाभावे २=

॥ व्यवहारोपयोगित्वेऽपि ॥

तस्यैव विवादास्पदीभूतत्वात् २

ननु ज्ञानं न स्वप्रकाशं तस्य वक्तेन न घटवद्वेद्यत्वादित्यत आह परप्रकाशत्वेनेति ज्ञानं किं ज्ञायमानं विषयसाधकं उत ज्ञा
यमानं नाद्यः प्रथमज्ञानवज्ज्ञानभासकज्ञानांतरस्यापि ज्ञातस्यैव विषयाभिमतज्ञानसाधकत्वाय ज्ञानांतरापेक्षणी
यं एवं तृतीयज्ञानस्यापि ज्ञानांतरापेक्षायामनवस्थाप्रसंग इत्याह ज्ञानांतरापेक्षायामिति प्रथमज्ञानस्येति शेषः ननु
मूलज्ञानतिकरीमाद्यन वस्थाद्विदूषणमिति=४ नेयमनवस्था दोषाय मूलभूतप्रथमज्ञानस्य तथाभावादित्यत आह ज्ञानासिद्धाविति यदेव ज्ञानं न ज्ञायते तदसत्वाप
त्त्या तद्विषयज्ञानस्यापि प्रमाणाभावादसत्वापत्त्या संविद्धारा मूलभूतज्ञानस्याप्यसिद्धिः स्यात्तदसत्वे मूलभूतज्ञानस्य ५=
च जगत्प्रपंचस्य स्वरूपसिद्ध्यभावादनवभासः स्यादिति परप्रकाशत्वे ज्ञानस्य न युक्तमित्यर्थः द्वितीयमनूद्य दूषयति अ
ज्ञायमानस्यैवेति ननु यदा कदापि प्रमाणप्रवृत्त्या स्वरूपसत्त्वमस्तीत्यत आह अस्त्वेवेति एवं ज्ञानमिव न संभवतीत्यर्थाय
ज्ञानस्य १२

परप्रकाशत्वेन ज्ञानांतरापेक्षायां तस्याप्यन्यतः तस्याप्यन्यतः इत्यनवस्थित्या ज्ञानासिद्धौ जगदांध्यप्रसंगात् अ
ज्ञायमानस्यैव ज्ञानस्य स्वविषयसाधकत्वे प्रमाणाभावेन नरशृंगतुल्यस्य स्वरूपसिद्धासिद्धेः अस्त्वेवाज्ञान सन्नार २=
स्य स्वज्ञानार्थं ज्ञानांतरापेक्षा तथापि विषयापेक्षणं कुतः विषयज्ञानस्यैवापेक्षणात् ज्ञानसामान्यस्या-
नपेक्षणे स्वविषयव्यवहारज्ञानापेक्षायां विषयापेक्षावश्यंभाविनीतिनन्नक्षम ॥ ॥

ज्ञावसंभवो दोष उक्तः अस्त्वेवेत्यादिना तत्र अन्यथैवोपपत्तिरुच्यते इति विवेकः विषयीभूतज्ञानस्य यो विषयः तदपेक्षणं
ज्ञानविषयकज्ञानांतरस्य कुत इत्यर्थः विषयज्ञानस्येति ज्ञानत्वमिति हि स्वविषयज्ञानमेवापेक्षते न विषयीभूतज्ञान
घटादि विषयमपि स्वविषयज्ञानमात्रेण चरितार्थत्वादित्यर्थः ननु ज्ञानत्वमेकं किं ज्ञानसामान्यमेव विषयः किं वा ज्ञानविशेषः
नाद्यः घटज्ञानमित्याकारत्वात् ज्ञानमात्रविषयतायोगात् तन्मात्रानपेक्षणात् अथ यदि द्वितीयः तर्हि ज्ञानविशेषस्य- ॥
विषयाधीनत्वात्कथं विषयाभावे ज्ञानत्वस्योपपत्तिरिति शंकायां दीपिंकते ज्ञानसामान्यस्येति सत्यं ज्ञानविशेषो ज्ञाना दीपिका
भासत इति स च ज्ञानविशेषोऽन्याहतिरूपो न विषयकृत इति न ज्ञानत्वमिति विषयमपेक्षते इत्यभिप्रेत्य परिहरति ननु छ-
ज्ञानमात्रा ३=

व्यावृत्तिः४ सर्वाभिन्नत्वं२ विषयासङ्गावात्नु व्यावृत्त्युपपत्तेः२

श्री वे॰सि॰ टी॰ २९ कुतस्तर्हि ज्ञानानां तेभ्यो घटज्ञानस्य व्यावृत्त्यात्मकविशेषसिद्धिरिति शङ्कां परिहरन् तत्र ज्ञानप्रतिज्ञायां हेतुमाह ज्ञानस्येति वि
षयो ज्ञाने किं ज्ञानव्यावृत्तिहेतुः उत ज्ञाने व्यावृत्तिप्रतीतिहेतुः नाद्यः व्यावृत्तेरन्योन्याभावत्वेनाजन्यत्वात् जन्यत्वे वा तदुत्पत्तेः प्राक् ज्ञा
नस्य सर्वाभिन्नस्वभावस्य त्वच्छक्तिकल्पनं विषयाद्व्यावृत्त्युत्पत्तौ स्वभावं न ह्यात् अतीतानागतविषयकज्ञानस्याव्यावृत्तत्वप्रसंगाच्च
अघविषयः स्वज्ञाने व्यावृत्तिं प्रत्याययति तर्हि असन्नीतां प्रत्याययेत्सन्नीतां वा न तावदाद्यः असतोऽप्रकाश्यत्वात् द्वितीये ज्ञान
व्यावृत्तिसत्त्वं न विषयाधीनमिति स्वत एव व्यावृत्तं ज्ञानमिति यथा परेषां वैशेषिकादीनां पटत्वादिभ्यो व्यावृत्ता घटत्वादिजातिः
स्वत एव न तु व्यक्त्या व्यावर्त्तते अन्योन्याश्रयात् अन्त्यविशेषाश्च स्वत एव व्यावृत्तास्तथा ज्ञानमपि स्वत एव व्यावृत्तमिति ज्ञान
स्य परप्रकाशकत्वपक्षेऽपि तत्प्रतीतिर्न विषयनिरूप्येति ज्ञानत्वस्य तदुपपत्तिस्तत्र प्रमाणमित्यर्थः ननु यद्यपि विषयो न ज्ञानोत्प

ज्ञानस्य स्वत एव व्यावृत्तत्वात् परसिद्धजात्यादिवत् तथापि ज्ञानस्य ज्ञेयव्याप्तत्वात् ज्ञेयं बोधयतीति चेत् न व्याप्त्यसि
द्धेः ज्ञानज्ञेययोर्विभिन्नदेशत्वेन सामानाधिकरण्याभावात् अतीतानागतार्थज्ञानदर्शनेनैककालत्वस्याप्यसि
द्धेः तस्मात् प्रत्येतव्यप्रतीत्योरभेदः प्रामाणिकः कुतः प्रतीतिमात्रमेवैतद्भाति विश्वं चराचरम् १७ ज्ञा
नस्वरूपमेवाहुर्जगदेतद्विचक्षणाः अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्येव कुदृष्टयः १८॥

त्तिहेतुः नापि तत्स्थितिहेतुः नापि
तत्प्रसिद्धिहेतुः तथापि यथा दाह्यव्याप्तो वह्निर्दाह्यं दहति तथा ज्ञेयव्याप्तं ज्ञानं ज्ञेयं भासयतीत्यस्ति ज्ञेयमिति शङ्कते तथापीति
दा बोधयतीत्यन्तमिति शेषः यत्र यदा वह्निस्तत्र तदा दाह्यमिति युक्तं वह्निर्दाह्यं दहतीति ज्ञानं पुनः न ज्ञेयेन व्याप्तं विभिन्नदेशत्वा[illegible]
द्विभिन्नकालत्वाच्चेति दृष्टान्तदार्ष्टान्तिकवैषम्येण परिहरति नेत्यादिना तद्भेदेवदकाशमेति चतुर्थपादसंग्रहीतं विवृत्तमेतावता
ग्रन्थेन यत्तदिदानीमुपसंहरन् श्लोकेन संगृह्णाति तस्मादिति ननु ज्ञानज्ञेययोरभेदे किं ज्ञानमेवावतिष्ठते ज्ञेयमेव वेति विनिगम =
नकाभावाद्विषये किं प्रतीतिरेव सत्यमित्यायविकल्पांगीकारेणाह प्रतीतिमात्रमेवेति यदेतद्विश्वं तत्प्रतीतिमात्रमेवेति य श्री
त्तदध्याहार्ययोजना अथवा यत्प्रतीतिमात्रं स्वप्रकाशमहिम्ना भाति एतदेव विश्वं न ततोऽतिरिच्यत इत्यर्थः जडप्रपंच र
स्य स्वसिद्धये ज्ञानापेक्षायाश्च वक्ष्यमाणत्वात् ज्ञानस्य च विषयानपेक्षाया उपपादितत्वात् ज्ञाने एव विषयोऽन्तर्भावितमर्हती २९

ननु यदि प्रतीतिरेव जगत्प्रतीतिस्तां नानेति चानेकधा तर्हि चराचररूपेणाभेदेन नानात्वेन च प्रतीतिस्तत्राह ज्ञानज्ञेयेति वस्तु
तो विज्ञानस्वरूपमेवास्यामवस्थायां संवृत्तिं जगज्ज्ञानादिभेदेन प्रतीयते तथा च स्वप्ने विज्ञानमेव ज्ञेयात्मना नानात्वेन भाति यथा
तथा विज्ञानमात्रमेवैतन्मनसि मज्जितकाले चराचरात्मना नानात्वेन भातीति तज्ज्ञानभेदेन च भानं नानात्वं पश्य त्वमित्यर्थः ननु किमि
ति विज्ञानमेव जगद्रूपेण भातीति कल्प्यते विज्ञानाद्भेदेन स्वातन्त्र्येणैव जगद्भासतामिति तत्राह तंतोर्भेद इति पटः स्वरूपतो व
स्तुतस्तंतोर्भेदे शून्य एवेत्यन्वयः कारणसत्तैव कार्यसत्तानुत्वात् तंत्वेन कार्यसत्त्व तथा सति तंत्वभावेऽपि पटः स्यात् ननु पट इति कार्यसत्व=
तंत्वभावे ९= तंतोः सत्त्वमपि कारणत्वेनाश्रयत्वात् तदभावे पटो न तिष्ठति ततस्तंतुसत्तैव पटसत्तेति चेत्तर्हि सर्वदा द्वयोरिव भेदे कार्यकारण
भावस्यादर्शनात् तथा च तंतुपटयोरन्यतरस्य पृथक् पटस्य तंतुसापेक्षत्वात्तन्तोश्च पटनिरपेक्षत्वात्तंतुरेवावशिष्यते इति तंत
भेदे पटः शून्य एवेत्यर्थः इदं प्रतीतिसिद्धं चराचरं जगदात्मनो यदि स्वरूपतो भिन्नं तर्हि तत्प्रेव शून्यमेव तत्र हेतुः भानमात्रमिति भा

ज्ञानज्ञेयप्रभेदेन यथा स्वात्मप्रतीयते । विज्ञानमात्रमेवैतत्तथा जगच्चराचरम् ॥ १९ ॥ तंतोर्भेदे पटो यद्वच्छून्य एव
स्वरूपतः । आत्मनोऽपि तथैवेदं भानमात्रं चराचरम् ॥ २० ॥ रज्जुर्यथा स्वांतदृष्ट्या सर्परूपः प्रकाशते । आत्माऽत
थाऽस्वदृष्ट्या जगद्रूपः प्रकाशते ॥ २१ ॥ आत्मन्येव जगत्सर्वं दृष्टिमात्रमतत्त्वकम् । उत्पत्तिस्थितिनाशादायवि
((नश्यन्ति महद्गुरोः ॥ २२ ॥ एवमनेकदा द्वयेऽस्य

नं प्रकाशः स्वस्मिन्नस्यां तद्रूपतावस्तुतः आत्मन्येव यथा यथा वस्तुतः इति श्रुत आत्मभेदे जगद
रदिति ननु चिदात्मनो जगद्रूपेण भाने विकारित्वप्रसंग इति विवर्तवादाश्रयात् नेति सदृष्टान्तमाह रज्ज्विति ननु ज्ञातारज्जुः
सर्पादिरूपेण भासत इति युज्यते तस्याः सर्पाधिष्ठानत्वात् ननु तद्वदात्मा ज्ञानवशादपि जगद्रूपेण भासत इति कल्पयितुं युक्त
आत्मन ४ तस्य निमित्तमात्रत्वेन जगदधिष्ठानत्वानुपपत्तिरिति तत्राह आत्मन्येवेति जगदुत्पत्तिस्थितिनिवृत्तिहेतुत्वेनात्मनो न निमि
त्तमात्रता किंतूपादानत्वेन जगदधिष्ठानत्वमेवाज्ञातस्यात्मनोऽयुक्तमिति नन्वात्मनो जगद्रूपत्वे नानात्मता यदि किं तु जगद्रूपत्वात
प्राद्दुःखत्वापत्तिः दुःखरूपत्वमपदात्मकत्वात् तथा नानात्वं चात्मनो निष्प्रमाणमयते नानात्मकजगदात्मत्वात् अद्वैतत्वस्यात्मनि
दुर्निवारतया विविधजगन्मयत्वात् तथा च धर्मादिमत्त्वप्रसक्तिश्च नहि धर्मी यत्नपि द्यात्माजगन्मयति वैषम्यादिदोषप्रसं
गात् न च जीवाद्दृष्टमपजीवत्वेनस्यादृष्टमिति वाच्यम् जीवब्रह्मणोरभेदात् किं च यथा रज्जुरपि दर्प्याकारतामापन्नं दृष्टवा
व शिष्यते तद्वत् तथात्मापि जगद्रूपतामापन्न इति जगदेवस्यान्नत्वात्मेत्येवं शङ्कितदोषात्परिणाचष्टे एवेति ॥ ॥

उ॰
वै॰ प्र॰
टी॰
८०

अज्ञानवशादेव परिच्छिन्नाद्यात्मकजगद्रूपतात्मनो न वस्तुतः इति नैकोऽपि दोष इति यथादर्पणं विंबसन्निधौ प्रति
विंबात्मनावभासमानमपि प्रतिविंबाकारतया मिथ्यात्वात्स्वरूपं न जहाति एवमात्मनोऽपि जगदाकारतया मिथ्या ।।।।
वात् जगद्रूपेणाभासमानोऽप्यात्मा न स्वरूपं जहातीत्यत्र दृष्टान्तमाह प्रतिविंबमिवेति उक्तेऽर्थे सम्मतित्वेनाप्तवाक्यमा
ह उक्तमिति अत्र वदतीत्यादिग्रंथेनैकदेशिनिराकरणव्याजेन निरूपितं प्रमेयमुपसंहरति तदेवमिति यतो ज्ञान
ज्ञेयविभागो न प्रामाणिकः तत्तस्मादेवं सति दृष्टिदृश्ययोरन्यतरावशेषे प्राप्ते दृश्यस्य सापेक्षत्वात् दृष्टेश्च निरपेक्षत्वात् दृष्टि
रेवावशिष्यते न दृश्यमित्येवं सतीत्यर्थः अत एवाह दृष्टिमात्रात्मकमिति जगत्प्रतीतिमुपपादयितुं रज्जुः यथेत्या
दिना स्वाज्ञानादात्मा जगद्रूपः प्रकाशत इत्यादिना निरूपितमुपसंहरति आत्माश्रयेति नन्वेकदेशिमतनिराकर-

पापमदोषादिवर्जिते प्रतिविंबमिवाभाति दृष्टिमात्रं जगत्त्रयम् २३ तदुक्तं भगवता वशिष्ठेन तस्मिंश्चिद्दर्प
णे स्फारे समस्ता वस्तुजातयः इमास्ताः प्रतिविंबन्ति सरसीव तटद्रुमाः १ यस्मिंश्चिन्मयी लीला जगदे
तच्चराचरम् तस्य विश्वात्मकत्वेऽपि स्वङ्गे नैकोऽपि दृश्यता २ तदेवं दृष्टिमात्रात्मकं जगदात्माश्रयविष-
येणाज्ञानेन कृतमित्यात्मनोऽज्ञानविषयत्वं साधु विकल्पितम् तथा चात्मनि लौकिकवैदिकप्रमाण
संभवेन प्रशस्तविधानादिवदसत्त्वे प्रमेकुतस्तत्साक्षात्कारायश्रवणाद्याभ्यर्थनं कुतस्तरां युक्तमपेक्षतेति संक्षेपः ॥

णव्याजेन चिदात्मनः स्वाश्रयविषयाज्ञानेन जगदात्मत्वं [जगत्] तद्रूपेणाप्रतिभासनं च निरूपयता [सिद्धान्तिना] ऽऽत्मनोऽज्ञानविषयत्वमङ्गीकृत
मिति तदाह एवाज्ञाननिवर्तकाय परोक्षसाक्षात्कारजनकत्वेनोपनिषदामात्मनि प्रामाण्यं त्वयैवोपपादितमिति सिद्धान्तिमतसिद्धि
रित्याशङ्कनेत्याह इत्यात्मन इति इतिप्राहुः सर्वोक्तयुक्तिपरामर्शार्थः ततश्चात्मनोऽज्ञानविषयत्वं यत्कल्पितं तत्साधु का
कुक्तिरियं तत्किं साधु अपितु नैव साधु यतो विकल्पितं न तत्प्रमाणसिद्धं स्वप्रकाशमानस्यात्मनोऽज्ञानविषयत्वानुपप
त्तेरुक्तत्वादिति तथा च न सिद्धान्तिमतसिद्धिरित्याह तथा चेति वैदिकैः यदनुमानयेदिति तत्त्वाज्ञदर्पेदिति तत्त्वे वेदस्य नि
रपेक्षत्वादित्यादि संगृहीतमाह इति संक्षेप इति आत्माऽसत्त्वप्रमाणत्वान्न साक्षात्कृतये प्रमान् उपासीनस्फुटिक

ख्याख्यायिकाविकल्पनम् ॥
८०

हात्मादिति अमाराांतरायोग्यत्वान्ततत्त्ववेदाप्रामाण्यमित्यर्थः तर्हि परिच्छिन्नत्वात्घटवदनात्मत्वमिति नेत्याह

एवं पदत्रयमन्वयमिहांतमुपक्रमते एवं प्रमेय इति नन्वात्मनि प्रमाणमस्ति नवेत्याद्यात्मग्रहणेन विंष्टोः आक्षेपतन्नीवादि शब्दवा
वदा२५ च्योवागम्यते किंवास्तु दचिदात्मकमिति आद्ये प्रमाणप्रवृत्तावपि न दोषः तस्यास्वप्रकाशत्वेन भासमानत्वाविरोधात् प्रमाणप्रवृ
त्तावपि न दोषः तस्याज्ञातज्ञापकत्वादित्वात्ततत्त्वप्रमाणप्रवृत्त्यप्रवृत्तिचिन्तावैयर्थ्यात् किंतु तत्त्व प्रतिपाद्यमित्यपेक्षायां तत्रोक्तं च तत्त्व
यविशेषणाविशिष्टमात्मनीत्यत्र निरूपणीयं वस्तुश्लोकेन संग्रहणाति यत्तत्त्वमिति यत्तत्त्वमिदमत्र कथ्यत इत्यन्वयः तत्त्वमना
रोपितस्वरूपं तत्त्वेनैतन्नत्वं निरूपणमर्हति प्रमाणग्रहणेन स्त्वादि विनजाह वेदशममिति ननु तेनैतद्गम्यं निष्प्रयोजनत्वादिति तत्रा
ह परमिति अविद्यातत्कार्यरहितत्वात्तत्त्वं पुरुषार्थ इत्याह नित्यमिति ननु प्रयोजनवत्त्वाद्वेदप्रमाणत्वं संभवेपि तस्य हस्तपत्वामित्याशंक्य प्रम कत्व
तिविनिनेत्याह सत्यमिति तर्हि सिद्धत्वात्तत्र नतत्त्वप्रमाणतरसंवादविसंवादाभ्यां वेदाप्रामाण्यमित्याशंक्याह महदिति निरूपचरितमह
द्रूपत्वाच्चानात्मत्वमित्यर्थः नन्वस्तु तत्स्वभावत्वेन सत्त्वेऽपि तद्वतो भेदप्रतीतेर्न तत्त्वमहदिति तत्राह इदमस्तनमिति इदं सर्वं केनचमस्तनमु किरि
ति।

एवं प्रमेयं विधीयते यत्तत्त्ववेदशमं परमस्वरूपतमं नित्यमुक्तस्वभावं सत्यं महत्स्वात्मस्वत्तत्वंमहदिदमस्तं मुक्तमात्रैक २
गम्यं यस्मिन्शिलेशमात्रं जगदिदमखिलं भ्रांतिमात्रैकदेहं प्रत्यग्ज्योतिः स्वरूपं शिवमिदमथ नाकथ्यते युक्तितो ॥ २

त्यर्थः तत्र विद्वत्वस्य तत्प्रमाणयति मुक्तमात्रेति एवं तत्पदलक्ष्यं निरूप्य वाच्यमाह शिवमिति ईश्वराभिधानमित्यर्थः ईश्वरत्वमु
पपादयति यस्मिन्निति तर्हि जगदुपादानत्वेन विकारित्वमिति नेत्याह भ्रांतीति भ्रांतिरज्ञानमेव देहः स्वरूपं यस्य तद्भ्रांतिमात्रैकदेहं
अव्याकृतं जगदुपादानं तत्स्वरूपमदरं तेनाज्ञानप्राधान्येन जगदुपादानत्वान्नविकारितेत्यर्थः यद्वा भ्रांतिमात्रेति जगतो विशेषणं ते
आत्मोपादानत्वे४= न जगत्त्ववस्तुतत्त्वात्मोपादानं भ्रांत्यात्मनो जगतः तेवेसत्यत्वप्रसक्तेः तर्हि कथमात्मनः कारणत्वव्यपदेशः जगदुपादानाज्ञानाधिष्ठान
त्वादिति नात्मनो विकारितेति तदस्यैवं तस्य व्यावर्तयति प्रत्यगिति जडत्वानात्मत्वादिना वाह्यत्वादिरूपमायायामानंजगदयेत्तया
प्रतिकूलं वैपरीत्येन जडविरुद्धत्वादिरूपेणांतरादिभावेन चांचतीवोपलक्षितमिति प्रत्यक् प्रत्यक्त्वेहेतुमाह ज्योतिरिति तत्कथनस्याप्र
सक्तत्वेपराचष्टे अथ नेति शिष्यजिज्ञासोत्तरकालमित्यर्थः ननु किं भवत्कथनेन वेदेनैव तत्कथनादिति तत्राह युक्तित इति अ
प्रतिपत्तिविप्रतिपत्तिनिरासेन वेदार्थप्रकटनाय योग्यतासंपत्तये युक्तितो निरूप्यत इति अत एवाह वेदशममिति ॥ ॥ ॥

नत्र२५

श्री
वे॰ सू॰
टी॰
२८

अथसर्वोक्तपक्षोपक्रमेआत्मशब्देनविशिष्टःपरोवाजीवोवानविवक्षितःकिंतर्हिअहंचिदानंदघनंप्रत्यक्चैतन्यमात्म
शब्देनविवक्षितंतर्हिनपूर्वोक्तदोषाणामवकाशइतिवक्तुंसिद्धांतीविकल्पयति किंनत्रेति तत्रपूर्वोक्तनिरूपणीयेसति उक्ते
आत्मनिप्रमाणस्यापेक्षाकिमात्मनःस्वरूपलाभायउताहोआत्मप्रतीतयेइतिविकल्पार्थः आद्यंदूषयति नाद्यइति किमेत
दात्मनःकार्यत्ववादिनआद्योयंतत्कार्यत्ववादिनोवा आद्यंपराचष्टे आत्मस्वरूपस्येति नित्यतयेतिअकार्यतयेत्यर्थः भावस्य
हिनित्यतोकार्यत्वेनोपपद्यतेइत्यात्मनःकार्यइतिनस्वरूपलाभायात्मप्रमाणमपेक्षतेइत्यर्थः द्वितीयंप्रत्याचष्टे प्रमाणस्ये
ति प्रमाणस्यप्रमेयानुत्पादकत्वमसिद्धंघटत्वादेरपिप्रमेयत्वादितितत्राह वेति नहिघटादिज्ञानंघटादिप्रसूते किंतर्हिप्रवृत्ति ग्राहकं२२
विषयकेष्टसाधनताज्ञानमितिनव्यभिचारः अथात्मस्वप्रतीतयेप्रमाणमपेक्षतेइतिद्वितीयविकल्पेयदिदंविचारणीयम्

किंतत्प्रमाणाभावेनात्मनःस्वरूपानुपपत्तिःप्रतीत्यनुपपत्तिर्वा नाद्यःआत्मस्वरूपस्यनित्यतयाइतरनिरपे
क्षत्वात् प्रमाणस्यस्वप्रमेयानुत्पादकत्वाच्च द्वितीयेप्रमाणेपितर्हिप्रमाणांतरंवाच्यम् तदभावेनरशृंगवद
सत्वेनस्वप्रमेयसाधकत्वासंभवात् तथाचप्रमाणेप्रमाणांतरानुसरणेऽनवस्थितेःप्रमाणेनैववस्तुसिद्धि
रित्यभिमानमात्रम् ॥॥

किंप्रतीतिमात्रंप्रमाणाधीनमुतजडस्यप्रतीतिः प्रमाणाधीनेति तत्राद्येऽतिप्रसंगमाह प्रमाणेपीत्यादिना तच्चविष
यसाधनार्थंप्रमाणमपेक्षितंनतुप्रमाणेप्रमाणमपिअनुपयोगादितितत्राह तदभावेइति लक्ष्यतत्त्वाकंहिप्रमाणंवि
षयंसाधयतीतिविनाप्रमाणंतत्प्रमाणसत्ता सत्ताभावेचप्रमाणस्यनस्वविषयसाधकतेत्यर्थः अपेक्षितांतर्हिप्रमाण
स्वसिद्धयेप्रमाणांतरं नअनवस्थाप्रसक्तेरित्याह तथाचेति कथंतर्हिप्रमाणेनैववस्तुसिद्धिरितिमहतामुद्घोष
इत्याशंक्यपूर्वोक्तानवस्थादोषाद्भ्रमलोकमहोद्घोषइत्याह इत्यभिमानमात्रमिति ॥ ॥
॥ ॥ ॥

ननु जडं वस्तु स्वप्रतीतये प्रमाणमपेक्षतां नाम प्रमाणं पुनः स्वप्रकाशरूपत्वात् स्वयमेव सिध्यतीति मानांतरमपेक्षते तथा च नानव
स्थेति द्वितीयमाशंक्य ते अन्येति ननु स्वसाधकत्वं प्रमाणस्य स्वविषयप्रतीतिजनकत्वं न चैतत्स्वात्मनि विरोधादिति चेन्न स्व
व्यवहारे परानपेक्षत्वस्यैव स्वसाधकशब्दार्थत्वात् परानपेक्षत्वमेव प्रमाणस्य साधयति नहीति प्रमाणांतरस्य सिद्धये यदपेक्षणं तेन त
त्वतावत्प्रमेयत्वस्यापत्त्यापादकत्वात् प्रमाणं चेत् न स्वेनवाप्यतेरित्यर्थः प्रमाणं स्वप्रकाशकं स्वस्य परस्य सिद्धये नान्यत्प्रमाणमपेक्ष
ते इति नानवस्थेति पूर्वपक्षिणा निरूपितेस्मिन्नर्थे आह इतरन्नहीति आत्मा कथं प्रमाणेन सिद्धः स्यादित्यन्वयः ननु कात्रानुप
तन्नानर पत्तिस्तत्राह स्वाधीनेति प्रमाणस्वरूपं चात्माधीनं आत्मसिद्धिस्तु प्रमाणाधीनेत्यन्योन्याश्रयप्रसक्तेर्नात्मा प्रमाणात्सिध्यती
त्यात्माधीनसिद्धिकत्वप्रमाणस्य केन स्वेन साधयति सर्वस्येति स्वात्मनवशाज्जगदुत्पाद्य भासयतीति जगत्साधक आत्मेत्यर्थः
किंच प्रमाणादात्मा सिध्यतीति कोर्थः किमस्य घटवज्ज्ञायते नायमर्थस्तत्र हेतुमाह प्रमाणादिति सर्वसिद्धत्वं चात्मनः प्रमाणप्र
प्रमाणस्य ॥=
अथ प्रमाणं प्रमाणांतरनिरपेक्षमेव स्वं स्वप्रमेयं च साधयेत् स्वप्रकाशस्वभावस्य तस्य स्वपरव्यवहारे प्रमाणांतर[illegible]निरपे
दत्वात्प्रदीपप्रकाशवत् नहि सर्वस्य साधकं प्रमाणं स्वसिध्यर्थमन्यदपेक्षते इति प्रकृतिमत इतरन्नहि सर्वस्य प्रमाण
प्रमेयभेदभिन्नस्य जगतः साधक आत्मा कथं स्वाधीनसिद्धिकेन प्रमाणेन सिद्धः स्यात् प्रमाणस्य स्वमेव सिद्धत्वा
त् अन्यथाः सिद्धप्रमातृकं प्रमाणमेवात्मानं न लभेत कथं वा सर्वस्य प्रमातारमात्मानं विषयीकुर्यात्प्रमाण कर्मक
तिकारणत्वादिति ननु प्रमाणं प्रत्यात्मा कारणं तत्किं प्रमातृत्वेन करणत्वेन वा विषयत्वेन वा नाद्यः बुद्धेरेव प्रमातृत्वात् बुद्धीधीभिरि
त्येतत्सर्वमनपेक्षतिप्रकृतेः नापीतरौ अनंगीकृतेरिति तत्राह अन्यथेति आत्मानं स्वरूपं तत्र हेतुः असिद्धप्रमातृकमिति नहि चैत
न्यतादात्म्यमनापन्नायाः बुद्धेः प्रमातृत्वं संभवति जडत्वात् अन्यथातिप्रसंगात् आत्मनः प्रमातृत्वे हि निमद्बुद्ध्युपाधित्वाद्बुद्धिः प्र
मात्रीति लोके व्यवहारः इत्यात्मा प्रमाता प्रमाणानां कारणमिति तदभावे प्रमाणस्वरूपमेव न लभेत कारणाभावे कार्यस्याभावादित्य
र्थः प्रमाणादात्मोत्पद्येत इति न ब्रूमः किं तर्हि ज्ञायते इत्याह कथं वेति आत्मनः प्रमाणाज्ज्ञायते ज्ञाता किं स्वयमेव तदन्यो वा नाद्यस्त्वा
ह सर्वस्येति प्रमेयमात्रप्रत्यात्मनो ज्ञातृत्वैकरूपत्वात्तेनैव स्वेन प्रमातृत्वमित्यर्थः प्रमाणं प्रत्यात्मनो ज्ञातृत्वाज्ज्ञेयत्वं न युक्तमित्यर्थः प्रमाणादि
प्रमाण३ प्रमातापि तद्विषयः किं न स्यादिति नेत्याह कर्मेति ज्ञाने हि क्रियायां कर्ता कर्म चायेत्यभवति तत्र कर्ता क्रियासाधनत्वात्क्रियां प्र कर्तृकर्मणोर्मध्ये २ =
ति गुणत्वं प्रतिपद्यते कर्म तु स्वरूपतो धर्मतो वा क्रियासाध्यत्वात् क्रियां प्रति प्रधानं तत आत्मनः स्वज्ञानं प्रत्येकदेवोभयरूपत्वं ज्ञानं प्र
त्याश्रयत्वेन साधनत्वात्प्रमेयत्वेन प्रधानत्वादिति विरुद्धरूपप्रसक्तेर्न प्रमाणमात्मानं विषयीकर्तुमर्हतीत्यर्थः ॥ ॥ ॥ ॥

द्वितीयं विकल्पं दूषयति तदन्यस्य चेति विषयादात्मनोऽन्यत्प्रमात्रभवज्जडमजडं वा नाद्यः तस्यानात्मत्वेनाप्रमातृत्वा-
दित्याह अनात्मत्वेनेति न द्वितीयः तस्यैवात्मत्वप्रसक्तेः ज्ञेयस्य घटवदनात्मत्वप्रसक्तेश्च विज्ञातुः प्रमाणागोचरत्वे मैत्रेयीब्रा-
ह्मणपाठमुदाहरति तथा चेति केन कारणेन को वान्यो जानीयात् तत्रावस्थायामात्मव्यतिरिक्तस्य सर्वस्यैवाभावादित्यर्थः
प्रमाणाव्यतिरेकेणात्मसिद्धौ फलितमाह तथा चेति किं च न चेदस्ति प्रमाणमात्मनि तर्हि तस्यासत्त्वापत्तिरिति वदता आत्म-
नि प्रमाणासत्त्वेनासत्त्वमापाद्यते इति प्रतिभाति तदयुक्तमिति निरूपयितुमिदानीं विकल्पयति किं चेति प्रमाणासत्त्वेनापाद-
केनात्मन्यापाद्यमानमसत्त्वं ज्ञातं न वा आद्ये किं प्रमाणाज्ज्ञातं भ्रमाद्वा स्वतो वेति विकल्पार्थः प्रथमे प्रथममनूद्य दूष- असत्वस्फुर =
यति आद्य इति असत्त्वग्राहकं प्रमाणमसत्त्वमात्रं गृह्णाति आत्मप्रतियोगिकमसत्त्वं वा नाद्यः तस्य प्रतियोगिनिरूप्य-
त्वेन प्रतियोगिनमविषयीकृत्य तन्मात्रस्य प्रमाणेन विषयीकर्तुमशक्यत्वात् अथ प्रतियोगिनं विषयीकृत्य प्रमाणमसत्त्वं प्र-

असत्वमात्रस्य।
तदन्यस्य च सर्वस्यानात्मत्वेनाप्रमातृत्वात् तथा च श्रुतिः विज्ञातारमरे केन विजानीयादिति तथा च प्रमातुरात्म-
नः सत एव सिद्धत्वात् प्रमाणाभावादसत्त्वप्राप्तिः किं चेदमात्मनोऽसत्त्वमापाद्यमानं प्रमाणासिद्धमसिद्धस्व-
भावं स्वतो वा सिद्धम् आद्ये सत्त्वग्राहकप्रमाणस्य प्रतियोगिविषयत्वनियमेनात्मनोऽपि प्रमाणासिद्धत्वेना-
ऽसत्त्वापत्तिः न द्वितीयः असिद्धस्यापादनानुपपत्तेः न हि बुद्धावनारूढस्वभावमापादयितुं शक्यम् ॥ ॥

त्याययति तर्हि दूषयति असत्त्वग्राहकेति आत्मनः प्रमाणविषयत्वेनापादकाभावात् आपाद्यमसत्त्वं संभवति न हि वह्नि-
मति वह्न्यभावेन निर्धूमत्वमापादयितुं शक्यमित्यर्थः नन्वसत्त्वस्य प्रतियोगिसत्त्वं नास्तीति कथं तस्य प्रमाणविषयतेति नैवम् स-
त्त्वं प्रतियोगिभवत्पदार्थस्वरूपं तद्धर्मो वा आद्ये त्वात्मात्मकं सत्त्वं पदार्थान्तरात्मकं वा आद्ये उत्तरस्तत्कमात्मनः प्रामा-
णिकत्वान्नासत्त्वमिति द्वितीये त्विष्टसिद्धिः पदार्थान्तरस्यैवासत्त्वसिद्धेर्नात्मन इति सत्त्वधर्मपक्षे तु तद्धात्मनोऽन्यस्य वा आद्ये आत्म-
सत्त्वप्रतियोगितस्य प्रमाणसिद्धत्वे कथमात्मन्यसत्त्वापादनम् अन्यधर्मपक्षे तर्हि तस्यैवासत्त्वं नात्मन इति कथमात्मनोऽसत्त्व-
मापादनीयमिति अत्यन्तरूपाऽसिद्धस्वभावपक्षं दूषयति न द्वितीय इति असिद्धस्यापादनप्रसञ्जनं कुतो नेत्यपेक्षायामा-
ह न हीति परं प्रतिपक्षे नानिष्टप्रसञ्जनमापादनमत्रापादनशब्दार्थः न चायमतो त्वाशृङ्गरचनमिति बुद्धावनारूढमापा-
दयितुं शक्यमित्यर्थः ज्ञातं प्रमाणाद्भ्रमाद्वा स्वतो वेत्यत्राद्यो निराकृतः ॥ ॥

त्वे।

द्वितीयोपि न संभवति असत्वस्य भ्रमसिद्धेभ्रमविषयस्य बाध्यत्वेनात्मनि सत्वमेव वास्तवं स्यात् तृतीयं दूषयति तृतीयेत्विति असत्वमात्रं स्वतः सिद्धं आत्मविशेषितं वा नाद्यः निर्विशेषितासत्वानिरूपणात् द्वितीये त्वात्मनोपि स्वतः सिद्धत्वं विशिष्टस्य स्व तः सिद्धत्वे विशेषणस्यापि तत्वात्तत्स्वरूपयोरपि स्वतः सिद्धत्वप्रसंगे आह आत्मेवेति सापेक्षनिरपेक्षयोर्मध्ये निरपेक्षस्यैव स्वतः सिद्धत्वयुज्यते न प्रतियोग्यधीनासत्वस्य सापेक्षत्वव्याघातापत्तेरित्यर्थः अत्रैव हेत्वंतरमाह असत्वस्य चेति चकारो भिन्नक्रमः प चम्यतानुपपत्तिपदेन संबध्यते अयमर्थः [illegible] असत्वं जडमजडं वा जडत्वादेव घटवत्स्वतः सिद्धयोगादिति यद्यजडं त दा दूषयति अन्यथेति अजडस्य स्वतः सिद्धस्य वा आत्मत्वादित्यर्थः तथा च प्रमाणाभावेनात्मन्यसत्वापादनं नेष्टमिति भावः सिद्धाव लोकनन्यायेन प्रमाणादसत्वस्य सिद्धिपक्षे दोषांतरमाह किंचेति आद्ये बहुवक्तव्यत्वात् तृतीयपक्षं प्रथमं दूषयति नात्मा इति तत्रहे

तृतीये त्वात्मैव स्वतः सिद्धोस्तु असत्वस्य च स्वतः सिद्ध्यनुपपत्तेः अन्यथात्मनो नामांतरकरणप्रसंगात् किंचात्मनोऽ सत्वं किमात्मना ज्ञायते अनात्मना वा नांत्यः अनात्मनो ज्ञातृत्वाभावात् नाद्यो व्याघातात् तथाहि किमात्मा स्वस ज्ञाकाले स्वासत्वं जानाति स्वासत्ताकाले वा आद्ये स्वसत्ताकाले स्वासत्ताकुतः तथा च किं जानीयाद्विषयस्यैवाभावा त् द्वितीये कथं जानीयात्स्वस्यैवाभावात् स्वसत्ताकाल आत्मैव कालांतरभाविस्वासत्तां जानातीति चेन्न हि सत्त्वे वा नि त्यः नित्यः परमतत्त्वकृतहान्यकृताभ्यागमप्रसंगेन परिहृतम् किंचात्मनोसत्ववादी स्वात्मानं निराकरोति परात्मा ॰ ।

आद्य ऽ प्रधाना॰

तः अनात्मन इति ज्ञेयैकरूपत्वान्नेत्यर्थः व्याघातादिति प्रतिज्ञातं हेतुमुपपादयति तथाहीति आद्य इति परस्परवि रोधेन प्रकारांतरं पश्यतीति विनिन्यायादित्यर्थः भवतु सतीसत्ताकाले स्वासत्ता तथापि सा ज्ञायतामिति नेत्याह तथा चेति आत्मा स्वासत्ता काले स्वासत्तां जानातीति द्वितीयमनूद्य दूषयति द्वितीय इति स्वस्यात्मन आत्मनः इत्यर्थः नन्वात्मा स्वसत्ताकाल एव स्वास त्तां जानाति न चैवं व्याघातः तत्कालीनायाः सत्तायाः अज्ञानात् किं कालीनां तर्हि तां वेद भाविनीमिति शंकते स्वसत्ताकाल इति तर्हि नानिष्टापत्तिरित्याह तर्हीति ननु कथं सत्वे वात्माभाविनोः सत्वस्यानुभवादिति तत्राह अनित्य इति प्रमाणास त्वेनात्वं तासत्वमायात्यमनित्यत्वं वा नाद्यः विनाशात्प्राक्सत्वात् न द्वितीय इत्याह तन्नेति अयुक्तौ च तदप्यनित्य त्वमात्मनः परिहृतं अन्यथाकृतस्य हानिः स्यादकृताभ्यागमस्तपेत्यत्रेत्यर्थः किंचेति स्पष्टार्थः ॥ ॥ ॥ ॥

अस्वसत्ताकालीना४८

ॐ आद्ये आत्मनोऽसत्त्ववादी स्वात्मानं निराकरोतीति यद्वत् द्वितीय इति परात्मानं निराकरोतीति पक्षे स्थित इत्यपि यदादितियदं हे
वे॰म॰ वर्णमध्याहृतय: स्थित इत्यतो हेतो: कुत आत्मनोऽसत्त्वमित्यर्थ: नन्वात्मांतरनिराकर्तुरन्यो निराकर्तेति कथं निराकर्तापर
टी॰३॰ मार्थ एव स्थित इति चेत्तत्त्वम् तृतीयस्यापि निराकर्तु: कोपि निराकर्तास्ति न वा आद्ये ऽनवस्था द्वितीये ऽत्रैव विश्रांति
स्तस्यैव परमार्थत: स्थितत्वात्कुत आत्मनोऽसत्त्वमित्युक्तमावर्तते इति उक्तेऽर्थे संवादाय श्रौतं मंत्रमुदाहरति यथाचेति वे
दितृत्वं तावच्चेतनधर्म: घटादेरचेतनस्याप्रमातृत्वात् ब्रह्मापि चेतनं विज्ञानं चनश्रुते: तत्र विज्ञातुर्नेभियते अभेदश्रुते:
एवं सति वेदिता ब्रह्मात्मानमसदेद चेयदि तर्हि असन्नेव स भवति आत्मनो निराकृतत्वादित्यर्थ: निराकर्ता यदि स्वात्मा
नं निराकरोति सो ऽसन्निति हेतत्वे नोपन्यस्तनिराकर्तुरसत्त्वं संवादितं यदि परात्मानं निराकुर्यादिति पक्षे निराकर्तु: सत्त्वसं
वादयति अस्ति ब्रह्मेति ब्रह्मात्मास्तीति यदि चेज्जानाति तर्हि सद्रूपब्रह्मात्मानमेतमृषय: संतं विदुरिति परमार्थत: सत्त्वम्:

आद्ये निराकर्तुरसत्त्वान्निराकार्य एवात्मा परमार्थसन् द्वितीये निराकर्ता परमार्थ एव स्थित: कुतस्तेनात्मनोऽसत्त्वम्
तथा च श्रुति: असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति २ किंच प्रमा-
णं सति विषये प्रवर्तते असति वा असति चेत् शशविषाणमपि तर्हि साधयेत् असत्साधनसमर्थत्वात्प्रमाण-
स्य सतिचेत् न तर्हि प्रमाणाधीना वस्तुसत्ता प्रमाणप्रवृत्ते: पूर्वमेव प्रमेयसत्ताभ्युपगमात् अन्यथासति प्रमा-
णप्रवर्तते इति स्ववचनव्याकोप: नन्वसत एव वस्तुतो भानं प्रमाणाधीनमिति चेत् ॥३॥ असत्त्वादिदोषात् २

दित्यर्थ: किंचात्मनि प्रमाणासत्त्वे ऽसत्त्वापत्तिं वदता प्रमाणासत्त्व एव वस्त्वसत्त्वमिति कोर्थ: किं सति प्रमाणे वस्तुसत्ता जायते
उत ज्ञायते तत्राद्यं निराकर्तुं विकल्पयति किंचेति अंत्यमल्पवादादोहूषयत्वेमन्त्वदति असति चेदिति अत्र प्रमा-
णं प्रवर्तमानं सत्तामुत्पादयतीत्यर्थ: इममपक्षमतिप्रसंगेन दूषयति शशविषाणमपीति हेतुमाह असदिति साधनसमुत्पा
दन एवमत्वयपरकृत्वाद्यं पक्षं दूषयित्वं मन्त्ववदति सति चेदिति तर्हि प्रमाणं वस्तुसत्तोपपादकमिति पक्षं दूषयति ननर्हीति
ति प्रवर्तते प्रमाणे सति तावत्कथं न प्रमाणाधीना वस्तुसत्तेति तत्राह प्रमाणप्रवृत्तेरिति यदयेदयाः पूर्वं यदस्ति तत्त
स्य कार्यं न भवति नियतपश्चाद्भाविन एव कार्यत्वादित्यर्थ: तर्हि प्रमाणप्रवृत्ते: पूर्वमेव वस्तुसत्ता नावतामिति न प्रति
ज्ञाविरोधादित्याह अन्यथेति प्रमाणे सति सत्प्रमेयं ज्ञायते इति पक्षमुपस्थापयति सत एवेति वस्तुसत्ताज्ञापकं प्र
माणमित्यर्थ: अयं भाव: प्रमाणाभावे वस्तुसत्ताऽभावमायादयितापि प्रमाणासत्त्व ॥ ॥ वक्तव्यं तत्र प्रमाणे ज्ञायते ति वस्तुसत्तेति

त्मसत्ताया व्यापकं वक्तव्यम् व्यापकाभावे स्वव्याप्याभावप्रत्यापादकत्वात् तथा च सत्तैव वस्तुतो भानमित्यत्रेदं सिध्यति
विमतमात्मप्रमाणागम्यः सत्वात् घटवदिति तदेतदनुमानं जडत्वोपाधिना दूषयति भवत्विति अनात्मनि घटादौ दृष्टं तेन प्रमा-
ति णाधीनभानं भवति प्रयोजना एवं च घटादौ साध्यसत्तासत्वात् उपाधिसत्तामप्याह अचेतनेनेति जडत्वमर्थः घटादौ जडत्वमुपपा-
दयितुं विशिनष्टि अभानस्वरूपेणेति जडत्वोपाधेः पक्षे साधनाव्याप्तिमाह स्वयमेवेति एवं प्रमाणाधीनभानं हि स्वव्यवहा-
राय स्पृश्यते स्वरूपात्मकभानेनैव स्वव्यवहारोपपत्तौ किं प्रमाणाधीनभानेन निष्प्रयोजनत्वादिति भावः ननु भानस्वरूपत्वमज-
डत्वे प्रयोजकं न चात्मा भानस्वरूपः भानाश्रयत्वात् तथा च न जडत्वमुपाधिः कथं साधनाव्यापकत्वमाशङ्क्यात्मनो भानस्वरूप-
त्वे प्रमाणं श्रुतिमाह तथा चेति तं प्रसिद्धमात्मानं भान्तं भासन्तमनुभाति सर्वमनात्मजातं न त्वयथा गच्छन्तमनुगच्छतीत्यत्रोभ-
योरपि गमनं स्वगतमेवं भान्तमनुभातीत्यत्रापि भानस्योभयगतत्वात् एवं किं न स्यादिति तत्राह तस्य भासेति तस्यात्मनः स्वरूपभूत-

भवनभानस्वरूपेणानात्मन्यचेतनेनेत्यर्था स्वयमेव भानस्वरूपे आत्मनि कथमेवं भविष्यति तथा च श्रुतिः त-
मेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति किं चात्मनि किं प्रमाणमित्यभिनिविशमानं प्र-
प्रति सर्वाणि प्रमाणानीत्यत्रोत्तरम् अज्ञातस्यैव प्रमाणविषयत्वात् ॥

याभासेत्यर्थः तथा च नाः नात्मा स्वगतभासा भास्यः किं त्वात्मभासेत्यात्माभानस्वरूपस्तु उपाधिः साधनाव्यापक एवेत्यर्थः एतावता प्र-
माणमते आत्मन्यसत्वापत्तिरिति परिहृतम् संप्रति श्रुतेस्तत्र प्रामाण्यमुपपादयितुं कैमुतिकन्यायेन सर्वप्रमाणविषयत्वमात्म-
न्याह किं चेति प्रमाणेनानात्ममात्रविषयत्वे हेतुमाह अज्ञातस्यैवेति ननु प्रमाणविषयत्वे अज्ञातत्वमप्रयोजकं ज्ञात-
स्यापि धारावाहिकप्रमाणविषयत्वदर्शनादिति शङ्कानिराकरणायैवकारः ज्ञातवस्तुनि प्रमाणं किं वस्तुप्रकाशनाय किं वा तद्व्यव-
हाराय नोभयथापि आद्यप्रमाणेनैवोभयस्यापि निर्वाहात् अन्यथा द्वितीयेऽपि तत्कथं स्यात् न चैवं धारावाहिकबुद्धेरप्रामाण्य-
म् उत्तरोत्तरक्षणविशिष्टस्य तत्राधिकस्य भानात् न च कालस्यातीन्द्रियत्वात् प्रत्यक्षज्ञानविषयत्वमिति वाच्यम् तस्य सर्वप्र- कालस्य र
त्ययवेद्यत्वात् कथमन्यथेदानीं घट इत्यादिप्रत्यक्षप्रतीतिरिति ॥ ॥ का॥ . ॥ ॥ ॥ ॥
वल्लभैशोन ३=

ॐ
वे॰ सा॰
टी॰
३१

घटस्याधि॰ =

ननु ज्ञानगोचर इति प्रतीतेरात्मनो ज्ञातत्वात्कथमात्मनैव प्रमाणाविषय इति नेत्याह आत्मन एवेति आत्मा तावत्परमप्रेमास्पदत्वात्सुख-
त्मा नत्वसुखं नित्यं स्वप्रकाशं च परामर्शत्वेन सुषुप्तौ सर्वेन्द्रियविषयाद्युपरमेऽपि भासमानत्वात् ततश्च जाग्रदवस्थायामपि न
स्यास्ति भातीति प्रतीतो प्रामायामपि योयं नास्ति न भातीत्यन्यथा व्यवहारः सोऽधिष्ठानाज्ञानजन्य इति अतस्तज्ज्ञानजन्यस्य जनव्यव-
हारे हेतुत्वात्कल्प्यते अधिष्ठानं चात्मनि विपरीतव्यवहारयोग्यत्वलक्षणमावरणमज्ञानजन्यमात्मनि कल्प्यते इत्यात्माज्ञा-
नविषयत्वादज्ञात इति एवकारव्यावर्त्यमाह जडस्य चेति नाज्ञानविषयत्वं तावज्जडस्य स्वीकर्तव्यं कथं यो हि यत्राविप्रायमा-
धत्ते स तस्य विषयः अज्ञानं च नाऽनात्मन्यतिप्रायमाधत्ते निष्प्रयोजनत्वादित्याह अज्ञानलक्षणेति ननु किमित्यावरणं निष्प्र-
आवरणस्य॰ = योजनं विक्षेपप्रयोजनत्वात्तस्येति तत्राह अंतरेति विक्षेपार्थमावरणस्य विद्यमानत्वादज्ञानजन्यमावरणं निष्प्रयोजनं दृष्टे-
त्यर्थः किं प्रयुक्तं तर्ह्यावरणं जड इति तत्राह सत एवेति अनात्मत्वप्रयुक्तमावरणमिति तेन जडस्य प्रमाणगोचरत्वादात्मैव-

आत्मन एवाज्ञातत्वात् जडस्य च सत एवावृतस्वभावस्याज्ञानलक्षणावरणान्तरकल्पनाप्रयोजनमस्त्वतयाऽज्ञानावि-
षयत्वेन प्रमाणाविषयत्वात् प्रमाणाधीनाविद्यानिवृत्तिविशिष्टात्मस्वरूपचैतन्येनैव जडस्य सर्वस्य प्रतीत्युपपत्तेः त-
था च सर्वप्रमाणासिद्धस्यात्मनः प्रमाणाभावादसत्त्वमिति साहसमात्रम् ॥

माणगोचर इति सिद्धम् न च तर्हि कथमज्ञातो
घट इति प्रतीतिः अज्ञानेन सह साक्षिणि घटस्याध्यासादिति ननु जडं जडत्वादेव न स्वतो भाति नापि प्रमाणैस्तस्य तदविषयत्वात् जडस्य॰ प्रमाण॰२
ततः कथं जडस्यानात्मनो भानमिति तत्राह प्रमाणाधीनेति यद्यपि जडं न स्वतः स्फुरति जडत्वादेव न चेत्प्रमाणैस्तस्याज्ञाना-
विषयत्वात् तथाप्यात्मस्वरूपचैतन्येन जडं भाति न चात्मचैतन्यस्य स्वप्रकाशत्वात्तत्संसर्गि जडं सर्वदैव भासेतेति वाच्यम् साक्षि-
रूपस्यात्मनोऽविद्यावृतत्वेन प्रपंचाभानोपपत्तेः तर्हि कदापि प्रपंचो न भायादिति चेत्तत्राह प्रमाणाधीनेति घटावच्छिन्नचिदात्मा
घटेन्द्रियसन्निकर्षसमुद्भूतघटाकारान्तःकरणवृत्तिनिरस्ताविद्यो घटावच्छिन्नवृत्तौ प्रतिबिंबितो घटं भासयतीति घटप्रतीत्युपप-
त्तिः एवं घटादिप्रतीतिरप्यूह्या ननु एवं घटस्य प्रमाणविषयत्वापत्तिरिति चेन्न अज्ञाननिवृत्त्यात्मकविषयस्य प्रमाणाविषयत्वा-
त् नावृतत्वं च घटावच्छिन्नचिदात्मन एवेति चिदात्मैव सर्वत्र प्रमाविषयः घटस्त्वनावृतस्यावच्छिन्नचिदात्मनाध्यस्तो भातीति कथं त-
स्य प्रमाणविषयत्वमिति तथा चात्मनि प्रमाणाभावेनासत्त्वापत्तिचोद्यं परिहृतमिति चिदात्मनि सर्वप्रमाणाविषयत्वनिरूपण-
साफल्यमाह तथा चेति आपादकप्रमाणासत्त्वस्याभावान्नाधा-
यासत्त्वस्यात्मनि संभवोऽस्तीत्यर्थः ॥ ३१

गा॰२ प्रमाण३

आत्मनः सर्वप्रमाणविषयत्वेऽप्यौपनिषदत्वविशेषणव्याहतिं शंकते कथमिति नन्वप्रमेयो ध्रुवश्चेति वद्विशेषणोपपत्तिरिति तेनेत्याह स
र्वेति सर्वविशेषणं मावधारणाभिविन्यासाद्युपरंजकत्वमात्रकल्पनायां फलाभावेनाध्ययनविधिविरोधादन्यप्रमाणव्यावर्त्तकत्वमेवात्मन्यौप
निषदत्वविशेषणस्य वक्तव्यम् तच्च सर्वप्रमाणविषयस्यात्मनो न संभवतीत्यौपनिषदत्वविशेषणमात्मनः कथं युज्यते अपि तु न कथमपी
त्यर्थः तदेतद्दूषयति नेति परिपूर्णेति यद्यपि प्रपंचावच्छेदेनात्मनः सर्वप्रमाणविषयत्वं तथापि परिपूर्णादिरूपेण मानांतराणामगो
परिपूर्णेत्याद्यात्मनः चरत्वात्तेन रूपेणात्मनः श्रुतिमात्रगम्यत्वादौपनिषदत्वविशेषणं न विरुध्यत इत्यर्थः परितः सर्वतः पूर्णोऽनवच्छिन्नः चिदपि स्वतन्त्रतया च निरवग्रहं स
हदिति नन्वतादृशस्यौपनिषदत्वेऽपि श्रुतत्वान्मिथ्यात्वमिति तेनेत्याह सदिति श्रुतिभासत्वात्संशतिपन्नेनेमिथ्येत्यर्थः कथं तर्हि तद्भा
सतेऽतिस्वप्रकाशाच्चिदाकारत्वादित्याह चिदिति ननु परिपूर्णस्य सर्वात्मकत्वात् दुःखात्मकत्वमपि वक्तव्यम् तथा च कथं तदुप
निषद्विषयोऽपुरुषार्थत्वादिति तेनेत्याह आनंदेति नहि परिपूर्णविशेषणेनात्मानमदिति सर्वत्वं विधीयते येनात्मनि दुःखात्मकता

कथं तर्हि दृश्यौपनिषदत्वमात्मनः सर्वप्रमाणविषयस्यौपनिषन्मात्रगम्यताभावादिति चेन्न परिपूर्णसच्चिदानंदप्रत्यग्रू
पेण मानांतराविषयत्वादौपनिषदत्वमिति वदामः ननु स्वयंप्रकाशमानस्याज्ञानविषयत्वानुपपत्तिरित्युक्तं सत्यं व
स्तुतस्तथैव ॥

स्यात् किंतु सर्वैर्देशैर्नात्मत्वं न तस्य सर्वस्यात्मैव रूपं नान्यद्रूपमस्तीति दुःखनादिरूपस्य मिथ्यात्वेन बाधादानंदो ब्रह्मेति श्रुतेरात्मानंद
मय इति पुरुषार्थत्वात्कर्मौपनिषदत्वमिति तथापि न पूर्णतात्मनः जीवाद्भेदेन परिच्छिन्नत्वादिति तत्राह प्रत्यग्रूपेणेति
प्रत्यगभिन्नस्य ब्रह्मतया न भेदः कल्पितश्चेति प्रत्यग्ब्रह्मणोरैक्यमुपनिषन्मात्रविषय इत्यर्थः नन्वुपनिषज्जन्यज्ञाननिवर्त्या
ज्ञानविषयत्वमुपनिषद्विषयत्वं न च स्वप्रकाशचिदात्मन्यज्ञानविषयत्वं संभवति भासमानत्वाभासमानत्वयोरेकदैकत्र विरो
धादिति पूर्वपक्षोक्तदोषमनूद्य तमनुवदति नन्विति सर्वं पूर्वपक्षमंगीकरोति सत्यमिति तर्हि कथमज्ञानविषयत्वमित्याशं
क्यानंदादिरूपेण ज्ञानविषयत्वं न चिद्रूपेण ज्ञानविषयत्वं चिद्रूपस्यान्यथा ज्ञानस्याप्यसिद्धिप्रसंगादिति परिहारस्य प्रौढोक्त
त्वेऽपि प्रकारांतरेण परिहरति वस्तुतस्त्विति अयमर्थः स्वप्रकाशे ज्ञानमुक्तदोषाद्वस्तुतो नास्ति तत्भ्रमादपि नास्ती
त्यभ्यायुपस्तथाह वस्तुतस्त्विति इष्टापत्तेर्नेदमनिष्टमित्यर्थः ॥ ॥

विषयत्वेतिशेषः ।=

उल्लूकादि

द्वितीयं दूषयति तथापीति तमसश्चादित्यस्य तत्तासंभवप्रदर्शनाय स्वयंप्रकाश इति विशेषणम् कल्पने हेतुमाह दिवां
धा इति यथा दोषवशाद्विद्यमानमपि रजतं शुक्तौ कल्पयंतितथेदमपि न चांधत्वदोषाद दर्शनमेवोलूकानां नत्वादित्येपित
मः कल्पनमिति वाच्यम् तमोमयो यं सवितेति तेषां प्रतीतिविरोधात् यथाहुः घनच्छन्नदृष्टिः घनच्छन्नमर्कं यथा मन्यते
निष्प्रभं चातिमूढ इति मूढेति मूढाइत्यर्थः न चात्मनोऽज्ञानावृतत्वकल्पनेऽज्ञानस्यैव दोषत्वे आत्माश्रयापत्तिरिति वा
च्यम् आवरणस्याज्ञानकार्यत्वेनाज्ञानजन्यत्वेप्यात्माश्रयाभावात् अथावरणमज्ञानमेव तथा चात्माश्रय इति एव
मपि नात्माश्रयः समवायवद्भेदवदुपपत्तेः न चात्मनि वेदांतप्रवृत्तिर्भानायाज्ञाननिवृत्तये वा नाद्यः मिथ्यात्वापत्तेः
न द्वितीयः तस्यानादित्वेनात्मवन्निवर्त्यत्वानर्हत्वादिति तत्राह अनत इति एवंभूतस्यैतस्य व्याख्या कल्पितस्येति अथ

अज्ञानस्य

तथापि यथा मध्यंदिने ज्वलिन्नपि सवितरि स्वयंप्रकाशे दिवांधाः पेचकादयः तमसावृतोयं सवितेति कल्पयं
ति तथा तत्तन्मूढबुद्धयोऽज्ञानेनावृतोयमात्मेति कल्पयंति अत एवंभूतस्यात्माज्ञानस्य कल्पितस्य दृष्टस्यैवमे
वात्ममाहात्म्यादेव वृत्त्यतो निवृत्तस्याः सतो निवृत्तये सर्वे वेदांताः प्रवृत्ताः स्वयंप्रकाशरूपे आत्मन्यज्ञाननि
वृत्तिव्यतिरेकेण फलांतराणि रूपणात् ॥

अज्ञानस्य

वा ऽऽवरणरूपस्य तस्याज्ञाननिवृत्तियोग्यतासंपादनाय कल्पितस्येति वि
शेषणम् कल्पितत्वं संपादयति आत्मेति निवृत्तस्यासत इति यथा शुक्तिस्वरूपपर्यालोचनया ज्ञानं तत्रासदित्य
र्थः नाऽनादिमात्रं निवर्त्यत्वानर्हत्वप्रयोजकं प्रागभावे व्यभिचारात् भावत्वे सत्यनादित्वं नित्यत्वप्रयोजकमिति चेन्न भा
वत्वानंगीकारात् असद्विलक्षणत्ववत्सद्विलक्षणस्यापि स्वीकारात् अत एवाज्ञानं विशिनष्टि कल्पितस्येति ननु कि
मित्येवं कल्प्यते प्रमेयप्रकाशस्यैव प्रमाणकृतत्वादिति तत्राह स्वयंप्रकाशरूपे इति आत्मप्रकाशस्य प्रमाणव्यति
रेकेपि स्वप्रकाशमाहात्म्यादेव सिद्धत्वान्न निमित्तप्रमाणापादनवैयर्थ्यात् अज्ञाननिवृत्त्यर्थमेव प्रमाणोपपादनमि
त्येवं प्रयुज्यतेऽस्यार्थः ॥

रजतं तत्र ज्ञानाभिलषितया त्मस्वरूपपर्यालोच नया

तत्वात्मनिष्ठज्ञाननिवर्तकवेदान्तानां नात्मविषयितामन्निष्टघटादिनिवर्तकपाषाणादेरपि तद्विषयत्वापत्तेरिति तत्राह तदाकारे
ति आत्माकारवृत्त्युत्पादकत्वेनैव वेदान्तानामात्मविषयत्वमित्यर्थः ननु स्वयंप्रकाशे प्रमाणाकृत्यमसत्त्वान निष्ठज्ञप्तिर्विना तेरनुक्तं तदयु
क्तम् आत्मनः स्वयंप्रकाशत्वे प्रमाणाभावाद्विप्रतिपत्तेरिति तत्राह नचेति प्रमाणसत्त्वाच्च विप्रतिपत्तिरिति तत्राह तथाहीति २
इतरत्नापेक्षत्वे इतीनयानपेक्षः सचासौ प्रकाशश्चेति इतीनयानपेक्षप्रकाशश्चात्मेत्यर्थः प्रकाशाव्यभिचारित्वं प्रकाशव्याप्तत्वं ज्ञा
नसुखप्रकाशघटादिनं प्रतिदृष्टान्तः संविद्वदिति नयायिकादीन्प्रतिदृष्टान्तमाह आलोकवदिति ननु कस्मात्सापक्षः किमना
यतीतः उतकृतनिभाको नाद्यः परप्रत्याश्रयासिद्धेः नेतरः वादिनं प्रत्यभावात् नहि कतौर भोकारमात्मानं वेदान्तिनो मन्यन्ते किं
चपतीकृत आत्मा प्रमाणसिद्धो वाप्रमसिद्धो वास्वप्रकाशतया सिद्धो वाप्रसिद्ध एव वा नान्त्यः प्रसिद्धस्य पक्षत्वादर्शनात् नाद्यः प्रमा
णसिद्धस्य स्वप्रकाशत्वसाधनेवाधात् नद्वितीयः भ्रमसिद्धस्याभासतया तदीयानोध्याभासत्वप्रसंगात् नतृतीयः स्वयंप्रकाशमा
नतया इदानीं साध्यमानत्वात् किंचेदमितरानपेक्षस्वप्रकाशत्वसाध्यमानं इतरत्वापेक्षानेयः स्वप्रकाशस्तदात्मकत्वं तदुत्वं वा साध्य
स उभयत्रापीतरानपेक्षत्वं प्रकाशस्यात्मनो स्वप्रकाशनेवा आद्ये उत्पत्त्याविनानपेक्षप्रकाशात्मकत्वे साध्ये न स्वप्रकाशत्वमात्मनः ८

तदाकारवृत्त्युत्पादनेनैव वेदान्तानां तद्विषयत्वोपपत्तेः नचात्मनः स्वप्रकाशत्वे विप्रतिपत्तिः तथाहि आत्मा इतरान
पेक्षप्रकाशः स्वसत्तायां प्रकाशाव्यभिचारित्वात् संविद्वदालोकवद्वा ॥

सिध्यति द्वितीये दृष्टान्ते आलोके साध्यवैकल्यम् प्रकाशेनेतरानपेक्षप्रकाशो वा ह्यालोके भास्वररूपं न तदात्मकत्वं दृष्टान्तालोकस्य रू
पिलोकेनायोगात् द्वितीयेनतरानपेक्षप्रकाशवत्त्वेनात्मनः स्वप्रकाशत्वसिद्धिः स्वप्रकाशप्रकाशवत्त्वस्यैव सिद्धेः संविद्वदित्यादृष्टे
ते साध्यवैकल्यं च नहि संविज्ञानटकर्तिविदती प्रकाशाव्यभिचारित्वं च हेतुरात्मनि किं यत्र तत्र इतिवाच्यम् प्रकाशाव्यभिचारित्वं हि
प्रकाशव्याप्तत्वं व्याप्तिश्च यत्र देशे आत्मा तत्र प्रकाश इति वा यदात्मा तदा प्रकाश इति वा नोभयथापि आत्मनो देशतः कालतो
नवच्छिन्नत्वाच्च स्वसत्तायामिति हेतुविशेषणं व्यर्थम् परप्रकाश्ये घटादौ प्रकाशाव्यभिचारित्वाभावात् नच ध्वस्ते प्रदीपे
प्रकाशरहिते साधनवैकल्यपरिहाराय स्वसत्तायामिति विशेषणमिति वाच्यम् तत्र हेतोरसत्त्वादव्यभिचारात् साध्यनेकदेशप्ट
त्तेरपि हेतुत्वदर्शनात् सुखादावनैकान्तश्चायं हेतुः तस्य स्वसत्तायां प्रकाशाव्यभिचारित्वात् तमो विरुद्धत्वं चात्रोपाधिः नचात्म
नि साधनव्याप्तिः तस्य तमः साधकत्वेन तमोविरुद्धत्वाभावात् निदर्शनद्वयं च साधनविकलं नहि देशतः कालतो
वा प्रकाशसामानाधिकरण्यं संविदालोकयोः संभवति संवित्स्वप्रकाशत्वे ॥

Left margin notes: प्रतिज्ञा सर्वं पक्षं वेदान्ते नप्रतिष्ठ / प्र ४६ / आलोकः रूपी २ / इतरानपेक्षत्व =

Right margin notes: वर्तमानस्य रू = / भास्वररूपम् = १ / ध्वस्ते प्रदीपे ४ =

आत्मनः त्र =

सुखादेः स्वसत्तायां प्रकाशाव्यभिचारित्वेऽसत्यपि इतरा विशेषणं विनापि घटादिनिरासः संभवति घटादेः प्रकाशाव्यभिचारित्वात् तन्निरासार्थमेव विशेषणम् = १२
नपेक्षप्रकाशाभावादनैकान्तः २ =

भास्वररूपस्य २=

ॐ वेस॰ टी॰ ३३

विदतिरिक्तप्रकाशाभावेन संविदः प्रकाशसामानाधिकरण्यायोगात् आलोकस्यापि भास्वररूपाख्यप्रकाशसामानाधिकरण्याभावात्
तस्यालोकधर्मत्वादिति नच यदालोकस्तदा प्रकाश इति कालकृतं सामानाधिकरण्यमालोकप्रकाशयोरस्त्येवेति वाच्यम् क्षण
मगुणं द्रव्यं तिष्ठतीति न्यायविरोधात् तस्मादसदेतदनुमानमिति तदसत् तथाहि यत्तूक्तमात्मेत्यादि तदसत् आत्मश
ब्दार्थस्य पक्षत्वात् यदपि प्रमाणासिद्ध इत्यादि तदयुक्तं हि सिद्धस्यैव पक्षत्वात् प्रमाणादिविशेषणस्यासमर्थत्वात् यदपि साध्य
वैकल्यं किं चेत्यादिना तदप्यसत् प्रकाशनेतरानपेक्षत्वाय प्रकाशस्तदात्मकत्वस्यैव पक्षत्वात् न च दृष्टान्ते आलोके साध्यवै
कल्यं तत्रापि प्रकाशस्यालोकातिरिक्तस्यानङ्गीकारात् नहि प्रकृष्टप्रकाशः सूर्यो इत्यत्र चंद्रप्रतियोगिकापेक्षिकः प्रकाशः त
थात्वप्रकाशात्त्रवैयधिकरण्यप्रसंगात् न च भास्वररूपप्रकाश इति तत्रापि रूपरूपिणोस्तादात्म्यस्यैव स्वीकारेण दृष्टा
न्ते साध्यवैकल्याभावात् समवायस्य निर्वक्तुमशक्यतया नैयायिकैरपि तथैव स्वीकरणीयत्वात् यत्तु हेतुदूषणं प्रकाश
व्यभिचारित्वं च हेतुरित्यादि तदप्यसत् यावत्प्रकाशकालविद्यमानत्वस्यैव हेतुत्वात् नचात्मनि कालानवच्छेदश्चेति वाच्यम् आ
त्मत्वशान्तरवच्छेदस्याप्युपपत्तेः न च सुखादावनैकान्तः यावत्प्रकाशकालं सुखादेरसत्त्वात् नहि सर्वस्मिन्काले दुःखादिरस्ति स्व

तस्मात्स्वयंप्रकाश आत्मेत्यभिप्रेत्योक्तं ज्योतिरिति ॥

स्यात्मत्वेन पक्षत्वात् न च तत्रानैकान्तिकत्वमपि अत एव ज्ञानसत्त्वपक्षे सदादावनैकान्तिकत्वं हेतोः परास्तं सादिभासस्य चक्षु
र्देर्यावत्सादिस्थित्यनङ्गीकारात् न च तमोविरुद्धत्वमुपाधिः साधनव्यापकत्वात् न च तमः साधके ततमो विरुद्धत्वं स्वरूपेण त
मोविरुद्धस्यापि कल्पनयात् साधकत्वोपपत्तेः नहि कल्पवास्तवकाल्पनिकरूपेण तः तथा सति भ्रमोच्छेदायत्तेः न च निदर्शनसाध
न विकल्पे यावत्प्रकाशकालं विद्यमानत्वस्याभयत्रापि विद्यमानत्वात् नहि सविदपरोक्षा भाति मध्य च नास्तीति संभवति न चालो
कः प्रकाशने मध्य नास्तीति युक्तिमत् न च भास्वररूपमालोकप्रकाशः न च तस्य यावती स्थितिः तावत्कालमालोकोपि तिष्ठति
निराश्रयो गुणः क्षणं तिष्ठतीति स्वीकारात् गुणिनाशस्य गुणनाशप्रतिहेतुत्वादिति वाच्यम् उपादाननाशस्यैवोपादेयनाशप्र
तिहेतुत्वात् न चालोको भास्वररूपस्योपादानम् तयोस्तुल्यकालत्वात् तादृशे सव्येतरविषाणवदुपादानोपादेयभावान
भ्युपगमात् किं तर्हि तदुपादानं आलोकावयवाः तर्हि कथमालोकोरूपवानिति उपादानरूपे गौणोपादेयस्य रूपत्वोपपत्तेः त
योरभेदात् तत्तेनदनुमानविषयत्वमात्मनोस्ति न वा न चेत्कथं तस्य स्वप्रकाशत्वं अस्ति चेत्तथापि कथं स्वप्रकाशत्वमेतत्वान
विषयत्वादेवेति चेन्न एतदनुमितिनिवर्त्याज्ञानविषयत्वस्यैव तदनुमानविषयत्वेनैतदनुमानभास्यत्वमिति न स्वप्रकाशत्वं क्ष
तिरिति एवं निरवद्यानुमानसिद्धमात्मनः स्वप्रकाशत्वमभिप्रेत्य तस्मादिति उक्तेर्थे दृष्टद्वयमित्याययशः स्वयंज्योतिरितिविशे

अत्र दृष्टान्तमालोकः भास्व
रारव्यः प्रकाश इत्युक्तं इति २=

साध्यत्वात् २४

तमः ३

निदर्शनद्वयेपि ४=

भास्वररूपस्य ५=

भास्वररूपालोकयोः ३=

विसं॰ टी॰ ११ ... ३३

नन्वात्मत्वप्रलोपादसंदोपचाराद्धावस्थतः पदश्रुतिवज्ज्योतिरात्मानमितिप्रयोगो न तद्भेदादिति तत्राह सैन्धवघनवदिति अयमर्थः वि
ज्ञानं तावत्प्रकाशात्मत्वात्तमोविरुद्धत्वाज्ज्योतिःपदवाच्यम् विज्ञानं चात्मैव विज्ञानघनश्रुतेः घटज्ञानयोः संबन्धस्यात्मनिष्ठः ज्ञाननिष्ठत्वा
त्तत्त्वाद्वदित्यनुमानाच्च तथाच विज्ञानैकरसस्वभावत्वात्स्वयंज्योतिः स्वरूप एवात्मा तत्स्वरूपविनिश्चित्यतिश्लोकेनान्वयः नन्वस्य स्वयंज्यो हर्ड ३x
आत्मनि ४= तिः स्वरूपस्य चेदात्मा नाहि तत्रानुमानेनायत्नासोऽनुचितः उपनिषन्मात्रगम्यत्वादिति चेत्तत्राह तथाचेति अनुमानेन संभावितेस्मि ८
आत्मनि ५= तिश्रुतिर्विद्वत्प्रमाणेन तत्र प्रमाणमित्यर्थः श्रुतिमुदाहरति अत्रेति अत्र स्वप्नावस्थायां स्वमेव तावदात्मा प्रकाशते इति संशतिपन्न
बाह्येन्द्रियस्य ३= म तत्प्रकाशनं न तावद्बाह्येन्द्रियाणां तस्यात्मन्यप्रवृत्तेरुपरमाच्च नापि मनसः तस्य रथादिरूपेण परिणतत्वात्परिशेषात्स्वयंज्योतिरात्मे
त्यर्थः ननु सर्वीकानुमानं वा श्रुतिर्वा नात्मनः स्वप्रकाशतां प्रतिपादयितुं समर्थेति प्रत्यक्षादनुमानविरोधेनायोग्यत्वादिति शंक
ते तन्नेति आत्मा न स्वप्रकाशः ज्ञातत्वात् अनात्मवत् तथात्मा न स्वयंप्रकाशः अज्ञातत्वात् घटवदिति अत्रानुमानद्वये हेत्वोः ८

सैन्धवघनवद्विज्ञानघनैकरसस्वभावतया स्वयंज्योतिः स्वरूपमित्यर्थः तथाच श्रुतिः अत्रायं पुरुषः स्वयंज्योतिर्भवतीति न
नु कदाचिदात्मानमहं जानामीत्यनुभवः कदाचिदात्मानमहं न जानामीत्यनुभवः तथाचैतद्द्वयानुभवबलोपस्थापितज्ञात
त्वाज्ञातत्वाभ्यां स्वयंज्योतिष्ट्वमात्मनो विरुध्यते तथाहि यदात्मानमहं जानामीत्यनुभवानुरोधेन ज्ञातत्वं ज्ञानक
ननु स्वप्रतिपत्तानुमानद्वयेपत्तीकृत आत्मा विशिष्टो वा शुद्धमेव वा नाद्यः विशिष्टता मेतमात्मनः स्वीक्रियते।।
देव तस्य स्वप्रकाशत्वाभावात् द्वितीये हेत्वोः स्वरूपासिद्धिः तस्य विदितोऽस्पते नपक्षत्वासिद्धाहेत्वोः स्वरूपासिद्धिरित्याशयेन तत्राह प्रमाणाभ्यामिति = १ = हेतुभ्याम् = १
विदितx १ पर्याप्त० स्वरूपासिद्धिमापूर्यमप्रमाणाभ्यामपदेहेतु साधयति कदाचिदित्यादिना पूर्वोक्तहेतुमानाभ्यामात्मनि प्रसाध्य तद्व्याप्तेन ताभ्यामा
त्मनि स्वयंप्रकाशत्वनिषेधं श्रुतिर्जानीते तथाचेति नन्वात्मनि ज्ञातत्वमात्मानमहं जानामीत्यनुभवसिद्धमपि न स्वप्रकाशत्वनिषे
धायालं ज्ञाननिवर्त्यज्ञानविषयत्वरूपस्य ज्ञातत्वस्यात्मनि स्वप्रकाशत्वेप्यविरोधादित्याशंक्य प्रमानुसंग्रहवाक्यं विवृणोति न मानत्र x
च्छतीति ज्ञातत्वं तावदात्मनि पूर्वोक्तानुभवबलेनावश्यं स्वीक्रियते यदि स्यात् तर्हि ज्ञातत्वमसरक्तमस्तु तथाच न स्वप्रकाशत्वनि प्रभx
षेधसिद्धिरिति तत्राह ज्ञानकर्मत्वमिति अयमत्राशयः ज्ञातत्वं ज्ञानानिवर्त्यज्ञानविषयत्वमभावाभावयत्रापि ज्ञातत्वमवशिष्टं संगतिप आत्मनि घटेच ३=
न्न नचवेदान्तिमते घटे ज्ञाननिवर्त्यज्ञानविषयत्वरूपं ज्ञातत्वं संभवति घटादेर्जडस्याज्ञानाच्छन्नत्वानंगीकारान्नज्ञानभासत्वे विरो ८
धाभावाच्च न च ज्ञातत्वमात्मन्यन्यदन्यद्घटादाविति युक्तं ज्ञातपदस्यानेकार्थत्वप्रसंगात्तस्य चान्याय्यत्वात्तस्माज्ज्ञानभास्य
त्वमेव ज्ञातत्वमिति ॥॥

ॐ भवत्येवं किं न नस्तत्राह तदेति तथा च सर्वेषां स्वप्रकाशत्वनिवृत्तिसाधकमनुमानमस्त्वेवमित्यर्थः ननु ज्ञानकर्मत्वमस्त्वस्तु
वे॰मु॰ च स्वप्रकाशत्वे को दोषस्तत्राह तदेव हीति स्वप्रकाशत्वज्ञानकर्मत्वयोरेकत्रादर्शनात्स्वप्रकाशत्वे ज्ञानकर्मत्वमेव न स्यादित्यर्थः नन्व
टी॰ ३४ ज्ञानकर्मैव स्वप्रकाशमिति चेद्व्यतिरेक इति तत्राह अन्यथेति परिभाषामात्रमिदं न यौक्तिकं विरोधादित्यर्थः नन्वप्रमेयमिति श्रुतेः कथं
तस्य ज्ञानकर्मत्वमित्याशंक्य द्वितीयहेतुं संग्रहवाक्यं विवृणोति यदि च मामित्यादिना श्रुतिविरोधात् मामहं जानामीत्यनुभवविषय न४
त्वानात्मविषयत्वेनाप्युपपत्तेः अनीशया शोचति मुह्यमान इति श्रुतेर्मामहं न जानामीत्यनुभवाच्चाज्ञातत्वमेव स्वीक्रियतामित्य
थ अस्त्वज्ञातत्वं तत्स्वप्रकाशत्वविरोधि घटादावस्वप्रकाशे दृष्टत्वात्तत्त्वाहंतैकरूपेणाज्ञानविषयत्वं लक्षणाज्ञातत्वाभावादिति
तत्राह तथापीति आत्मन्यज्ञातत्वस्य स्वीकृतत्वेऽपीत्यर्थः मामहं न जानामीतिवत् घटमहं न जानामीत्यनुभवाविशेषाद्स्वरूपं यदा

तदात्मवत्स्वयंप्रकाशत्वानुपपत्तिः तदेव हि स्वयंप्रकाशं नाम यत्केनापि रूपेण कस्यापि ज्ञानस्य कदाचिदपि कर्मतां
न भजते अन्यथा पारिभाषिकमेतत्स्वप्रकाशत्वं स्यात् यदि च मामहं न जानामीत्यनुभवानुरोधेनाज्ञातत्वमेव
स्वीक्रियते तथापि स्वयंज्योतिष्ट्वहानिः न ह्येकस्मिन्नेव वस्तुनि युगपज्ज्ञानं न भाति चेत्यनुभवितुं शक्यं विरोधात्
न हि यदा भाति तदानीमेव न भात्यनुभवः यदा न भाति तदानीं वा भातीति तत्कथं स्वयंज्योतिष्ट्वमात्मन उपपद्यत इति

दाव ज्ञातत्वं स्वीकर्तव्यम् घटादावप्रकाशत्वमुभयमिदं तथा चाज्ञातत्वमस्वप्रकाशत्वेन व्याप्तमात्मनि दृश्यमानं तत्स्वप्रका
शत्वस्य हानिमावहतीत्यर्थः ननु स्वयंप्रकाशत्वं नाम स्वयमितरनिरपेक्षतया भासमानत्वं अज्ञातत्वं चाभासमानत्वं तच्चाभासमानत्वं न
न२ त्वं भासमानत्वविरोधि घटादौ कदाचिद्भासमानत्वस्यापि दर्शनादिति तत्राह नहीति यद्यपि घटादावुभयमस्ति तथापि न युगपत् भा
समानत्वस्य कार्यत्वेन कादाचित्कत्वात् आत्मनि तु युगपदुभयं स्वरूपप्रकाशस्यानादिभावत्वान्नित्यत्वात् ज्ञानस्यानादित्वेनाका-
र्यत्वात् ततश्च युगपदुभयं विरुद्धमात्मनि न संभवति अज्ञातत्वं चात्मन्युभयवादिसिद्धम् ततश्चात्मन्यज्ञानकाले भातीत्येवं स्व
रूपप्रकाशमानत्वं विरोधात्त्वानुभवितुं शक्यमित्यर्थः विरोधं स्पष्टयति नहीति एवं पक्षमुपसंहरति तत्कथमिति तदित्य
व्ययं सर्वोपयादि तज्ज्ञातत्वाज्ञातत्वलक्षणोऽहंतद्वयपरामर्शात्तस्मादित्यर्थः ॥ ॥

२५

नेदं तद् दूषयति नैषइति अनुमानेऽसत्प्रतिपक्षत्वं अज्ञातत्वे योग्यता अनुमानविरोधादिश्चैवं लक्षणे दोषः एतच्छङ्कार्थः अनुमानस्या
भासत्वादिति भावः आभासत्वमुपपादयितुं तेनेति प्रतिज्ञायां हेतुमाह ज्ञातेति अनुमानेऽपक्षीभूते आत्मनि ज्ञाताज्ञातत्वं न वर्तते आत्म-
अज्ञातत्व न्यज्ञातत्वं हि लक्षणत्वादित्यर्थः परस्परविरोधेन प्रकारान्तरस्थितिर्विनिन्यायात् कथमुभयविलक्षणत्वमात्मनः इति तत्राह तथा चेति
अधिउपरि अन्यदित्यर्थः अनुमितिविरोधन्यायस्याभासत्वादित्यर्थः ननु प्रमाणं विनाऽकृतोऽन्याय आभासतो भजते अयं तत्त्वात्यया
त्मानं जानामीति प्रमाणं सहकृत्य तु इति कथमाभासत्वमिति प्रश्नः इत्यत आह आत्मानमिति अनात्मविषयोऽयमनुभवो न तु निरूपणीयात्म
ता तत्त्वमनुभावयतीति परिहरति विशिष्टेति न नयमनुभवः किं विशिष्टमात्मानं विषयीकरोति किमज्ञानमहंकारविशिष्टं वा नाद्यः अज्ञानविशिष्टमित्यर्थः ३
आत्मानमहं जानामीत्यत्राज्ञानास्फुरणात् न द्वितीयः आत्मानमहं जानामीत्यहंकारस्य कर्तृत्वेन स्पष्टमवभासनात् तस्मादात्मानं जा
नामीत्यनुभवो न विशिष्टविषयः इति तत्राह नहीति अयमत्रार्थः न तावदयं निर्विकल्पकः प्रत्ययः किंचिदित्येवहि निर्विकल्पक

नैष दोषः ज्ञाताज्ञातविलक्षणस्यैवात्मत्वात् तथा च श्रुतिः अन्यदेव तद्विदितादथो अविदितादधीति आत्मानमहं जाना
मीत्यनुभवस्य काऽगतिरिति चेत् विशिष्टविषयत्वमेव न ह्येतस्मिन्ननुभवे निर्विकल्पकमज्ञानानात्मद्व्यावृत्तं वस्तु
स्वरूपमात्रं भातीत्यनुभवः येनात्मनो ज्ञानकर्मत्वं भवेत् अपि तर्ह्युपाधिविशिष्टमेव तस्य च ज्ञानकर्मत्वेऽप्यविरोधः

विशिष्टस्य
काचः शङ्केत युक्त्या यत् न चात्र तथात्वे युक्त्यादनं आत्मानमित्यात्मशब्देन ज्ञानाकारत्वं युक्त्यादनात् मानसं चैतज्ज्ञानं येरैक्यते मनः
सोंद्रियस्य द्व्येऽपि इहत्वं निर्गुणोपयोगिणं गुणाश्चाहंकारादिरहं खादेः पराग्न्वरतेन येन याज्ञिकादिवदात्मनः स्वतोऽस्माकं अपि तु उपाधिं विना २
अंतःकरण २ दुःखाद्युपादानोऽतः करणतादात्म्यात् तत्तादात्म्यं च ना ज्ञानं विना तथा चात्मानमहं जानामीत्यनुभवबलादेवाज्ञानतादात्म्यं दा
दिविशिष्टं भाति तस्यैव स्वरूपं निर्विकल्पकत्वापत्तेः ततो विशिष्टमेव ज्ञानकर्म न स्वरूपमिति ननुभवतताऽहंगनुभवे
विषयो विशिष्टस्तथापि ज्ञानकर्मत्वं न प्रत्यते आत्मत्वात् न हि कुण्डली देवदत्तो न देवदत्त इति तत्राह तस्य चेति तस्य विशिष्ट
स्य स्वप्रकाशत्वे विशेषणस्यापि स्वप्रकाशत्वापत्तेः विशिष्टधर्मस्य विशेषणाद्ववृत्तित्वनियमात् ततो विशिष्टं ज्ञानकर्म न स्वप्र
अज्ञानसं १ काशमविरोधादित्यर्थः ॥ ॥

अज्ञानस्य= अज्ञानं

ॐ ननु विशेषणांशस्यापि देहाद्यपेक्षयांतरत्वेनात्मत्वान्नेदमपि प्रकाशं स्यादिति तत्राह नहीति आंतरत्वमात्मत्वेन प्रयोजकं किंतर्हि जडविरु
वे॰सू॰ द्धत्वेन चिद्रूपत्वम् अज्ञानादेश्च न चिद्रूपत्वं विरुद्धहेतुत्वात् तथा चानात्मत्वमज्ञानादेः ततो न स्वप्रकाशत्वं तदिति ननु विशिष्टस्यास्वप्रका
टी॰ ३५ शत्वे विशेष्यस्यापि ज्ञानकर्मत्वं तस्यात्मांशेऽपि परप्रकाश्यत्वमिति तत्राह शुद्धस्यैवेति विशेषणे हीति न्यायेन विशेषणानिरस्कारे
शुद्धात्मापत्तेः तत्त्वज्ञानत्व णस्य शुद्धं विशेष्यमात्रं स्वप्रकाशं आत्मत्वान्न विशिष्टं तस्य कल्पितत्वेनानात्मत्वादित्यर्थः ननु ज्ञानत्वानुभवो विशिष्टविषयो न
विरोधेहेतुनोक्ति ५= स्यात् स ज्ञानकर्मत्वं स्यादकरतिप्रसक्तानुमाने स्वरूपासिद्धिरिति स्थिते विशिष्टज्ञानत्वानुभवेन विशिष्टविषयः संभवति विशेषणा
अज्ञानत्व ३= स्याज्ञानस्य तेनानुभवत्वेन तद्विशिष्टस्याज्ञातत्वाभावात् अज्ञानविशिष्टस्याज्ञातत्वे आत्माश्रयप्रसंगात् अज्ञानविषयं स्वात्मा
अज्ञानं=३ ज्ञातत्वादिति शुक्तेः अनीशया शोचति मुह्यमानः नीहारेण प्रावृता इत्यादिश्रुतेश्च शुद्धात्मन्येवाज्ञातत्वम् ननु कथं त
अज्ञानत्वानुमानं त्स्वरूपासिद्धमित्याशंक्याह मामहमिति यद्ययमनुभवः अज्ञातत्वं शुद्धे आत्मनि व्यवस्थापयति तथापि विनास्वप्रका

नहि तस्य स्वयं प्रकाशत्वमस्ति शुद्धस्यैवात्मनः स्वप्रकाशकत्वांगीकारात् मामहं न जानामीत्यनुभव आत्मनः स
प्रकाशत्वसाधक एव तथाहि अयं स्वानुभव आत्मविषयाज्ञानं विषयीकरोति तथा चैतस्मिन्ननुभवे ज्ञान
वदात्मापि भातीति वाच्यम् अन्यथा न जानामीत्येवं तदाकारः स्यात् ॥ ॥

आभासमानत्व २= स्वप्रकाशत्व १= न स्वप्रकाशत्वविरोधि=१

शत्वमात्मन्यज्ञातत्वं बोधयितुं न शक्नोतीति अज्ञातत्वं न स्वप्रकाशत्वविरोधि किंतु तदुपपादकमित्यप्रयोजकमित्यर्थः
ननु ज्ञातत्वं नाम स्वप्रकाशत्वाभावरूपमभासमानत्वं तद्ग्राहकं च प्रमाणं कथं स्वप्रकाशत्वसाधकमतिप्रसंगादित्याशं
क्याह तथाहीति विशिष्टज्ञानं चेदं न तु विशेष्यमज्ञातत्वं तच्च विषयनिरूप्यमिति विषय आत्मा अज्ञातत्वव्यावर्तकत्वा
द्विशेषणं अत आत्मापि विशिष्टज्ञाने भाति विशिष्टज्ञानस्य विशेषणविषयत्वनियमादाह तथा चेति नन्वज्ञातत्वमात्म
विषयमवभासयदपि प्रमाणमात्मानं न विषयीकरिष्यति आत्मनस्तत्रोपलक्षणत्वादिति तत्राह अन्यथेति काकवतो देव
दत्तगृहादित्यत्र केचिदतिशयमन्तरेणापि देवदत्तगृहपरिचायकं द्वारि स्थितः काको देवदत्तगृहव्यावर्तकस्तत्रोपलक्षणमिष्यते
न चात्राज्ञाने केचिदतिशय आत्मजन्यो घटादिविषयाद्व्यावर्तको धर्मोऽस्ति अप्रतीतेः अत आत्मैवाज्ञानव्यावर्तकोऽज्ञाने
विशेषणं वाच्यम् अन्यथा आत्मविषयत्वमज्ञानस्य न सिद्ध्येदित्यभिप्रेत्याह न जानामीति ॥ ॥ ॥ ॥ ॥

अज्ञाने ४=

३१

नन्वात्मविशेषणमज्ञाततत्प्रमाणं भासमानतया तथापि नात्मनः स्वप्रकाशत्वं विशेषणविशेष्योभयेन्द्रियसन्निकर्षस्यैव विशिष्टज्ञानहेतुत्वादिति त-
त्राह अत इति अतो विशेषणत्वज्ञानसमानमात्मानमुल्लिख्य विषयीकरोतीत्यन्वयः न विशेषणेन्द्रियसन्निकर्षो विशिष्टप्रतीतिर्हेतुः अतीता-
नागतविशेषणेऽपीन्द्रियसन्निकर्षासंभवात् ततो विशेषणज्ञानमेवान्यविशिष्टप्रतीतौ कारणं न सन्निकर्ष इत्यभिप्रेत्याह भासमान-
मिति साक्षात्मनो भासमानता प्रमाणाद्वा भ्रमाद्वा स्वप्रकाशत्वाद्वा नाद्यः प्रमाणप्रवृत्तावज्ञाततत्वविरोधात् न द्वितीयः आत्मनः कल्पितत्वा- कल्पितत्वात् = ५
पत्तेः भ्रममात्रसिद्धस्य तत्वात् तृतीयाद्विशेष्यात्स्वप्रकाशतयैवात्मनो भासमानेत्याह स्वयंप्रकाशतयेति उल्लिख्य विषयीकृत्येत्यर्थः ननु
अज्ञाततम = २ = भासमानत्वाभावो ज्ञाततत्वं तत्त्वमिति भासमानत्वेन संभवतीति तत्राह अज्ञानलक्षणमिति लक्षणस्वरूपं तस्याभावलक्ष्यावर्तयति आवरण- अज्ञानस्याभावत्वेऽज्ञाताभावत्वम् = २ =
मिति अत्यंततावदावस्कं नीहारेण प्रावृता इति श्रुतेः आवरकं च वस्त्वादिभावरूपमेव दृष्टं तेन भासमानेप्यात्मन्यज्ञाततत्वं संभवति वा योरक्ष-

आवरणेः =

अत आत्मानमहं न जानामीति स्वयंप्रकाशतया भासमानमात्मानमुल्लिख्य नेत्यज्ञानलक्षणमावरणं तत्र विषयीकरोति ननु य-
द्भासमानत्वाभासमानत्वे स्वयंप्रकाशस्य विरुद्धे इति मामहं न जानामीत्यनुभवबलादेव स्वयंप्रकाशत्वमात्मनः सिद्धम् ननु घ-
टं न जानामीत्यनात्मन्यपीदृगनुभवोस्तीति तस्यापि स्वयंप्रकाशत्वप्रसंग इति चेत् अथ कोयं घटो नाम यस्य स्वयंप्रकाश-
त्वमापद्यते घटत्वादयो धर्मा यत्र प्रतीयंते अयमेवेति चेत् ॥४॥

स्वरूपस्य व्यवस्थित्यविरोधादिति नन्वेवं घटादावपि तदुभयं स्यात्तत्राप्यात्मवदविरोधादिति तत्राह इति सुगमपदिति अनात्मनि भासमानता-
प्रमाणाद्वाच्या स्वप्रकाशस्वरूपत्वाभावात्प्रमाणप्रवृत्तौ वा तद्विरोधज्ञाततत्वाभावात् ततो भासमानत्वाभासमानत्वे परप्रकाशे घटादावेव वि-
रुद्धे ते नात्मनीत्यर्थः आत्मन्यज्ञाततत्वसाधकप्रमाणस्य स्वप्रकाशत्वसाधकत्वमुपसंहरति इति मामहमिति ननु ज्ञानत्वसाधकं प्रमाणं ना-
ज्ञातविषयस्य स्वप्रकाशत्वसाधकं घटादावपि स्वप्रकाशत्वप्रसंगादिति शंकते नन्विति घटं न जानामीत्यनुभवस्तावदात्मनीव घटादाव-
विशिष्टः घटादिरज्ञाने विशेषणं विशेषणज्ञानसाध्या च विशिष्टप्रतीतिः विशेषणज्ञानं च न प्रमाणेन तस्मिन्नस्त्यज्ञाततत्वाभावात् भा- प्रमाणेन =
अज्ञातत्वस्य = नैवात्तस्यात्मवदेव प्रसंगात् न स्वतो जडत्वात् भ्रमाच्चेत्तर्हि तस्य कल्पितत्वमिति विकल्पमात्मभेदेन घटं प्रत्याचष्टे अथेति घटस्वरूपप्रश्नस्या-
प्रासकालत्वं प्रत्याचष्टे यस्येति दृष्टं मनोऽन्तरं शंकते घटत्वादय इति कंबुग्रीवाकारवत्त्वं व्यक्तिपदार्थपदे घटपदार्थ इत्याच्यत्वमा-
दिपदार्थः अयमेवेत्यत्र घट इति शेषः ॥४॥

ॐ
खं॰ वे॰
टी॰ ३९

यत्रेति सर्वनाम्नां शक्तिमात्रवाचकत्वात्तद्विशेषस्योपस्थितौ नियामकाभावात्तथैव विशेषो वक्तव्य इत्याह किमस्येति शब्देन प्रतिपादनं च न शक्यं किं तु शब्दं यद्बुध्या इत्याह अनुभूयेति अनुभवोपि न भ्रमः कल्पितत्वप्रसक्तेरित्यभिप्रेत्याह सम्यगिति तदनुभवोपि न प्रमेयत्वादिरूपेण किं त्वसाधारणरूपेणेत्याह इतरविविक्ततयेति असाधारणघटस्वरूपं शंकते कपालेति कपालेनारभ्यते स्वसमवेततयोत्पाद्यते कपालारब्धः आदिपदं मृदाद्याह तावत्सु तेषु कपालादिसमवेतत्वरूपाय पि घटः स्यादिति तद्व्यावर्त्तयति अवयवीति श कलादिकमुदासायाह विशेष इति किमेतद्वाक्यं कपालघटयोरवयवावयवित्वसंबंधादिधर्मप्रतिपादनपरं किं वा घटस्वरूपदर्शनपरम् आद्ये प्रस्तान्तरं घटस्वरूपस्यैव स्पष्टत्वादित्याह नेति द्वितीयं प्रत्याह नत्वेते इति अवयवित्वेन प्रतीतेरवयवसापेक्षत्वे

किमस्य स्वरूपं तत्सम्यगनुभूयत इतरविविक्ततया प्रदर्श्यताम् कपालाद्यारब्धोवयवी विशेष इति चेन्न अवयवावयवित्वादयो हि धर्मा घटसंबद्धा अन्ये न ते त एव घटस्वरूपम् एतदन्यत्तु स्वरूपं वाच्यम् एतदन्यत्स्वरूपं तु विशिष्य वक्तुं न शक्नोमीति चेत् कथमशक्तिः अननुभूयमानत्वाद्वा निर्विशेषत्वाद्वा नाद्यः घटस्वरूपस्य सार्वजनीनानुभवसिद्धत्वात् द्वितीयेपि वक्तव्यम् निर्विशेषमनुभूयमानं यत्स्वरूपं तत् किं सतोऽनुभूयते स्वभिन्नेन मानांतरेण वा ॥ ॥

ख
न स्वरूपायोगादित्यर्थः ननु किं स्वरूपनिरूपणेन यादृक् तादृगस्तु घटस्वरूपमिति तत्राह एतदन्यदिति अन्यथातिप्रसंगस्य तथा दातमशक्यत्वादिति शेषः वाच्यं घटस्वरूपं भवत्येव परं तु वक्तुं न शक्नोमीति यदुक्तं शंकते एतदन्यदिति अशक्तेः कारणं पृच्छति कथमिति लोकविरोधेनाद्यं दूषयति नाद्य इति निर्विशेषत्वान्निर्वचनाशक्तिः शब्दस्य विशेषपुरस्कारेणैव प्रवृत्तेरिति द्वितीयमनुवदति द्वितीयेपीति निर्विशेषत्वं घटस्य तथैव स्वीकृतं न चाननुभूयमानं विश्वसिद्धम् एवं स्थिते विमृशति तत्किमिति स्वतः स्वमहिम्ना स्वप्रकाशतया निर्विशेषस्वरूपापेक्षया भिन्नं यन्मानं तेन मानांतरेणास्तु केऽन्यापेक्षया स्वस्यापि मानांतरत्वान्न परप्रकाश्यत्वसिद्धिरिति विशिनष्टि स्वभिन्नेनेति अंतरपदं भिन्नपदव्याख्यानाय ॥ ॥

अथ यंमंगीकर्तुंमंतंमद्रूषयति अंत्यइति मानांतरविषयत्वेपिनिर्विशेषत्वा किंनस्यादितितत्राह नहीति तत्रहेतुः चक्षुरादेरिति
अयमर्थः चक्षुरादीनामिंद्रियाणांतावद्रूपादिगुणवत्येवप्रवृत्तिनियमात्तत्पुरस्कारेणैवतेषांप्रवृत्तेः अनुमानमपिसामान्यादिपुरस्कारे
णैवप्रवर्तते अनुमितेर्व्यापकतावच्छेदकप्रकारत्वनियमात् शाब्दोपिविशेषवत्येवप्रवर्तते आनंत्यव्यभिचारपरिहारायसामान्या
दिविशेषस्यापेक्षितत्वात् उपमानस्यापिसादृश्यादिधर्मविशिष्टापेक्षत्वात्सर्वप्रमाणांविशेषविषयनियतत्वमिति ननु एवंत
स्यात्मनः औपनिषदत्वव्याघातः निर्विशेषेआत्मनिवेदशिरसामप्रवृत्त्ययोगादितितत्राह लौकिकेति लक्षणयानिर्विशे
षाकारवृत्त्युत्पादकत्वाद्वेदशिरसांतत्प्रामाण्यमुपपद्यतेइतिभावः यतः प्रमाणानिसर्वाणिविशिष्टवत्येवनियतानि अतश्च
तेचनिर्विशेषंस्वरूपं तस्मात्परिशेषात्स्वप्रकाशंनिर्विशेषंवस्तुघटस्वरूपसिद्धमित्यापद्यतइत्यंगीकारेणोपसंहरति तस्मादिति न
नन्वथापिस्वप्रकाशंनिर्विशेषंवस्तुघटस्वरूपंनभवितुमर्हति अनात्मत्वात् यद्वदित्याशंक्यस्वरूपासिद्ध्यादूषयितुंविचारयति न

अंत्येनिर्विशेषत्वव्याघातः नहिनिर्विशेषंवस्तुमानांतरविषयइतिसंभवति चक्षुरादेः सर्वस्यलौकिकप्रमाणस्यसवि
शेषवस्तुविषयत्वनियमात् तस्मान्निर्विशेषंवस्तुसकलवाङ्मनसाविषयंस्वयंभासमानंवस्तुघटस्वरूपमित्य
वशिष्यते नकिमात्मनोभिद्यतेनवेतिविचारणीयम् भिद्यतेचेन्न भेदकधर्माभावात् निर्विशेषत्वात् धर्मिप्रतियो
गिनोरुभयोरपिस्वयंप्रकाशत्वेनतद्विशेषितभेदस्यप्रमाणेनग्रहीतुमशक्यत्वाच्च ॥ ॥

घटत्वादि

किमिति ननुभेदकोधर्मोघटत्वादिरस्तीतिनेत्याह निर्विशेषत्वादिति घटत्वादिर्घटेभेदकमस्तीतिकोर्थः किंतद्व्यक्तिमात्रे
वर्ततेघटव्यक्तिषुवा नाद्यः सर्वव्यक्तीनांघटत्वरूपताप्रसंगात् घटव्यक्तिष्विति चेत् काघटव्यक्तयः घटत्वादिमत्यइतिचेत् आ
त्माश्रयः धर्मांतरवत्यइतिचेत् तत्रापिएवंपर्यनुयोगेआत्माश्रयादिदोषात् ततोनिर्विशेषएवस्वच्छघटइतिनभेदकोधर्मोस्तीति
निर्विशेषस्यभासमानस्यस्वप्रकाशत्वमत्रतत्तमित्यभिप्रेत्यहेत्वंतरमाह धर्मीति भेदावबोधिमानंनभेदमात्रमवबोधयितुमल
म् तस्यधर्मिप्रतियोगिविशिष्टैकरूपत्वात् तावन्मात्रगोचरत्वेवाआत्मप्रतियोगिकोघटधर्मिकोभेदोनमानसिद्धइतिघटआत्म
नः प्रमाणतः भिन्नोनस्यात् अथभेदावबोधकंमानंप्रतियोगिनमात्मानंधर्मिणंचघटमपिभासयतीतिचेत्कथंस्यादुभयो
रपिस्वप्रकाशत्वांगीकारादित्यर्थः ॥ ॥

घटत्वादिमत्यः घटव्यक्तयः घटत्वादिमत्यो भिन्ना अभिन्ना वा अभिन्ना इति चेदात्माश्रयः द्वितीये अनवस्थादयः स्तु

भेदकस्यमानस्य

भेदावबोधकस्य=४ भेद१२

ॐ
वे॰ मु॰
टी॰ ३०

नन्वेवं घटात्मनोरभेदे किमव शिष्यते नानियामकाभावादित्याशंक्येदं सर्वं यदयमात्मेति श्रुतेः प्रमाणसिद्धस्य सर्वस्य प्रथमोद्दिष्ट
स्यानुवादेनात्मरूपत्वस्य विधेयत्वप्रतीतेरात्मैवावशिष्यते न घट इत्यभिप्रेत्योपसंहरति तस्मादिति आत्मन्यज्ञातत्वानुभवो यदि
तत्र स्वप्रकाशत्वसाधकस्तर्हि घटस्यापि स्वप्रकाशत्वं स्यात् घटविषयाज्ञातत्वानुभवस्याविशिष्टत्वादिति निरस्तम् घटस्यात्मव्य
तिरिक्तस्य निरूपणादिति इदमर्थं पदार्थान्तरे व्यतिदिशति एवमिति अनात्मत्वेन प्रतिपन्नस्य स्तंभादेरात्मत्वप्रतिपाद
नफलमाह कस्येति यत्रानात्मनि स्वयंप्रकाशत्वमापद्यते मण्वात्मभिन्नो नास्ति आत्मनि चत्वदापादनमिष्टमिति ननु स्तं स्वप्रकाशत्व५८
भादेरात्मत्वेन सर्वं तत्र सिद्धमिति कथं तस्यात्मत्वमिति तत्राह तुल्येति स्तंभत्वाद्याश्रयः स्तंभादिरुत स्तंभाद्यवयवारब्धो वय
विविशेषो वेत्यादिन्यायस्य तुल्यत्वादित्यर्थः ननु यदि घटादिविषयमात्मैव न ततोऽन्यत्तर्हि आत्माकारेणैव भानं स्यात् ना

तस्मात्स्वयंप्रकाशात्मस्वरूपमेव घट इति स्थितम् एवं पदार्थान्तरमप्या
त्मस्वरूपमेवेत्यनात्मा आत्मभिन्नो नास्त्येव कस्य स्वयंप्रकाशत्वमापद्यते
तुल्यन्यायादिति अतः स्वयंज्योतिः स्वभाव आनंदघनोऽसंगोदासीन
एवात्मा नाद्यनिर्वचनीयाविद्यासंबंधादनेकाकारेण भाति रज्जुरिव
सर्पदंडाद्यात्मना ॥

प्रकारांतरस्य

काशांतरेणानवभासत्वादिति शंकां परास्य स्वयंज्योतिरिति विशेषणस्य यथार्थत्वमुपसंहरति अत इति तस्य पुरुषार्थत्व
निरूपणायाह आनंदेति आनंदो ब्रह्मेति व्यजानादिति श्रुतेरित्यर्थः ननु चंदनप्रीतत्वमिति वडुपाधिसंसर्गादानंदत्व
नस्य तत्र इतिनेत्याह असंग इति असंगो ह्ययं पुरुष इति श्रुतेरुपाधिसंसर्गो नास्तीत्यानंदैकरसत्वमिति ननु कर्तृत्वादात्मनो दुःखम
पि संभाव्यते तत्कथमस्य आनंदैकरसत्वमिति तत्राह उदासीन इति अविकारित्वादात्मनो न कर्तृत्वं किंतूदासीन एव स इति अनात्मा
कारप्रतीतिमुपपादयति अनादीति नन्वेकस्मिन्नपि शुक्तिशकले एक एव शुक्त्याकारो रजतमिति प्रत्ययात्र नवप्राप्तप्रतीयते
न त्वनेके आकारा इति तत्कथमात्मनोऽनेकाकारतया भानमित्याशंक्यैकाधिष्ठानस्यानेकभ्रमविषयत्वे दृष्टांतमाह
रज्जुरिवेति ॥

द्वैतस्याभावोद्वैतमित्य भावात्मकत्वापत्ति ... द्वैताद्वैते रूपमितिनतस्याद्वैत ... स
भावत्वमुपपद्यते अन्यनिरूप्यस्याभावत्वा ... भावात् = २ =

प्रपंचस्याज्ञानमिद्वैतफलितमाह परमार्थतस्त्विति तन्नु परस्परविरोधेन प्रकारान्तरस्थितिरिति न्यायात् द्वैतस्य चवस्तुतो ऽस
त्वेऽद्वैतमेवात्मस्वभाव इति वाच्यम् तदपि न संभवति आत्मनो ऽभावात्मकत्वापत्तेः द्वैतनिरूप्यत्वेन स्वभावत्वानुपपत्तेश्चेत्याशंक्या
द्वैतमप्यात्मनो न स्वरूपमित्याह नाद्वैतमिति किं तर्हि स्वरूपमित्याशंक्याह विज्ञानेति द्वैताद्वैतविनिर्मुक्तं केवलप्रज्ञार्थः
घटम् = आत्मनि घटादिजगद्ज्ञाने चेकस्मिन्नधस्तमित्येकाधिकरणसंबंधात् ज्ञानतया घटो ऽनुभूयते न घटादौ वस्तुतो ज्ञानविषयत्व
मस्तीति घटादावपि न स्वप्रकाशत्वं तदनुभवस्यान्यथोपपन्नत्वादित्यभिप्रेत्योपसंहरति इति सिद्धमिति यस्य भासा जगत्सर्वं भाति
यो वस्तुगमम तदहं ब्रह्मस्मरणस्यात्पुरुषार्थस्वात्मकम् १ आत्मनि प्रमाणान्तरेऽपि न दृष्टपुत्रेनानात्मत्वं प्रमाणाभावेन स्फुरत्व
१२ त्वात् स्वप्रकाशत्वादित्येतावन्मात्रेण पदेन स्थापितम् इदानीमानन्दमिति विशेषणेनात्मनि स्पृचितपुरुषार्थरूपत्वनिरूपयित्वं
आत्मनः १ = सिद्धान्तिमतसिद्धात्मान्वादेन तस्य पुरुषार्थत्वमादियति आत्मेति साधनचतुष्टयसंपन्नस्याधिकारिणोऽयमुपादेयः पुरुषार्थः
आत्मा १ =
परमार्थतस्तु नैद्वैतं नाद्वैतमात्मैव केवलो विज्ञानघन इति सिद्धम् आत्मायं सर्वसंबद्धो भानुभासक उच्यते नित्योऽयमविना
शित्वादुपादेयः कथं भवेत् २५ नन्वैहिकामुष्मिकसकलसांसारिकसावनस्यायनकलापाद्विमुखस्यानादि
भवसंचितपुण्यनिचयदत्तपितकल्मषस्यापि विषयदोषदर्शिना मादितोद्वेगस्य परमपुरुषार्थकामिनो मुमुक्षोः
आत्मा १ आविनाशित्वपुरः २
कथं भवेत्कथंचिदित्यर्थः उपादेयत्वे हि साध्यत्वं प्रयोजकं न चायं साध्यः सत्यत्वादिति १ कथमयमुपादेयः स्यात् ॥ ॥
त्यत्वादित्याह नित्य इति नित्यत्वासिद्धिमाशंक्याह अविनाशित्वादिति एतेनोत्पाद्यस्य ध्यातिमलकारः घटवत्परिकिन्न
आ३ त्वाच्च नित्य इत्याशंक्य स्वरूपासिद्धमाशंक्यति आत्मेति आपलृप्रमाविनिस्स्तेरामोतीत्यात्मा व्यापक इत्यर्थः नन्वेतावतापि क आत्मत्वस्वरूपत्वेनापि = ३
घर्मानित्यत्वपरिहारः व्यापकस्याकाशस्यानेव्यमतश्चानित्यत्वदर्शनादित्येतन्त्याह सर्वेति सर्वेष्वसर्वात्मतासंबद्धो जगदधिष्ठानमिति
यावत् न चाकाशनजगदधिष्ठानत्वं सात्मानं प्रत्येव तदभावात् ननु सर्वोपादानत्वान्नानित्यो नवाकाशश्चेत्यर्थः न त्वात्मासत्त्वात्
आत्मनि नरूर = दृष्टवत्सर्वोपादानमिति तेन्त्याह भानुरिति भानुवद्भासकः तथा च यो मानमिभासयति तस्य स्वयंप्रकाशते न त्यापेतानक्रुन्य
तेऽरतिननस्यजाड्यमित्यर्थः तत्र प्रमाणमाह उच्यते इति ऋत्विति शेषः अवेदितश्रवणे तच्छ्लोकं व्याकुर्वन्नात्मनः पुरुषार्थत्व
मादियति नन्विति विमुखो विरक्तः वैराग्ये हेतुमाह अपीति विषयदोषदर्शिने हेतुमाह अनादीति नन्वेतादृशोऽप्यधि
कारिणः किमित्यात्मानोपादेयस्तत्राह परमपुरुषार्थेति एतदेव स्पष्टयति मुमुक्षोरिति वक्ष्यमाणमुक्तेरात्मानपुरुषा

वेदसिद्धिः ॥

उपादेयत्वं कथं भवेदित्यनेनान्वयः ३=

ॐ नन्वनित्यं सांसारिकं सुखं दूषयित्वा ऽमृतवत्तावदुपेक्षणीयमात्मनो नित्यत्वेन दूषयित्वादिदोषानाकलितत्वात्कथं नोपादेय
वे० सू० तेत्याशंक्यानित्यत्वं तावदङ्गीकृत्याप्युपादेयत्वं निराकरोति तत्रेत्यादिना तत्र यद्यप्यात्मा नित्यस्तथापि तस्यानुपादेयत्व
टी० मेवेति व्यवहितेनान्वयः नित्य आत्मा अविनाशित्वादाकाशवत् नच स्वरूपासिद्धिः आत्मविनाशस्य तत्सामग्र्यभावेन दु- विनाश २
३८ -र्निरूप्यत्वादित्यभिप्रेत्य हेतुमाह विनाशेति समवायिकारणनाशो वा असमवायिकारणनाशो वा द्रव्यनाशसामग्रीय-
-ते इष्यते नचाकार्यस्यात्मन उभयमस्ति अकार्यत्वं चानाद्यदृष्टप्रवाहाधारत्वादिति प्रागेवोक्तमिति ननु कार्यदर्शनं
चेदस्ति तर्हि सामग्र्यपि कल्प्यतामिति तत्राह आत्मविनाशस्येति अप्रामाण्यत्वमुपपादयति स्वसत्तेति स्वमात्मा आत्मा आत्मसत्ताकाले ६
देहादेः २= भावो ग्राह्यः ग्राह्यकाले आत्मविनाशकाले ग्राहकस्यात्मनो ऽभावादिति नचान्येनात्मनो ऽन्यस्यात्मनो भावो ग्रहीष्यत इति सांप्रत ना ७४
आत्म १= म् ग्राहकस्यात्मत्वाभावात् आत्मीयाभावस्यागृहीतमप्रामाणत्वात् किं च तद्ग्रहणं प्रत्यक्षमनुमानं वा नाद्यः अन्यात्मनो ऽन्या
त्मानं प्रत्यतीन्द्रियत्वेन तत्प्रतियोगिकसंसर्गाभावस्यागृहीतमप्रामाणत्वात् संसर्गाभावप्रत्यक्षत्वे प्रतियोगिप्रत्यक्षत्वस्य तंत्रत्वा

तत्र यद्यप्ययमात्मा नित्यः विनाशसामग्रीरहितत्वात् आत्मविनाशस्यागृहीतमप्रामाणत्वाच्च स्वसत्ताकाले ग्राह्याभावा
त् ग्राह्यकाले ग्राहकाभावात् नच परिच्छिन्नत्वादस्यानित्यत्वमनुमेयम् आत्मत्वादात्मा ह्यपरिच्छिन्नः यत आ
हुः यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यत इति ॥

त् नापि द्वितीय इत्याह नचेति परिच्छिन्नत्वहेतोरपहतत्वादित्याह आत्मत्वादिति परिच्छिन्नत्वेऽप्यात्मत्वं किं न स्यादित्या
शंक्यात्मशब्दार्थमाह आत्मा हीति देशकालवस्तुभिरपरिच्छिन्नत्वादात्मेत्यर्थः उक्तमर्थं वेदव्यासोक्त्या द्रढयति यत आहुरि
ति यस्मादर्थपञ्चकं हि चः समुच्चये यस्माद्धेतोस्तानन्तात्मनो निरवशेषेण तान् व्याप्नोत्यात्मा यस्माच्च सुषुप्त्यादावज्ञानकार्या
न नात्मनो ज्ञानवशादेवात्मन्युपसंहरति वा तस्मादात्मेत्याह यदादत्त इति यस्माच्च विषयान् विषयाभिमुखो हृतीरति
प्रकाशयति तस्मादात्मेत्याह यच्चात्तीति यस्माच्च स्वनिरूपणीयत्वेन प्रकृतस्य सन्ततो नैरन्तर्येण भावो वस्थितिः सुषुप्तिष्वेव
नान्यत्र ऽन्यस्यानात्मनो ऽभावात् तस्मात्सा नत्वेनातीत्यात्मागमनफलं हि तन्नदेशावस्थितिः नचात्मव्यतिरिक्तं वस्त्व-
-स्ति तस्मादात्मन्येव स्वरूपेण तया वृत्तिरेव सन्ततो भाव इत्याह यच्चास्येति तथा च परिच्छिन्नत्वं स्वरूपासिद्धम् तत
आत्मा नित्यो ऽपरिच्छिन्नत्वात् व्यतिरेके घटादिवदिति स्थितम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ३८

व्यापकत्वात् =१

अत्रानुमाने व्यभिचारं शङ्कते व्यापकस्यापीति गगनादौ साध्याभाववद्धेत्वभावेन परिहरति नेति गगनादौ व्यापकत्वाभावं वदन् व्यापक
स्वरूपमाह सर्वेति ननु सर्वसंबद्धत्वं नाम सर्वसंयोगित्वं न तु गगनादावस्त्येवेति तत्राह सर्वस्मिन्निति नन्वाकाशादयोऽपि सर्वस्मिन् सर्वात्मना सं
बद्धा एव तेषां निरवयवत्वेनैकदेशेन संबद्धत्वाभावादिति तत्राह अनन्वगतानामिति अनन्वगता हि परस्परव्यभिचारिणः अधिष्ठानं सज्ज्ञा
पदम् ननु व्यभिचार्यव्यभिचार्येतरस्याधिष्ठानं किं तस्मादिति तेत्याह नहीति अन्यत घटादिष्वन्येनानात्मना पट्यादिना सर्वात्मना नि
रवशेषतया व्याप्यते स क्रियते इति न हीति योजना सर्वात्मना व्याप्त्यभावे हेतुमाह व्याप्येति व्याप्यस्वरूपतोऽसत्त्वादित्यर्थः सत्ता
द्रूपस्यैकस्यायोगादित्याह व्यापकेति व्यापकस्य स्वरूपं सद्रूपता तया निर्मुक्तस्य व्याप्यननुगतस्य घटादेः स्वरूपस्याभावात् तथा च य
त्स्वरूपं सद्रूपा घटादिव्याप्यं स तदेव वस्तु तस्मात्तव्याप्यमिति ननु व्याप्यस्य व्यापकमुक्तसत्त्वेऽपि स्वरूपसज्ज्ञानविरुद्धत्वे देशान्तरे व्या

ननु व्यापकस्यापि गगनादेरनित्यत्वं दृष्टमिति चेन्न व्यापकत्वापरिज्ञानात् सर्वसंबद्धत्वं हि व्यापकत्वं सर्वस्मिन् सर्वात्मना संबद्ध
त्वमनन्वगतानामधिष्ठानमिति यावत् न ह्यन्येनान्यत् सर्वात्मना व्याप्यते व्याप्यस्वरूपासत्त्वप्रसङ्गात् व्यापकस्वरूपविनिर्मुक्तस्वरूप
स्याभावात् अन्यथा सर्वात्मना व्याप्त्यसंभवात् न च कालदेशवस्तुपरिच्छिन्ने व्याप्ति निश्रमाणानाऽपेक्षाभावत्वं न स्वयं
प्रतिभातत्वात् सर्वजगदवभासकत्वेन श्रुतौ प्रसिद्धत्वात् तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः
तथापि स्वावद्धःखाभावेतरत्वादनुपादेयमेव ॥४॥

पकसत्त्वमेकदेशान्तरे स्वसत्त्वेनेति व्यवस्थोपपत्तेरिति तेत्याह अन्यथेति एकस्मिन्नेकदेशे व्याप्यं स्वरूपं सत् तस्मिन्नपि देशे व्यापकव्या
प्तिरस्ति न वा अस्ति चेत्किं व्याप्यसत्तया व्यापकसत्तयैव तत्र सद्व्यवहारोपपत्तेः नास्ति चेत्तर्हि सर्वात्मना न व्याप्तिसिद्धिरिति नान्यदन्य
स्याधिष्ठानमिति सर्वाधिष्ठानमात्मैव न गगनादिरित्यर्थः एतावता आत्माऽयं सर्वसंबद्ध इति चरणो व्याख्यातः ननु तर्ह्यात्मनो
न सर्वाधिष्ठानत्वं जडत्वेनाज्ञातत्वायोगात् जडत्वं च सर्वप्रत्ययवेद्यत्वादिति तत्राह नचेति स्वयंप्रतिभातत्वं साधयति सर्वेति सर्वस्या
त्मभासं तेन च कथमात्माभासयितुं शक्यते न हि घटः प्रदीपं भासयतीति शक्यते वक्तुं तस्मात्स्वप्रतिभात एवात्मेत्यर्थः यद्यपि नित्य आत्मा
तथापि तद्दोषानास्कन्दितत्वादुपादेय इति सूच्यते तथापि तस्योपादेयत्वं न संभवतीत्यादिपति तथापीत्यादिना आत्मा ग्रस्त्वपादेयः
स्वावद्धःखाभावेतरत्वात् घटादिवदित्यर्थः ॥४॥

दुः
वे. स.
टी. २९

सिद्धान्तीसाध्यमाक्षिपति नन्विति अनुपादेयत्वं विकल्प्य परकर्तृत्वेन विकल्पयति आदानेत्यादिना अविषयत्वमिति छेदः एत
दिति एतेन सकलेति साध्यत्वविरहो ऽपीति विशेष्यमेवेति सुखदुःखाभावेतरत्वमात्रमित्यर्थः संभावितपक्षान्तरं संगृह्णात्याह अन्यदिति आ
दानक्रियायाः अविषयत्वमात्मनियमे सिद्धान्तिभिरपि स्वीक्रियते यतः स्पर्शवत्त्वं क्रियावत्त्वं हस्तादिभिरानयनं नाक्रियस्यात्मनः तीक्ष्णप
त्वात् आक्षिपति नायमित्यादिना नच प्राचा वमाने नसिद्धसाधनमिति भावः किंचनेदमनुपादेयत्वलक्षणं अलक्ष्ये सुखादौ गतत्वादिति ह
दयान्तरमाह सुखेति लक्षणान्तरमुपपादयति नहीति इच्छाविषयत्वस्य विरहो यत्र सो ऽनुपादेय इति द्वितीयं यत् तद् दूषयति ,नद्वि
तीय इति परस्परविरोधेन प्रकारान्तरस्थितिरिति न्यायादिच्छाविषयत्वानधिकरणत्वस्यानुपादेयत्वे इच्छाविषयत्वस्यापादेयत्वप्रसं
ग्रस्यति तत्रेच्छा तद्द्विषयत्वाभ्यां विशिष्टो यो विषयः स उपादेय इत्युच्यते ताभ्यामुपलक्षितं विषयस्वरूपमात्रं वा आद्य पक्षे कुर्वन्
हेतुमाह इच्छेति द्वितीयमुपाययति ताभ्यामिति तत्रापीदं विवेचनीयं यावानिच्छाविषयस्तावानस्तवीयमुपादेयः उत इच्छावि

नन्वकिमिदमनुपादेयत्वं आदानक्रियाविषयत्वं वा इच्छाविषयत्वविरहो वा सकलेतिसाध्यत्वविरहो वा न द्विशेषितं सु
खदुःखाभावेतरत्वाविशिष्यमेव वा अन्त्यो नाद्यः इष्टापत्तेः सुखदुःखाभावयोरप्यनुपादेयत्वापत्तेश्च नहि सुखं वा
दुःखाभावो वा आदानक्रियया विषयीक्रियते नद्वितीयः इच्छातद्विषयत्वयोरप्युपादेयत्वापत्तेः ताभ्यामुपलक्षितं वि
षयस्वरूपमेवेति चेन्न दुःखस्याप्युपादेयत्वापत्तेः ज्ञानविषयस्येवेच्छाविषयत्वादिच्छाजनकस्य च ज्ञानस्य सविकल्पक
षयैकदेशः अथ वेच्छाविषयविशेष्यमात्रमिति तत्रायं ॥ तेनेदुःखाभावविशेषणदुःखविषयत्वान्न ॥ ॥ ॥

निराचष्टे नेति हेतुमाह दुःखेति नन्वदुःखं कोपि नेच्छतीति शंकामपहरणायाह ज्ञानेति दुःखाभावं तावत्स्वरूपार्थं नयामस
र्वे विदंतीति ज्ञानहं वेदनेन यावानर्थो विषयीक्रियते तावन्तमर्थमिच्छापि विषयीकरोतीति ज्ञानेच्छाकृतीनां समानविषयत्वमिति यमा
त् नन्वदुःखाभावज्ञानेपि दुःखविशेषणत्वेन याप्रतियोगित्वेन न विषयस्तस्य निर्विकल्पकत्वेन वैशिष्ट्यानवगाहित्वादिति तत्रा
ह इच्छाजनकस्येति नहि किंचिदिदमिति निर्विकल्पकमिच्छाजनकमपि तु मलम विषयसौंदर्यानवभासकत्वात् विषयसौंद
र्यज्ञानजन्याहीच्छेति न्यायविदां स्थितेः नहि विषयसौंदर्यावगाहि तज्ज्ञानं निर्विकल्पकं प्रयुक्तं वैशिष्ट्यावगाहित्वादत एवाह स
विकल्पकत्वेनेति अस्तु दुःखाभावज्ञानं सविकल्पकं तथापि कथं तस्य दुःखविषयतेति तत्राह दुःखेति अभावज्ञानं
स्यविशिष्टविषयत्वेन प्रतियोगि दुःखविशेषणविषयत्वादित्यर्थः ततो यावानिच्छाविषयस्तावानस्तवीयमुपादेयस्यैकयन

दुःखस्यानुपादेयत्वमिति सिद्धम् ॥ २९

४८

द्वितीयं शंकते विषयेति अव्याप्तिं दूषयति नेत्यादिना नहि सुखविषयिण्या इच्छायाः सुखमेकदेशः विषयांतराभावादित्यर्थः ननु
न सुखमात्रं पुरुषार्थः किंत्वात्मीयं तथा चेच्छा आत्मीयसुखविषयिणीति कथं सुखे इच्छाविषयैकदेशत्वाभाव इति चेन्न सुखे पुरुषार्थत्व
स्यात्मोपाधिकत्वाद्यनैविति तृतीयं शंकते इच्छेति तथा च न दुःखेनुपादेयत्वं इच्छाविषयत्वेपि विशेष्यत्वाभावादित्यर्थः अहं स्व
र्गी स्यामितीच्छायाः स्वर्गीविशेषणविशिष्टात्मविषयिण्या विषयविशेष्यस्यात्मनोपि पूर्वं यदा नभिमतोपादेयत्वापत्त्या द्वितीयपदे
तृतीयपदं दूषयति अहं स्वर्गी स्यामिति अनुमाने च बाधापत्तिरिति भावः सकृतिसाध्यत्वस्य विरहो यस्मिन्नर्थे सोनुपादेय इ
कृतिसाध्यत्वविर हविशेषणम् ३= तितृतीयपदं परा चष्टे नेत्यादिना न तत्रातिव्याप्तिरिति भावः एतद्विशेषितसुखं दुःखाभावेतरत्वमनुपादेयत्वमिति च त सकृतसाध्यत्वविरह विशेषितम् ३=
र्थः पत्तः विशेष्यमात्र उक्ते सुखसाधने यागादावनुपादेयता स्यात् तन्निरस्तये विशेषणं तन्नेत्तन्नास्तीति नातिव्याप्तिरिति तमेव पदं दू यागादेः २= चतुर्थपदं २=
षयति नेति हेतुमाह विशेषणेति सुखसाधनस्य यागादेः स्वप्राधान्येनोपादेयता किंतु सुखोपाधिकीति विशेष्यमात्रलक्षण

विषयैकदेश इति चेन्न सुखे तदभावात् इच्छाविषयविशेष्यस्वरूपमात्रमुपादेयमिति चेन्न अहं स्वर्गी स्यामित्यत्रात्मनोपि सकृतिसाध्यत्वविरहः २=
उपादेयत्वापत्तेः तेन्नोपपत्तेः न तृतीयः सकृतिसाध्ययोरपि दुःखतत्साधनयोरनुपादेयत्वात् न चतुर्थः विशेषणवैयर्थ्यात् न पंचमः न तु आत्मनः दुःखाद्यात्मक
साध्यहेत्वोरभावात् ३= साध्याविशिष्टत्वात् अन्यस्य निर्विकल्पकमप्रमात्वात् दुःखतत्साधनतादात्म्यस्यानभ्युपगमपराहतत्वात् न च सर्वात्मकत्वा त्वमनभ्युपगतं तर्हि तस्य सर्वा
त्मनः सर्वाधिष्ठानत्वस्यैव सर्वात्मकत्वस्यार्थत्वात् नहि सत्यस्य मिथ्यातादात्म्यमस्ति सत्यत्वविरोधात् तथा चानुपादेयत्व त्मकत्वव्याघात इति आह न चे
स्यैव निर्विकल्पकमप्रमात्वात् किमिदमनुपादेयत्वमात्मनो निष्प्रमायाय्यत इति चेन्न ॥॥ ति = २

त्वेन स्वीकृतेपि नातिव्याप्तिः परं पुरुषार्थत्वाभावस्य सुखसाधनेपीष्टत्वादिति विशेषणं व्यर्थमित्यर्थः सुखदुःखाभावेतरत्वम
नुपादेयत्वमिति पंचमं परा चष्टे नपंचम इति साध्येति तथा च संदिग्धासिद्धो हेतुरनुमाने दोष इति भावः संभावितं षष्ठं परा चष्टे
अन्यस्येति ननु किमिति निर्वचनीयशंकिः दुःखाद्यात्मकत्वस्यैवानुपादेयार्थत्वादिति नेत्याह दुःखेति आत्मनो दुःखात्मकत्वे शनाः २
परिद्धांतं शंकित्वा निराचष्टे नेत्यादिना आत्मनः सर्वाधिष्ठानत्वं नामाध्यस्तस्य सत्तास्फूर्तिप्रदत्वं न तु मिथ्याकार्यात्मकत्वमपि
कुत इत्यत आह नहीति मिथ्यानिर्वचनीयं दुःखादि मिथ्यात्मकं दुःखादितादात्म्यं सत्यत्वतत्त्वेरिति हेतुमाह सत्येति सिद्धांती
स्वरूपपक्षमुपसंहरति तथा चेति आपाद्यत इत्यध्याहृत्य तमेतं सिद्धांतिशंकितदोषं सर्वं पत्ती परा चष्टे नेति ॥
॥ ॥ ॥ ॥ ॥

अन्यानुपसर्जनत्वं तर्हि आत्मनि वक्तुं नामिति तेनेत्याह तच्चेति सवकारव्यावर्त्यमाह २४

आत्माद्युःखाभावरूपो भावरूपत्वा-
दिसत्वभावरूपत्वेसतद्रूपासिद्धेर्न च ४=

अनुपादेयत्वज्ञानार्थं =१

ॐ तत्र हेतुमाह इतरेति अनुपादेयत्वं हि उपादेयत्वेन प्रतियोगिना निरूपितेन विना दुर्ज्ञानमिति तदर्थं प्रतियोगमुपादेयत्वमन्यानुप-
सर्जनस्वरूपं विज्ञेयमित्यर्थः अन्येषामिति आत्मादीनां तदुपसर्जनत्वात् सुखदुःखाभावो प्रत्यनुपसर्जनत्वात् आत्मा तावत् सुखादी- आत्मनः ३=
वे॰ सू॰ न्यत्यधिकरणतयोपसर्जनमेवमन्यदप्यूह्यम् ननु सुखं वा दुःखाभावो वा आत्मैव ततः कथं तस्योपसर्जनत्वमिति तत्राह स्वेति
टी॰ ३॰ आत्मनो दुःखाभावरूपतां पराचष्टे भावेति न च दुःखाभाववादिनं प्रति भावरूपत्वेनेति स्वरूपासिद्धो हेतुरिति सांप्रतम् अह-
मिति आत्मप्रतीतिरित्यविवादं न चेयं प्रतीतिः दुःखनिरूप्या दुःखाप्रतीतावपि जायमानत्वात् ततो दुःखानिरूप्यत्वाद्भावरू-
पात्मेति नन्वव्यभिचार्यात्माव्यभिचारि च शून्यत्वं तत्र च सर्वेषां तत्त्वं यच्छून्यं स एवात्मा न भावस्ततो दुःखाभावात्मकत्वमप्य-
स्तीति कुत्सिच्छङ्कते सर्वेति शून्यत्वे सर्वात्मता वा आयं निषेधयति नेति ज्ञेयत्वेनात्मत्वं न स्यात् विज्ञातुरेवात्मत्वात् अ-
टा१४ न्यथा घटादीनामप्यात्मत्वापत्तेरिति द्वितीयं निरस्यति नचेति ज्ञानानाश्रयत्वादित्यर्थः न च ज्ञानानाश्रयत्वं शून्यस्याप्युक्त-

=इतरानुपसर्जनत्वं=

रेतरानुपसर्जनत्वस्यैवोपादेयार्थत्वात् तच्च सुखदुःखाभावयोरेव अन्येषां तदुपसर्जनत्वात् सुखदुःखाभावेतर-
आत्माभावरूपत्वेन दुःखाभावानात्मकत्वात् सर्वशून्यात्मकत्वे दुःखाभावात्मकत्वमप्यस्तीति चेन्न विज्ञातुरा-
अमस्य ४= त्मत्वात् न च शून्यं विज्ञातृ न च विज्ञानं शून्यस्याश्रयमभावस्य भावधर्मकत्वानुपपत्तेः आरोपितोऽयं धर्मिभाव इति
चेन्न हि तस्याधिष्ठानं वाच्यम् न हि निरधिष्ठानो भ्रमोऽस्ति शून्यमेवेति चेन्न हि शून्यव्यामिश्रमेव सर्वं सर्वैः प्रतीया-
त न च तथास्ति सत्त्वेनैव सर्वस्य प्रतीतेः ॥

विज्ञानस्य = सत्वा=

मित्याह नचेति शून्यं खलु सर्वभावः न च भावस्याश्रयो भवितुमर्हति अ-
भावस्य भावधर्माश्रयत्वादर्शनादिति हेतुमाह अभावस्येति ननु यद्यप्यभावो न भावाश्रयः प्रमाणाभावात् तथापि स्वमा-
कल्पनया तथास्तु न हि समस्य किंचिदप्यास्मस्तीति शङ्कते आरोपित इति तर्हि यदन्वितत्वयारोपितं प्रतीयते स आरोपवि-
षयोऽधिष्ठानं वक्तव्यमारोपोऽस्ति न वा अस्ति चेत्तर्हि तद्वाच्यमित्याह नहीति द्वितीयं प्रत्याचष्टे नहीति सर्वत्र भ्रमेष्विदमाकार-
स्यानुभवादिति शेषः अधिष्ठानसत्वपक्षे तद्वाच्यमित्युक्तम् न च किंचित्स्यादन्यदधिष्ठानमतः शून्यमेव नायः शून्यताया कल्-
पितत्वप्रसंगात् अधिष्ठानमित्रस्य कल्पितत्वात् द्वितीयं शङ्कते शून्यमेवेति अथ सत्तं हि अधिष्ठानान्वगततया तत्ता-
दात्म्येन प्रतीयते न चारोपिते शून्यान्वगतिरस्ति आरोपितस्य सत्त्वेनैव प्रतीतेरिति दूषयति नहीत्यादिना ॥ ॥ ॥ ५

किंच तत्कल्पितं सर्वाधिष्ठानं सत् तत्किंचिदेव आद्ये तत्संप्रतीतिर्वाच्या ज्ञातस्यैवाधिष्ठानत्वात् सा च प्रतीतिः स्वतः परतो वा परतश्चेत्तत्र परस्यासर्वकल्पनात् अप्रामाणिकत्वात् सिद्धौ वा कल्पितत्वहानेः स्वतश्चेत्तर्हि शून्यत्वहानिरित्याह किंचेत्यादिना नु शून्यस्य स्वत एव सिद्धौ को दोष इत्यत आह नहीति ज्ञानानात्मकत्वादित्यर्थः अस्तु तर्हि स्वप्रकाशज्ञानायतनं सज्ज्ञानात्मकतापि सर्वस्यावलंबनीया स्यान्यथा त्वपपत्तिरिति चेत्तत्राह अन्यथेति स्वप्रकाशज्ञानस्य जगदधिष्ठानस्य शून्यमिति नामकरणे परिभाषामात्रं तत्त्व वस्तुतः शून्यं भावरूपत्वादित्यर्थः यदि किंचिदेव भ्रमे शून्यमधिष्ठानं न सर्वत्र तर्हि व्यभिचारित्वान्न सत्स्यादात्मेति सिद्धो भावरूप आत्मेत्युपसंहरति तस्मादिति भावत्वव्यवस्थापनस्य फलमाह दुःखाभावेति आत्मनि दुःखाभावतापराकृत्य सुखात्मत्वप्रतिज्ञानमुपपादयितुमुपक्रमते नचेति आत्मा न सुखरूपः अकार्यत्वात् आकाशवदित्यर्थः यद्वा आत्मा न सुखरू

किंच सर्वस्यारोपितत्वे आरोपिताधिष्ठानस्य पूर्वमेव सिद्धिर्वाच्या सा च स्वत एवेति कथं शून्यं स्यात् नहि शून्यं स्वतः सिद्धमिति अन्यथा परिभाषामात्रत्वापत्तेः तस्माद्भावरूपत्वादेव दुःखाभावानात्मकत्वेन च सुखात्मकत्वं स्रगादिविषयज्ञानाजन्यत्वात् सुखस्य च तज्जन्यत्वात् अन्यथा तदर्थितया तदुपादानानुपपत्तेः जन्याजन्ययोरभेदानुपपत्तेः न च सुखसंबंध एव तेन जन्यः सुखमहं जानामिति प्रतीतेः सुखात्मनोः संबंधस्य समवायस्याजन्यत्वाच्च ।।।।

पः विषयज्ञानाजन्यत्वात् यत्सुखं तद्विषयज्ञानजन्यं यथा संप्रतिपन्नं सुखमित्यर्थः आत्मनोऽप्रतीत्यजन्यत्वेऽपि सुखरूपता किं न स्यादित्यत आह सुखस्येति तज्जन्यत्वात् स्रगादिविषयज्ञानजन्यत्वात् तस्मादित्यर्थः अन्यथेति तदजन्यत्वे इत्यर्थः तदुपादाने स्रगादिविषयोपादाने तत्त्वस्यादित्यर्थः न ह्यकार्यार्थी कारणमुपादत्ते पिपासोपशान्त्यर्थमपि कठिनद्रव्योपादानप्रसंगादिति जन्याजन्ययोरिति जन्याजन्यत्वरूपविरुद्धधर्माध्यासात्सुखात्मनोर्भेदस्तादात्म्यं न युक्तमित्यर्थः न च सुखस्य जन्यत्वमसिद्धं तस्याकार्यत्वात्कथं तर्हि सुखार्थी स्रगाद्युपादत्ते आत्मनि नित्याकार्यसुखसंबंधायेति नेत्याह नचेति तेन तदुपात्तस्रगादिनेत्यर्थः न त्वप्रतीतिर्हेतुत्वेनाह सुखमिति सा सुखस्वरूपयोरनुप्रतीतेनैतत्संबंधांशोऽसाधनोपादानमन्यथासिद्धमित्यर्थः किंच सुखात्मनोः संबंधः समवायो वा संयोगो वा आद्ये तदंशोऽसाधनोपादानं तत्क्षीणं तस्य सतत्वे सतिनित्यत्वेनाजन्यत्वादित्याह सु

सुखमत्र

अकार्यमात्मा तत्सुखत्वार्थं स्रगादिकारणमुपादत्ते इति

नहि २=

नचेतिप्रतिज्ञायां २=

स्रगादिविषयज्ञानाजन्यत्वे २=

अन्यथा

सुख १=

सुख २=

सुखसाधनं स्रगादि २=

समवायस्य १=

ॐ
वे॰मु॰
टी॰ ५२

द्वितीयं प्रत्याह न चेति अप्राप्तयोः स्वतंत्रयोः प्राप्तिर्हि संयोगः स्वात्मा संवेद्येऽप्राप्तेश्च तत्राह स्वतंत्र इति प्रमाणं नास्तीति न च स्वात्मसंयोगे साधनोपादानमन्यथासिद्धमित्यर्थः ननु स्वतंत्रे नित्ये सुखे अस्ति प्रमाणं नित्यमानंदमिति श्रुतेः सामानाधिकरण्यप्रतीतेः मम्मापि च श्रुतिर्मानं प्रमाणं केनायमर्थः स्वीक्रियते इति कथं न तत्र प्रमाणमस्ति त्वं कथं वा न ममागीकार इति तत्राह नया पीति स्वातंत्र्ये नाम न नित्यत्वं किं त्वात्माभिन्नतया तादात्म्येनावस्थितिः न च सुखत्वाटक यास्वीक्रियते ब्रह्मपदसामानाधिकरण्योपादानात्तादात्म्यापत्त्या सुखस्य स्वीकारात् आत्मन एव ब्रह्मत्वादित्यर्थः ननु तर्हि श्रुतिबलादेव सिद्धमात्मसुखयोस्तादात्म्यं त्वया मां च प्रति श्रुतेरविशेषादिति चेन्न भेदग्राहकप्रत्यक्षविरोधेन श्रुतेरयोग्यतयोपचारत्वात् अन्यथाहं सुखमिति कोपि प्रतीयादिति हेतोरतरमाह किंचेति यस्मात्सर्वैर्मुक्तिभिरात्मनः सुखदुःखाभावान्यत्वमिष्टं तस्मादुपसर्जनतयोऽनुपादेय एवात्मेति सिद्धमनुपादेयत्वसाधकमनुमानं निगमयति तस्मादिति आत्मानुपादेयः सुखदुःखाभावेतरत्वात् घटादिवत् व्यतिरेके सुखादिव

न च स्वात्मा संवेद्ये स्वतंत्रे सुखे प्रमाणमस्ति तथा चांगीक्रियते तथाप्यात्मतादात्म्यापत्त्या स्वतंत्रसुखस्यैव स्वीकारात् किंच सुखात्मनोस्तादात्म्ये अहं सुखमिति प्रतीतिप्रसंगः न च तदस्ति तस्मात्सुखदुःखाभावान्यत्वादनुपादेय आत्मा न चताभ्यामन्यः पुरुषार्थोस्ति येनात्मानमुद्दिश्य उपादेयः स्यात् न चात्मत्वमेव परमपुरुषार्थताप्रयोजकं तथा लोके व्यवहाराभावात् ॥

सुखदुःखाभावेतरत्वे हेतुरस्ता॰=

दित्यर्थः ननु हेतुरस्तु मास्तु चानुपादेयत्वरूपं साध्यमात्मनि विपक्षे किं बाधकमिति तत्राह नचेति हेत्वभावे साध्याभाववत्त्वान्तर्हि सुखदुःखाभावाभ्यामन्यः कश्चित्पदार्थः पुरुषार्थोस्ति येन तत्र व्यभिचारेण हेतोः साध्यागमकत्वाद् हेत्वसत्यात्मनिरूपणीकस्साध्यं न सिध्येदित्यात्मनोऽपि तोषपादेयतास्यान्न चैवमस्तीत्यर्थः ततः साध्याभावे हेतुरेव न स्यादिति हेत्वभावापत्तिर्विपक्षे बाधिकेत्यर्थः अस्तु तर्ह्यात्मत्वमनुपादेयत्वे साध्ये आत्मेतरत्वमुपाधिः न च साध्यव्याप्तिः उपाध्यभावस्यात्मत्वस्य साध्यानुपादेयत्वाभावेन पुरुषार्थत्वव्याप्तत्वात्तेन भवदीयो हेतुः साध्यरिति नेत्याह नचेति प्रयोजकं बोधकमित्यर्थः न पक्षेतरउपाधिरनुमानमात्रोच्छेदापत्तेः कथं तर्हि तेजोऽनुष्णत्वानुमाने तेजोभिन्नत्वमुपाधिः तस्य बाधोन्नीतत्वात् न च प्रकृते तथा बाधोस्ति लोके आत्मनः पुरुषार्थत्वेनोपादेयतायाऽव्यवह्रियमाणत्वादित्याह तथा इति ॥ ५२

यदि सुखदुःखाभावेतरो पि पुरुषार्थः स्यात्तर्हि सुखदुःखाभावेतरत्वं साध्यगमकत्वं न स्यात्=२

पुरुषार्थः = २ पुरुषार्थत्वव्यवहारयोग्यः = २

वगत्याः स्वतएवोपादेयत्वं लोके वाच्यं अन्येषां तत्संभिन्नानामपुरुषार्थत्वात् न च सुखादिकं पुरुषार्थः परसुखादेरपि
सुखं = २ तथात्वापत्तेः आत्मीयत्वे सतीति चेन्न हि आत्मीयत्वं पुरुषार्थतया व्यवहर्तव्यमिति नेत्याह सुखं मे स्यादिति अयमत्राशयः निरुपाधी-
च्छाविषयो हि पुरुषार्थत्वादुपादेयः स एव च तथा व्यवहारयोग्यः सुखं दुःखाभावश्च तथा न चात्मसंबंधिनावेव तौ तथा न स्व- स तं ३
हाविति वाच्यम् आत्मनः सुखदुःखाभावौ प्रत्यधिकरणतयाकारकत्वात् कारकस्योपसर्जनत्वेन वस्तुतोऽनुपादेयत्वादिति
१४१ पं ननु सुखं मे स्यादिति कामना आत्मसुखविषयिणी न तु सुखवदात्मापि विषयोऽस्ति किमित्यौपाधिकत्वं तत्र कामस्येति तत्राह न
चेति सुखाद्यनुपहिते केवले आत्मनि कामनाया अदर्शनात् तदुपहिते च तस्मिन् दर्शनात् सुखादिकमेव काम्यं नात्मा तेनात्मा अपु-
रुषार्थ उपादेयश्चेत्यर्थः ननु आत्मलाभान्न परं विद्यते आत्मकाम इत्यादिश्रुतिवाक्यबलादात्मनः काम्यमानत्वावगतेः पुरुषा-
र्थतेति चेन्नेत्याह नचेति सत्यं श्रुतिरस्तीति सापि किं स्वस्याः अविरोधसिद्धये लोकव्यवहारमपेक्षते नवा अपेक्षते चेन्न हि

सुखं मे स्याद्दुःखं मा भूदित्यात्मसंबंधिसुखदुःखाभावयोरेव काम्यमानत्वात् न चात्मा मे स्यादिति कामनास्ति
न चाकाम्यमानः पुरुषार्थः लोकव्यवहारानुल्लंघनेनैव वेदेन पुरुषार्थप्रतिपादनात् अन्यथा लौकिकत्वात् स्वर्ग-
स्यापि सुखत्वं न स्यात् ॥

नत्वायमलौकिकः पुरुषार्थः

तदभावे कथमात्मनः काम्यमानतया पुरुषार्थतां प्रतिपादयेदिति न चेति प्रतिज्ञायां हेतुमाह लोकेति तथा च मंचाः क्रोशं-
तीतिवल्लोकविरोधे श्रुतिरुपचरितेति भावः ननु श्रुतिः किमिति स्वार्थबोधने लोकव्यवहारमपेक्षते विरोधपरिहारायेति चेन्न लो- स्वार्थपरत्वात् = ३
कव्यवहारस्य बाधेनापि विरोधपरिहारोपपत्तेः न च श्रुतिरेव बाध्यतां तत्परत्वात् न यो चेत् किं लोकव्यवहारापेक्षणेनेति तत्रा-
ह अन्यथेति लोकव्यवहारानपेक्षणे ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र काम्यमानः स्वर्गस्तावत् पुरुषार्थ इति वस्तुस्थितिः तत्र
वैदिकत्वमात्रेण स्वर्गस्य पुरुषार्थत्वेन सुखत्वं न स्यात् सुखे स्वर्गपदस्य वेदेनासांकेतितत्वात् यदा च लौकिकपुरुषार्थव्य-
वहारं वेदोऽनुसरति तदा लोके द्विविधस्यैव पुरुषार्थत्वात् स्वर्गस्य दुःखाभावत्वे गौरवात् भावरूपसुखात्मकत्वेव श्रुका-
न च तत्परत्वात् श्रुतिर्बाधिका समुच्चयेनोभयप्रामाण्योपपत्तावन्यतरकल्पनायोगादिति ॥ । ।

तत्परत्वात् श्रुतिर्लोकव्यवहारबाधिका = १ सुखदुःखाभावस्यैव = २ = आपत्तेः

लौकिकव्यवहारानुल्लंघनेनैव वेदे न पुरुषार्थप्रतिपादनादिति समुच्चयेन = १

ननुसुखंवेदबोधितम्=२

ग्रं॰ वे॰ सू॰ टी॰ ४२

ननु स्वर्गकामस्यानोक्तस्वर्गस्य सुखरूपता लोकानुसारादित्युक्तम् स्वर्गस्य सुखत्वग्राहकार्थवादस्य यन्न दुःखेन संभि-
न्नमित्यादेर्विद्यमानत्वात् तत आत्मकामादिश्रुतिवदात्मकामस्यमान आत्मा पुरुषार्थत्वादुपादेय एवेति तत्राह किंचेति ऐहिकं
विषयजन्यसुखं स्रगादि सर्वं विधिसाध्यं परत्र भवं पारत्रिकं स्वर्गादिसुखं साधनं स्रगादियागादि च अवसादयन् क्लेशयन् ननु परमपुरु-
षार्थकामनया सर्वमेवैतत्त्यज्यत इति तत्राह अलौकिकेति वेदमात्रसिद्धेन न तु लोकतो वा स्वानुभवतो वा प्रसिद्ध इति कृतार्थः सिद्ध
प्रयोजनः तथा च प्रसिद्धसुखपरित्यागेन लोकाप्रसिद्धपुरुषार्थेऽपि प्रवृत्तब्रह्मचर्यादिक्लेशो न युक्त इति भावः निर्विषयमिति
विषयः स्रक्चन्दनवनितादि निर्गतो यस्मात् मोक्षात्तमित्यर्थः किंच अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेदिति न्यायाद यत्ने

किंच किमयं लोको न रोचते येनैहिकं पारत्रिकं सुखसाधनं पुरुषार्थजातं परित्यज्य आजन्म ब्रह्मचर्याद्युपप्रेषदुःखजातेनात्मा
नमवसादयन् लौकिकः पुरुषार्थोऽयमात्मेति च वदन्न वक्तार्थः स्यात् तथा च रागिगीतम् तरुणंदावने शून्येश्रूगा
लत्वमस्त्वेति नन्तु निर्विषयं मोक्षं मह मिगो नमस्ति किंच यय यमात्मापुरुषार्थः स्यात् एवं नरः प्रयत्नेन ल-
भ्यमात्मानमनुपेत्य वैषयिकसुखलोभात्तत्कामतीर्थादौ म्रियंते प्राणिनः न च ते भ्रांताः शास्त्रेणापि तदनुमो
दनात् न लोकवचनान्नापि न वेदवचनादपि मतिरुत्क्रमणीयाते प्रयागमरणं श्रुति कुष्ठाद्युपहितानां दुःखाभाव-
स्यादि प्राग्म्रियंते इतिवत् सार्वजनीनम् तत्किमनात्मैवोपादेयः कः संशयः ॥

पा॰

न लभ्यं आत्मानमनुपेत्य परित्यज्य प्राणिनो वैषयिकसुखाय प्रयागादौ किमिति म्रियंते प्राणांस्त्यजंति तत्राया त्यागस्त्यापश्च
निरात्मनः पुरुषार्थत्वमावेदयतीत्याह किंचेति ननु प्रवृत्तिमात्रेण न प्रमाणं प्रमाणमूलाया एव प्रवृत्तेः प्रमाणत्वादन्यथाति
प्रसंगात् न चात्र प्रमाणमस्ति आत्महनननिषेधविरोधाच्च तस्मादसदेतदित्याशंक्याह नचेति न केवलं शास्त्रमेवात्रानुमो
दकं किंतु लोकानुमोदनमपि संगृहीतमपि शृणु तु: न चात्महनने शास्त्रविरोधः तस्यात्मरागित्वादेतस्य प्रयागादिमरणप्रा-
शस्त्यापवादत्वाच्च कश्चिद्विरोध इति भावः तस्मादात्मा न पुरुषार्थः किंतु वैषयिकं सुखमिति स्थितम् दुःखाभावस्या-
पि लोकप्रवृत्तेवात्मोपेत्यापुरुषार्थतामाह कुष्ठेति अनात्मैव पुरुषार्थ इति निरूपितमाकांक्षामुत्थापयति तत्कि

प्रयागादिमरणप्रवृत्तौ २=

॥ मुक्ति

४२

विशेषता सामान्यशास्त्रतो ननं विशेषोबलवान्भवेत्=२   निषेध३   सामान्यभीत=२

तर्ह्यनात्मकत्वाविशेषात् दुःखादिकमपि पुरुषार्थः स्यादित्यत आह सुखेत्यादिना । नन्वैहिकामुष्मिकसुखं तत्साधनं चोपादे-
यत्वेनाविगीतमिति यदविगानं तत् किं पामराणां परीक्षकाणां वा । नाद्यः पामराविगानस्याकिंचित्करत्वात् । परीक्षकाणामिति चे-
न्न ऐहिकामुष्मिकसुखादिपरित्यागेनात्ममात्रोद्देशेन श्रवणादौ प्रवृत्तैर्विगानाद्योगादिति शंकते ऐहिकेति । श्रवणादौ प्र-
वृत्तैर्मानानपरीक्षकाः इति परिहरति नेत्यादिना । ननु ते कथं भ्रान्तत्वान्न परीक्षकाः श्रुतिमूलत्वात्तदीयप्रवृत्तेरिति चेन्न ऐ-
हिकामुष्मिकसुखाद्यर्थप्रवृत्तिरपि श्रुतिमूला न भ्रममूलेति न विगीता । तर्ह्यात्मनः सुखदुःखोभयोरपि पुरुषार्थत्वं ना-
स्त्येन आमुष्मिकसुखाद्यर्थसाधनानुष्ठातॄणां बहुत्वेन तद्विरोधिश्रवणाद्यनुष्ठातॄणामभ्रान्ततया न्यूनत्वलक्षणतेरन्यपर- दुःखाभावश्च
त्वादित्यभिप्रेत्याह बहूनामिति आत्मा नोपादेयः सुखायत्वाभावात् दुःखादिवदित्यनुमाने पक्षेतरत्वस्योपाधित्वं वा

सुखदुःखाभावानां तत्साधनानां च पुत्रकलत्रगृहक्षेत्रगोहिरण्यादीनामुपादेयत्वस्याविगीतत्वात् । नन्वैहिकामु-
ष्मिकसकलसुखतत्साधनजातमपि त्यक्त्वा केवलमात्मानमेवोद्दिश्य श्रवणादावपि केचन प्रवर्तन्त इति चेत् । ते न
हि भ्रान्ता भवन्तु बहूनामनुग्रहो न्याय्य इति न्यायात् । द्वितीयपक्षे हि ननु विज्ञानमानन्दं ब्रह्मेति सुखरूपत्वमप्या- श्रवणाद्यनुष्ठातारः२
त्मनः श्रूयत इति चेत् । श्रूयतां नाम । न ह्येतावतात्मा पुरुषार्थः । न हि सुखमित्येव पुरुषार्थः । स्वसंबंधि-
तयैव तस्य पुरुषार्थत्वात् । अन्यथा शत्रुसुखस्यापि पुरुषार्थत्वापत्तेः । न हि सुखं स्वात्मनः पुरुषार्थः ॥ आत्म२८

धानन्दीत्यादित्येतावता संदर्भेणाव्यवस्थापितं आत्मा पुरुषार्थः सुखरूपत्वात् वैषयिकसुखवदिति सत्प्रतिपक्षं दास्यामी-
त्यभिप्रेत्य सुखरूपत्वे हेतुं श्रुत्या तावत्समर्थयते ननु विज्ञानमिति आनन्दात्मकत्वमात्मनः श्रुत्या बोध्यत इति तावदंगी-
करोति श्रूयतामिति तर्हि सत्प्रतिपक्षता सिद्धेति नेत्याह नहीति एतावता सुखरूपत्वश्रवणेनेत्यर्थः सुखरूपत्व- ना
स्य कथं तन्न संभवतीत्यर्थः ननु सुखरूपत्वे किमिति न पुरुषार्थतेति तत्राह नहीति आत्मनः सुखरूपत्वे किं स एव स्वतं-
त्रः पुरुषार्थः किं वा सुखान्तरनिरतत्समवेतं सुखान्तरम् नाद्यः नहि सुखमित्येव पुरुषार्थः अपि तु स्वसंबंधितत्र नचा-
भेदे स्वसंबंधिता संभवति नतः स्वतंत्रो न पुरुषार्थ इति न प्रतिपक्षानुमानं साधिष्ठित्यर्थः न द्वितीय इत्याह नहि सुखमिति
सुखात्मनः स्वरूपं सुखं नैव तत्समवेतं सुखान्तरं कामनायोगान्न सुखान्तरं सुखात्मनः पुरुषार्थ इत्यर्थः ॥ ॥ ॥

सुखात्मा२४

ॐ
वे॰ सु॰
टी॰
५२

ननु आत्मा उपादेय इति न साधितं वैषयिकसुखं न च दुःखानुविद्धत्वात् पुरुषार्थत्वात् अनुपादेयमेव तथा च सुखोद्दे-
श्येन यागादौ प्रवृत्तिर्बाधितेति सिद्धान्ती शङ्कते सांसारिकेति । सत्यं सांसारिकं सुखं दुःखानुविद्धमिति तथाप्यात्मा तावत्
दुःखाभावे उपादेय एव तथा च आत्मा सुखे यथा दुःखानुषंगो न भवति तथा यतनीयं न तु दुःखसंपर्कभियासुखं
त्यागमर्हतीति न हि भिक्षुकः सन्ति इति स्थाली नाधिश्रीयते मरणप्रसंगात् तस्मात् दुःखपरिहारायैव यतितव्यम् न वैष
यिकसुखपरित्याग इति परिहरति नेत्यादिना ननु आत्मा द्रष्टव्यः श्रोतव्यो मन्तव्यः इति वाक्ये प्रथमो यात्मात्मद
र्शनमनूद्य श्रवण मननादि विधीयते तत्र नात्मज्ञानमेव स्वतः फलं तस्य अपुरुषार्थत्वात् न च मुमुक्षोरधिका
रित्वात् मोक्ष एव फलम् मोक्षस्यात्मस्वरूपातिरिक्तस्याभावात् आत्मभिन्नस्य जन्यत्वेन मोक्षस्यानित्यत्वप्रसंगात् त
तः श्रवणविध्यन्यथानुपपत्त्या आत्मैव पुरुषार्थ इति सिद्धान्ती चोदयति कथमिति आत्मभिन्न एव सुखरूपार्थः श्रव-

सांसारिकमपि सुखं नानादुःखसंभिन्नमनुपादेयमेवेति चेन्न गत्यन्तराभावात् न हि भिक्षुकभियास्था
ल्यनधिश्रयणं आयातीति चेत् दुःखपरिहृतं सुखं तूपादेयमेव ननु कथं न सात्मज्ञानार्थं श्रवणा-
दि विधिः दुःखाभावार्थं नैव एवमात्मनोऽपुरुषार्थत्वे प्राप्ते ब्रूमः यस्मात् आत्मा सर्ववस्तूनां यदर्थं सकलं जगत्

प्राप्य नष्टा न फलं न त्वात्मा तस्मात् अनन्यत्वादिति त्यक्तात्मा गतं आनन्दाब्धिः स्वतंत्रो भावना देयः कथं वद २६
भावरूपत्वानङ्गीकारात् आत्यन्तिकदुःखनिवृत्तेरेव मोक्षत्वादिति पूर्वपक्षी परिहरति दुःखेति तथा च श्रव-
णादिविधिरत्रैवोपपन्न इति भावः दुःखाभावो नाय मात्मा सुखं नापि सुखपते सुखं तु भिन्नं तस्मादुपादेयः
कथं भवेत् एवं पूर्वपक्षमनूद्य तन्निरासाय सिद्धान्तं प्रतिजानीते एवमिति । यदुक्तं पूर्वपक्षिणा आत्मा अनुपादेयः
सुखदुःखाभावान्यत्वात् दुःखादिवदिति तत्रान्यानुपसर्जनत्वमुपादेयत्वं तदन्यत्वमनुपादेयत्वं आत्मा च सुखा
दिषु बत्वादुपसर्जनमित्यनुपादेय इति तदेतत् दूषयन् पूर्वपक्षं निरासप्रतिज्ञायां हेतुं संगृह्णाति यस्मात् आत्मा इत्या-
दिना असावात्मा अनुपादेय इति यत् पूर्वपक्षिणोच्यते तत् कथमिति विदेत्यन्वयः ननु का अनुपपत्तिः हेत्वनुमानेन न तत्सिद्धि-
रिति नेत्याह स्वतंत्र इति स्वतंत्रोऽन्यानुपसर्जन इत्यर्थः तथा च अनुमाने बाध इति भावः ननु कथमात्मनो अन्यानुपसर्जन

ऽनुपादेयमिति भावः ॥

ऽःखाभावार्थ
त्वेन तु

सांसारिकसुखस्य दुःखाभावकोपाधिकत्वादिति तत्रैव पदार्थमिति च
सांसारिकस्य आत्माभिन्नत्वेन अनुपादेयत्वमेव
५२

तदुक्तं सुखं च पुरुषार्थत्वादिति आत्मव्यतिरिक्तानां सर्वेषां पदार्थानामपार्थत्वमेवेति विप्रोषिकादयोपि रंगिरंते तस्मादात्मार्थं
तदुक्तं सुखं च पुरुषार्थत्वादिति आत्मव्यतिरिक्तानां सर्वेषां पदार्थानां परार्थत्वमेवेति तस्मादात्मार्थं
सकलं जगदित्यर्थः किं च सुखदुःखाभावात्मत्वे हेतुः स्वरूपासिद्धः कथमिति चेत्तत्राह आनंदाब्धिरिति निरतिशयसुखात्मकरूपत्व
र्थः दुःखाभावत्वमपपादयति यस्मात्सेति घटादीनामात्मास्वरूपतद्भेदे घटादेर्दुर्निरूप्यत्वेनासत्त्वात् भिन्नस्यासत्तोः भावः सदे
व अभावस्यभावत्वात्तस्मात्त्वादिति सुतरामात्मैव दुःखाभाव इति कथं नाम मानेस्वरूपासिद्धिरिति यत्र दुःखमासावित्यने
न संध्यते पृथक्पदार्थासपपादयति यदन्यदिति यस्मादात्मनोन्यत्वेन परैः संमतं वस्तु घटादि यद्भेदे आत्मनो भेदे आ
तएवात्मा सर्वेषां घटादीनां सत्तास्वरूपमित्यर्थः तथा च सत्स्वरूपस्य संवेद्यमाणत्वात्सएव पुरुषार्थ इति भावः द्वितीयपादं
व्याचष्टे यद्दृश्य इति अनादेयमनुपादेयरत्यर्थः यद्दानन्वधिष्ठानं सत्तास्फूर्तिप्रदं ज्ञान्यत् ईश्वरस्याधिष्ठानं तनात्मा अन
यदन्यद्दृश्यं तत्सर्वं यद्भेदे नरशृंगवत् सत्तासर्वपदार्थानामनादेयः कथं वद २७ यद्दृश्य प्राणिनः सर्वेभ्यस्तायाः क्रिमय
स्थरे ईश्वरः सर्वभूतानामनादेयः कथं वद २८ यद्वत्तुः सर्वभूतानां मनसो यन्मनो विदुः यज्ज्योतिर्ज्योतिषां देवो
ऽनादेयः कथं प्रभुः २९ मोदप्रमोदयत्ताभ्यामानंदात्मा तमोगतः जीवयत्यखिलांल्लोकाननादेयः स्वय
कृतः ३० यस्यानंदसमुद्रस्य लेशमात्रं जगज्जनं प्रसृतं ब्रह्मलोकादौ सुखार्थिकः परित्यजेत् ३१ हैरण्यगर्भमे
सर्वं यस्मिन्दृष्टे तृणायते सीमा सर्वपदार्थानामपुमर्थः कथं भवेत् ३२ यत्कामा ब्रह्मपर्यं तारं ज्ञायाः शामसं
पदः स्वस्वभोगं त्यजंत्येव सोपुमर्थः कथं नृणां ३३ यदिष्टत्वाफलाः सर्वा वैदिको विविधाः क्रियाः यागाद्या विहिता
कथं घटादीनां सत्तास्फूर्तिप्रदत्वात्प्रांकात्ततत्वप्रामदेतीनैवेश्वरोनात्मत्वत्वाभिप्रेत्याह यद्दृश्य इति स्फूर्तिप्रदत्वं च तत्त्वं प्रकाशकत्वम
नामाह यद्वत्तुरिति आनंदाब्धिपदं व्याचष्टे मोदेति इष्टवस्तुनो हर्षो मोदः स एवाभ्यासात्प्रकृष्टः प्रमोदः सुखमात्रमानंदः
तस्य यत्त्वादिकल्पनाः ज्ञानवत्प्रागित्याह तमोगत इति सुखसुखमात्रादानेन लोकान्सुखयतीत्याह जीवयतीति उत्तरार्धार्थमे
व स्फुटयति यस्येति प्रसृतं व्याप्तम् आत्मनो निरतिशयसुखरूपत्वे हेत्वंतरमाह हैरण्यगर्भ इति तन्वात्मा सर्वपुमर्थानां सीमे
ति कथं रुद्रादिपरमैश्वर्य इति स्वतेरिंद्रादिसंपदएव परमपुरुषार्थत्वादिति तत्राह यत्कामा इति मघवा प्रजापतिर्ब्रह्मचर्यमुवासे
ति श्रुतेरित्यर्थः ननु यद्यात्मैव पुरुषार्थः कथं तर्हि तमुपेत्य स्वर्गार्थं यागादिविधानमिति तत्राह यदिष्टत्वेति तमेतं वेदानु
वचनेनेत्यादिश्रुतिवशादंतःकरणशुद्धिद्वारा विहिता यागादिक्रिया आत्मदिष्टत्वाफलाः त्वत्स्वतः स्वर्गादिफलाः कथं न

ॐ
वे॰सु॰
टी॰ ४४

दिदृक्षायाः=२ आत्म।=

ननु स्वर्गादिप्ररोचनार्थमित्युक्तमात्मदिदृक्षायाश्च फलत्वात् यागादिफलं न तावदात्मानुजन्यत्वात् न तदनुभवः तस्मात्
(आत्म=२) फलत्वात् न वात्मदिदृक्षा तस्याज्ञानमात्रफलत्वेन स्वतोऽफलत्वात् तस्मात्स्वर्गादिरेव तात्पर्यतो वेदक्रियाफलमिति तत्राह यदृच्छयेति
यतो ज्ञानमज्ञानस्य निवर्तकमिति ब्रह्मसाक्षात्कारादज्ञाननिवृत्तेः सति अज्ञानमूलाः कामादयो दुःखमूलयोऽपि निवर्तन्त इति न
त्विष्टं तेषामात्मरूपत्वादात्मैव पुरुषार्थ इति प्ररोचनार्थमेव स्वर्गादिश्रवणमित्यर्थः मोदप्रमोदयष्टाभ्यामित्यत्रात्मनः सुखरूप
त्वे श्रुत्यर्थान्तरमाह प्रियमेव शिर इत्यादिवाक्यानि प्रमाणत्वेनोपन्यस्तानि संप्रति स्वप्नोऽस्मि न तस्य सुखमहमस्वाप्समिति परामर्शसि
द्ध सुषुप्तिकालीनसुखानुभवो ह्यात्मनः सुखरूपत्वे प्रमाणमित्याह आह्लादेति तत्र सुखव्याप्तावित्यर्थः एवं च दे
ऽनुपादेयत्वस्यात्मनि साधनायतत्वानियोगित्वेनोपादेयत्वं यन्निरूपितं तन्नात्र वदेद् मोदते सत्यमिति तेष्वात्मन्युक्तमनुमा
नेनानुपादेयत्वं सिद्धमिति नेत्याह नचेति चस्त्वर्थे तत्वात्मन्यन्यानुपसर्जनत्वं विश्रान्तं स्वर्गादिविषयसुखसाधनं ता

यदृच्छामात्रतः सर्वे कामा यान्ति दुःखमूलकः विनष्टं पनिर्वाणो नासावुपादेयः कथं न ते २४ आह्लादरूपतायां सुख
दुःखे सर्वसाक्षिकी तत्रोपेक्षाभवे यस्मात् तदन्यः स्यात्प्रभुः कथम् २५ सत्यमितरानुपसर्जनत्वेनानुपादेयत्वं तच्चा
(आत्मपदार्थत्वात् ३=) त्मन्येव विश्रान्तं सुखदुःखाभावयोरपि तदर्थत्वात् अन्यथा परसुखदुःखाभावयोरप्युपादेयत्वापत्तेः तस्मादा
त्मैव परमः पुरुषार्थः सुखदुःखाभावात्मकत्वाच्च नचाभावरूपस्यात्मनो दुःखाभावात्मकत्वानुपपत्तिः भवेद
पि दोषो यद्यात्मनि वादिदुःखं पारमार्थिकं स्यात् न त्वेतदस्ति ॥

वस्तु सुखोपसर्जनं आहिकंटकादिपरिहारश्च दुःखाभावसाधनं सुखदुःखाभावयोश्चात्मार्थत्वात्सर्वं सुखादिसाधनजात
मात्मन्येव विश्रान्तमित्यर्थः तर्हि कथं सुखादेः पुरुषार्थत्वव्यपदेश इति शंकामुपसंहारव्याजेन परिहरति तस्मादिति
आत्मशेषत्वादेव सुखादेः पुरुषार्थत्वं न वस्तुत इति भावः अत एवाह परम इति एतेनानुपादेयत्वानुमानं बाधितमिति
भावो ध्वनितः ननु सुखाद्यधिकरणतयात्मनः सुखदुःखाभावौ प्रतिकारकत्वात्सुखादिशेषत्वमेवात्मनो युक्तं नत्वैपरी
त्यमिति शंकित्वा अनुपादेयानुमाने स्वरूपासिद्धदूषणान्तरमाह सुखदुःखेति भेदे किलाधाराधेयभावः नच सुखाद्या
त्मनोऽभिद्यन्ते इति नात्मा न तदुपसर्जनं न वा सुखदुःखाभावान्यतरहेतुरात्मनि यद्येव तर्हि इत्यर्थः तत्वात्मा सर्वस्य सत्ता
प्रदत्वात्स्वयमसद्रूपः कथं स्यादिति शंकित्वा परिहरति नचेति दुःखस्यात्मनि कल्पितत्वात् दुःखाभावो ना
(सुखदु=) त्मनोऽतिरिच्यत इति परिहरति भवेदयमिति ॥

सावयवत्त्वादेवसादृश्यमिति = २ = प्रतीतेः ३ = दुःखात्मनोः २ = दुःखात्मनोः २ =

ननु दुःखं गुणः तस्याधिकरणत्वाच्च कल्पितं किंचारोपे आरोप्याधिष्ठानयोः सादृश्यं कारणं दृष्टं न चात्र तदस्ति उभयोरपि नि दुःखी = २ =
रवयवत्वात् किंचारोप्यसमये ऽधिष्ठानतत्त्वेन विशेषतो ऽज्ञातत्वं वाच्यम् न च दुःखप्रतीतिसमये आत्मविशेषो न ज्ञायते अहमि
आत्मनः २ = त्येवं तस्य विशेषप्रतीतित्वात् तस्याज्ञातत्वादिति कथं दुःखस्यात्मनि समारोप इति शंकते किंत्विति परिहरति अज्ञाने
ति स्वात्मनि दुःखं चाध्यारोपयतीति संबंधः ननु तत्सादृश्यं नास्तीति सत्यं किं सो ऽनारोपव्यभिचारी गगनकुनस्तर्हि दोषादारोप इति नहि सत्यादारोपयोर्व्याप्तिरिति = ४ =
अज्ञानादिति गरहाण ननु ज्ञानमात्रं चेत् दुःखारोपे असाधारणकारणं सुषुप्तेपि दुःखारोपः स्यादिति चेन्न शरीरादिनेदेत आरोपहेतुत्वात् = ५ =
त्वादित्याह फणीति उदासीनावस्थां व्यावर्तयति रागेति प्रतिबद्धस्वात्मदृष्टित्वेन विशेषादर्शनमुपपादितम् ननु यथा
नत्वन्यत्र २ = त्रेवस्के तोनास्ति तत्र त्रारोपणीयं दुःखं च गुणत्वादात्मैकसमवेतमिति कथं तत्रैव नस्यारोप इति नेत्याह निर्दुःखेपीति दुःखा दुःखस्य २ =
आत्मनि २ त्वं तत्राभावाधिकरणे यीत्यर्थः गुणे ऽभवदपि दुःखं नात्मनि समवेतं पादेमे दुःखमिति यादात्म्यप्रत्ययेन प्रतीतेरन्तःकरणधर्मत्वाच्चा आ

किंत्वज्ञानफणिफणमण्डलमध्यजदेहाद्यभिमानविषदंष्ट्राग्रवर्तिरागादिलक्षणहालाहलविषज्वालाशतिबद्धस्वात्मदृष्टिः स
वितरितमोवन्निर्दुःखेपि स्वात्मनि रौरवाद्यनेकभेदभिन्ननरकव्रातसमब्धतदुःखं चाध्यारोपयत्येव केवलम् आरोपितं
नाई४ स्य चाभावो नाधिष्ठानादतिरिच्यते अधिष्ठानाभेदेनैवारोपितत्वात् तद्भेदेन च तस्यासत्त्वात् असत्त्विषेधस्य च सत्त्वात्
दुःखात्मनाभावः तस्मात्तद्दुःखाभावः पुरुषार्थ इति यो मन्यते तस्याप्यात्मैव परमः पुरुषार्थः ॥

त्मनि तदत्यन्ताभावः केवलो निर्गुणश्चेति श्रुतिविरुद्ध आत्मनि गुणसमवायः ततो निर्दुःखत्वादात्मनस्तज्ज्ञानादिवशात् दुःखारो
प इति युक्तमुक्तमिति अतएवाह आरोपयत्येव केवलमिति ननु भवतु दुःखमारोपितं तथाप्यात्मा तदभाव इति कुतस्तत्राह आ
रोपितस्य चेति आरोपितप्रतियोगिकाभावस्याधिष्ठानानतिरेके हेतुमाह अधिष्ठानेति अधिष्ठानात्मकत्वेन तावत्कल्प
तस्य स्वरूपत्वेनाकल्पितत्वात् किं रूपेण तर्हि जगतः कल्पितत्वमित्याशंक्यात्माभिन्नमनात्मत्वं तद्रूपेण दुःखत्वादिनेत्यर्थः असत्
सद्रूपत्वादात्मनो भेदेन दुःखाद्यारोपितं किं न तत्तत्राह भेदेनेति सद्रूपादात्मनो भेदे असद्रूपत्वं स्यादित्यर्थः अस्त्वसत् दुःखा
दि ततोपि किं तत्राह असत्त्विषेधस्येति अभावाभावस्य भावत्वादिति दुःखाभावः सद्रूपत्वात्मा स इति स्थितम् ननु दुःखाभा नः २
वात्मकत्वेन पुरुषार्थत्वमाध नेन वा प सिद्धान्तः सुखात्मस्वरूपेणैव तस्य पुरुषार्थत्वादिति चेत् मेवम् तथ्यतद्भजेन इति न्या
याद विरोधादिति शंकामुपसंहारव्याजेन परिहरति तस्मादिति ॥ ॥
आत्मनः २ -

एकविंशतिदुःखोत्था=२

तन्न संसारनिवृत्तिः पुरुषार्थो न केवलदुःखनिवृत्तिरिति तत्राह तस्येति एकविंशतिप्रकारदुःखनिवृत्तिः पुरुषार्थः संसारो पि तदात्मैनितविरोधइति नन्वात्मैव चेतदुःखाभावः तर्ह्यात्मनोऽकार्यतयाऽसाध्यत्वात्कथं पुरुषार्थता पुरुषेणातदेवा प्यतेयदसिद्धमितिशंकते असाध्यत्वादिति साध्यत्वं न पुरुषार्थत्वे प्रयोजकं तस्यापि त्वेन हेयत्वादितिपरिहरति साध्यत्वे नेति निरस्तत्वाश्चाप्यकारेणेतिशेषः नन्वात्मत्वरूपदुःखाभावस्यानादित्वेन स्वतः सिद्धत्वात्तदुत्पत्तये तत्साधनायमुमुक्षू णां प्रवृत्तिर्नस्यात्सिद्धस्य साधनायोगादितिशंकते स्वतःसिद्धेति मोक्षोद्देशेन मुमुक्षोः श्रवणादौ प्रवर्तते रस्तुच्यते किंवा ब्रह्मात्मसाक्षात्कारोद्देशेन नाद्यः श्रवणादेः साक्षान्मुक्तिहेतुत्वे प्रमाणाभावादित्याह नेति द्वितीये पि सस्सा क्षात्कारः सिद्धो नवा आद्ये आह ब्रह्मेति द्वितीयं प्रत्याचष्टे पूर्वेति आत्मसाक्षात्कारेण मुमुक्षुप्रवृत्तिः फलवती त्व

फलेन२=

तस्याशेषसंसारदुःखनिवृत्तिरूपत्वात् असाध्यत्वादात्मनो पुरुषार्थत्वमितिचेन्न साध्यत्वेन पुरुषार्थत्वस्य निरस्त त्वात् स्वतःसिद्धदुःखाभावमुद्दिश्य मुमुक्षुप्रवृत्त्यनुपपत्तिरितिचेन्न ब्रह्मात्मसाक्षात्कारानन्तरं प्रवृत्त्यनुपपत्तेरिष्ट त्वात् तत्पूर्वं फलस्याजातत्वात् एवं च शेषदुःखाभावरूपब्रह्मात्मसाक्षात्कारेणैव सफलत्वात् तन्त्रज्ञानमपि न साध्यं वृत्तेरारोपितत्वात् चैतन्यस्यात्मत्वादितिचेन्न अस्य परामर्शस्य ज्ञानोत्तरकालीनत्वात् दुःखाभावो पि न केवलः पुरुषार्थः दृष्टदुःखेपि विषयेभ्यः सुखलाभेन प्रवृत्तिदर्शनादितिचेन्न ॥

श्रवणादिप्रवृत्तिब्रह्मसाक्षात्कारस्य=३= श्रवणादिप्रवृत्तेरितिशेषः२ न्य मिवृत्तेरारोपितत्वाच्चैतन्यस्यात्म त्वादितिपरामर्शस्य=४=

किं तदसत् साक्षात्कारो वृत्तिर्वा स्वरूपचैतन्यं वा नाद्यः वृत्तेरारोपितत्वेन मिथ्यात्वात्फलत्वानुपपत्तेः सत्यत्वे द्वैतापत्तेः नद्वितीयः तस्याजन्यत्वेनाफलत्वादितिशंकते तत्त्वज्ञानमपीति आत्मस्वरूपवदित्यपेरर्थः वृत्तेर्मिथ्यात्वज्ञान बाधोत्तरकाले वा बाधात्प्राग्वा नान्त्यस्त्याह नेति अप्रामाण्यस्य परतस्त्वादिना वाध्यं मिथ्यात्वस्य रहीतुमशक्यत्वादित्यर्थः द्वितीये नानिष्टमित्याह अस्येति नहि वृत्तिः स्वतः फलं किंतु ज्ञानतिवर्तकतया तर्हि ज्ञाननिवर्तकत्वं मिथ्यात्वग्रहात्प्रा गेवसिद्धमिति पश्चान्मिथ्यात्वग्रहोनुपयोगीत्यर्थः ननु दुःखाभावो न पुरुषार्थः असत्यपि तस्मिन्सत्यपि दुःखे पाकादौ भोजनेन सुखलोभेन प्रवृत्तिदर्शनादितिशंकते दुःखाभावोपीति दुःखाभावत्वं न पुरुषार्थत्व प्रयोजकं सुखेव्यभि चारात् सुखत्वमनतिरिक्तवृत्तेरेव प्रयोजकत्वादितिद्योतनाय केवल शब्दः ननु दुःखाभावः किंपुरुषार्थ एव नभवतीति ब्रूषे उतस्वातंत्र्यमपि पुरुषार्थ इति नाद्यः इति परिहरति नेति दुःखाभावमुद्दिश्य प्रवृत्तेः सोपि पुरुषार्थ इत्य

स्वरूपचैतन्यस्य=२

अप्रामाण्यस्य मिथ्यात्व ग्रहणं वा पहृत्वकं भवति२=

दुःखाभावे५=

ॐ

दृशो२

यत्र साध्याभावः तत्र हेत्वभावः इति व्यतिरेकव्याप्तिः नचात्रानुमाने आत्मनः सुख-
मित्यत्र व्यतिरेकव्याप्तिरस्ति यद्यपि सुखे सुखत्वाभावो वर्त्तते अतः सत्त्वाभावो
नास्ति सुखस्यान्यत्वादिति नाव्याप्यत्वासिद्ध्या दूषयति ४=

ज१४ हेतु१४

अथ सुखमपि पुरुषार्थ इति न हि तद्रूपतापि आत्मनि सुखसंपाद्येति सर्वथा व्याप्तात्मा पुरुषार्थ इत्याह आत्मन एवेति न
न सुखं गुण इति वैशेषिकादयस्तन्न किं तु व्यस्यात्मनः स्वरूपमिति तदाह नचेति सुखस्वरूपत्वप्राक् निरूपितं स्मारयन्
हेतुमाह परमेति हेतुसाध्ययोर्व्यतिरेकव्याप्तिमाह परमेति हेतुसाध्ययोर्व्यतिरेकव्याप्तिमाह अदुःखात्मनीति न
त्वात्मा न सुखं जन्यत्वात् व्यतिरेके सुखवदिति सर्वोक्तं दूषयितुं स्मारयति नचेति व्यतिरेकव्याप्तिभङ्गो साध्याभावसत्त्वेपि सुख४=
स्वोत्पत्तिः २= हेत्वभावासत्त्वेन व्याप्यत्वासिद्ध्या दूषयति जन्यत्वेति यत्तु एवं पत्ते सुखे जन्यत्वसिद्ध ये प्रतीतिरुपन्यस्ता तामन्यथयितुमा
ह नचेति प्रतीतेः सुखाभिव्यञ्जकोत्पत्तिविषयत्वेनान्यथासिद्धेर्न सुखस्योत्पत्तिरिति नचेति प्रतिज्ञायां हेतुमाह
शुभेति यद्यात्मनः सुखाभेदेऽहं सुखमिति प्रतीतिः स्यात् नचेयमस्ति भेदप्रतीतेरेव विरोधिन्याः सत्त्वादिति सर्वो

आत्मन एव परमानंदरूपत्वेन सुखस्यापि सत्त्वात् नचात्र विप्रतिपत्तिः परमप्रेमास्पदत्वेन सुखरूपत्वस्य सिद्धत्वा
सुखस्यात्मनोः २= त् असुखात्मनि प्रेमादर्शनात् नच सुखस्य जन्यत्वाज्जन्याजन्ययोरभेदानुपपत्तिः जन्यत्वासिद्धेः नच सुखं मे जा
सुखस्य जन्यत्वसिद्धिः =२= तमिति प्रतीत्या तत्सिद्धिः शुभादृष्टवशादात्मस्वरूपसुखाभिव्यञ्जनयोग्यान्तःकरणवृत्त्युत्पादनेनान्यथासिद्धेः
नचाहं सुखमिति प्रतीत्यापत्तिः विद्वांसं प्रतीष्टापादनात् अविदुषस्तु अध्यस्ताहंकारात् देहादेर्वात्माभिमा-
नात् तत्र चात्मन उपसर्जनतयैव स्फुरणात् अत एव ज्ञानसुखादिगुण आत्मेति तार्किकाः भ्रांताः नच दुःखे-
ऽपीयं गतिः समाना॥

कं दूषयति नचेति सुखात्मनोस्तादात्म्यप्रतीतिरपि तादात्म्यावगाहिनी स्यादिति यदापादनं तत्किं विदुषः प्रति अ-
विदुषः प्रति वा आद्ये इष्टापत्तिरिति नचेति प्रतिज्ञायां हेतुमाह विद्वांसमिति द्वितीये अज्ञानावस्थायामात्मस्वरूप-
स्याविद्यावृतत्वेनास्फुरणात् अज्ञानादात्मतादात्म्येन कल्पितदेहादेः सुखाधिकरणतया भेदेनव प्रतीतेरभेदप्रतीत्यदर्श-
योगादित्याह अविदुषइति एतेन भेदप्रतीतिविरोधः परास्तः किंच येऽपि सुखगुण आत्मा गुणीत्याहुस्तेऽप्यज्ञानवशादेव
वदंति न वस्तुतः निर्गुणत्वश्रुतिविरोधादित्याह अत एवेति ननु कथं तथा सुखे जन्यत्वादिप्रतीतेरन्यथोपपत्त्यात्मनः सु-
खरूपत्वे दुःखरूपतापि स्याज्जन्यत्वप्रतीतेरशुभादृष्टवशात् दुःखात्मस्वरूपाभिव्यञ्जकवृत्त्युत्पादनेनान्यथासिद्धेरित्यादि
युक्तेः समत्वादिति तन्निप्रसंगं प्राक् किं तु दूषयति नचेति॥ ॥

ॐ
वे॰ स्तु॰
टी॰ ४६

डुःखस्याव्यभिचारित्वेनाव्यभिचार्यात्मस्वरूपत्वभावनाऽयोग्यत्वादितिहेतुमाह डुःखस्येति किंचनडुःखमात्रंव-
स्तुसाधकं किं तु प्रमाणमूलोऽसौन चात्र प्रमाणमस्तीति हेतंतरमाह प्रमाणेति नकेवलंमूलप्रमाणाभावायुक्ते
रभासत्वं किंतु श्रेयोवित्तादिष्विति विरोधादपीत्याह सुखेति नन्वनसुखत्वंपुरुषार्थप्रयोजकंडुःखाभावे व्यभि
चारात् नापिडुःखाभावत्वंसुखेव्यभिचारात् नोभयं गौरवात् पुरुषार्थग्राहस्यानेकार्थत्वप्रसंगाच्च ततः कथ-
मभयं पुरुषार्थ इति चेन्न आत्मत्वस्यैवतत्त्वप्रयोजकत्वात् तस्य चोभयत्रानुगतत्वादित्याह तथा चेति सुखडुःखा
भावात्मकत्वे सतीत्यर्थः एवं च सत्यनुपादेयत्वानुमानेबाधोऽस्तीतः पदेतरत्वस्योपाधिरित्यपिसूचितमितिबोद्धव्यम्
एवं चात्मन एव पुरुषार्थत्वे सांसारिकसुखपरित्यागेनात्ममात्रोद्देशेन श्रवणादौ प्रवर्तमानानां लोकोत्तरत्वापाल-
म्भः परास्त इत्याह न चेति लोकोत्तरत्वं चासिद्धं लौकिकैरेव व्यासादिभिरेतस्यार्थस्यानुष्ठितत्वादितिहेत्वंतरमाह-
महानुभावैरिति यच्चाल्पत्वान्ममत्वाश्रवणाद्यनुष्ठानं गुणभावात्वज्योतिष्टोमादिष्वितिमूलासंगिकसुख

डुःखस्य सर्वस्यादावव्यभिचारित्वेनाऽऽत्मस्वरूपत्वानुपपत्तेः प्रमाणाभावाच्च सुखात्मकत्वयोः कश्चनविरो
धाच्च तथा चात्मत्वमेव पुरुषार्थताप्रयोजकं न च लोकोत्तरत्वोपालम्भः महानुभावैरेवव्यासवसिष्ठा
दिभिर्महात्मभिः श्रवणादिभिरैहिकामुष्मिकसकलसुखतत्साधनस्यात्मलिप्सयैवोपेक्षितत्वात् न
च बहुतरग्रहोन्माद्यः देहात्माभिमानेन तदभावात् न च सुखस्वरूपत्वेऽप्यात्मनः स्वसंबंधिसुखाभावादपु
रुषार्थत्वम् संबंधस्यात्माभेदोद्देशकत्वात् सुखस्यानंतसमुपादेयकथं मे प्रियमात्मन्यभेदेनप्रविष्ठा
दितिकामयमानोभेदस्यमस्याप्रबलत्वादभेदकर्तृमप्रयोजकत्वात् संबंधमात्रेण संतुष्यति॥

साधनयागाद्यनुष्ठानात्तृणांबहुत्वेनतेषामनुग्रहस्यत्वाय्यत्वान्नहि ऐश्वर्यश्रवणादिष्वितीनामनुपचारार्थत्वादित्याशंक्य दू
षयितुमनुवदति न चेति ज्योतिष्टोमादिष्विति तात्पर्यानभिज्ञतयाते षांपुणार्थतानाऽभावेनभ्रांतत्वात् श्रवणादिवि
धितात्पर्यज्ञानवतामल्पानामपिप्रामाणिकत्वात् सत्वसत्त्वादिस्वभावतोऽतिरिष्टात्मात्रेणाह देहात्मेति तदभावा-
त् बहूनुग्रहस्यायाभावादित्यर्थः यदपि सर्वथाप्यात्मसुखमात्रस्तत्र न पुरुषार्थइत्यादितदनूद्यदूषयति न चेति स
त्यंसुखसंबंधिसुखमनुपादेयमितितर्हि कथं सत्यंतत्र सुखमनुपादेयमिति आत्मनि सुखसंबंधस्यादिश्यसुखतादात्म्यस्यैवेष्य
माणत्वादितिहेतुमाह संबंधस्येति इममेवार्थं स्पष्टयति सुखमिति संबंधोपेक्षयात्तादात्म्यस्यांतरंगत्वादिति

[illegible]

गादित्याशंक्याह भेदस्यमस्येति स्वव्याललाभेणो
तोपिसाध्यत्वदर्शनादिति भावः॥

५८

ननु किमनया गुर्व्या कल्पनया सुखसंबंध एव स्वातंत्र्यात् पुरुषार्थः किं न स्यादित्याशंक्य सुखादन्यत्वात् न संबंधः पुरुषार्थ इति परिहरति नचेदित्यादिना नन्वा
त्मा चेत् सुखैकमूर्तिस्तर्हि वैषयिकसुखं न पुरुषार्थः स्यात् न हि सुखस्य सुखं पुरुषार्थः आकांक्ष्यमानत्वादिति पूर्वोक्तं स्मारयति यत्त्विति संसारिसा
विर॰ रिकं सुखमपुरुषार्थ इत्यनिष्टो ऽतः सुखमपुरुषार्थो न भवेत् सुखत्वाविशेषादिति तत्राह तस्येति यस्य कृवादीसुखस्य सुखं पुरुषार्थो न भवतीति
ध्रुते तस्य वादिनो मते सांसारिके सुखे ऽभिव्यंजकवृत्त्युपरागाद्विशिष्टे ऽनुपादेयत्वे सुखत्वं न प्रयोजकं येनात्मसुखमपुरुषार्थः स्यात् किंतु
विशिष्टतया भ्रमादनात्मत्वे आत्मत्वस्यैव पुरुषार्थत्वप्रयोजकस्य व्यवस्थापितत्वादित्यर्थः यद्वा सुखित्वस्यापि पुरुषार्थत्वेऽस्य तात्पर्यं एवं सति वै
नह्यात्मपरमात्मनोर्भेदग्राहकं मानमस्ति तयोः स्वयंप्रकाशमानत्वेन मानाविषयत्वात् विशिष्टविषयस्य मानस्य विशेषणमेदस्यैव स्वत्वेनान्यथासिद्धस्यात्मपरमात्मभेदासाधकत्वात् विशेष्याभेदग्राहकेन तत्त्वमस्यादिप्रमाणेन वा धितत्वात् नचानात्मभेदग्राहकस्य प्रत्यक्षादेर्बाधकमस्ति नचानात्मस्वरूपगोचरत्वेऽपि प्रत्यक्षादेर्भेदगोचरत्वं धर्मिप्रतियोगिभेदानां ग्रहणक्रमयौगपद्यादिविकल्पग्रासात् बाल्माश्रयान्योन्याश्रयानवस्थाप्रागलोपाविनिगमत्वाद्यनेकदोषग्रासादिति वाच्यम्

योगिभेदानां परस्परसंसृष्टतयेति द्वितीयपक्षो नोपपद्यते तथाहि तत्र क्रमपक्षे भेदग्रहपुरःसरो धर्मिप्रतियोगिग्रह इति पक्षो न युक्तः भेदज्ञानं प्रति धर्म्यादिज्ञानस्य कारणत्वेनोक्तक्रमग्रहणायोगात् अथ द्वितीयः तथापि द्वंद्विचारणीयं । किं स्वरूपेण धर्म्यादिग्रहणं भेदनिरूपकं उत घटत्वादिना उत धर्मित्वेन प्रतियोगित्वेन वा नाद्यः क्षीरनीरयोरपि तदीयभेदाग्रहणात् नापि द्वितीयः घटत्वादिना प्रतियोग्यादिग्रहणात् स्वरूपेणाभासमानयोः योरात्मापत्तयोः स्वरूपेणाभासमान दृष्टस्य भेदापत्तत्वेनान्योन्याश्रयात् अतएव न तृतीयः भेदज्ञानाधीनं प्रतियोग्यादिज्ञाने धर्मिभिन्नस्य भेदानिरूपकस्य प्रतियोगित्वात् एवं धर्मिज्ञानस्यापि भेदज्ञानपूर्वकत्वमूहनीयम् तज्ज्ञानाधीनं प्रसिद्धमिति कथं नान्योन्याश्रयः किंच भेदः । किं भिन्ने धर्मिणि वर्तते उताभिन्ने न तावदभिन्ने तत्र भेदग्राहकस्य भ्रमत्वप्रसंगात् अभिन्नं नाम भेदानधिकरणं तत्र चेद्भेदं गृह्णीयात्तेनैकं नभ्रमः स्यात् यद्यद्यस्ति । किं स्वेनैव भेदेन भिन्ने धर्मिणि ॥ ॥ ॥

विशेष्ययोर्जीवपरमात्मनोर्भेदस्याबाधः इत्यर्थः २४ =

भेदगृहीतत्वाद्धर्मिप्रतियोगिनौ गृह्णाति क्रमग्रहणायोगात् = २ =

प्रतीति ३२

दृष्टा १५

वैपरीत्येन वा गृह्णाति धर्मिप्रतियोगिनौ गृह्णाति भेदं गृह्णाति नाहं विश्वमित्यादि प्रत्यक्षम् = २ =

२२

भेदाधिकरणे २

दृष्टा ।

भेदानधिकरणे २

भिन्ने धर्मिणि भेदः भिन्ने भेदस्याधिकरणे भेदः स्यात् तदा तत्र भेदपदेन प्रथमोक्तेनैवैकत्व भेदो विधीयते वा इति २ =

प्रमाणसाध्यत्वप्रसंगात् = २

स्वयमेव भेदेन धर्मिणि भिन्ने सति स्वयमेव वर्तते वा भेदांतरेण भिन्ने धर्मिणि भेदांतरे वर्तते २ =

अभिन्नेधर्मिणि भेदस्य न स्वरूपत्वात् ॥२॥

कर्तृकर्मविरोधात् ॥१ स्वरूपभेदनिरूपणार्थं ॥ भेदान्तरेणाभिन्ने भेदः ॥१ भेदान्तरेऽपि ॥२

तत्स्वरूपं तु भेदनिरूपणार्थं स्वयमेवागतो भेदः आगतः स्वरूपं तेनैव भेदेन भिन्ने धर्मिणि तिष्ठेत् तदा कथं नान्योन्याश्रयः ॥२॥

टी॰ वे॰ मु॰ ५३

स्वयं भेदो वर्त्तते उत भेदान्तरेणाभिन्ने नाद्यः आत्माश्रयात् स्वभिन्ने स्वस्य स्वृत्तेः द्वितीयश्चेत् सोऽप्यभिन्ने धर्मिणि उताभिन्ने इति वि-
कल्पे प्रथमे भेदस्य कल्पितत्वं द्वितीये स्वभिन्ने चेदात्माश्रयः यद्भेदनिरूपणार्थं स्वयमागतः तेन भिन्ने चेत्तदान्योन्याश्रयः अथैत-
द्दोषपरिहाराय द्वितीयभेदस्याभिन्ने धर्मिणि स्थित्यर्थं तृतीयभेदस्वीकारः तदा चक्रकम् द्वयव्यवधानेन स्वस्यापेक्षणात् अथ
तत्रापि पूर्वदोषनिरासाय चतुर्थभेदः स्वीक्रियते चेत्तर्ह्यनवस्था अथ गत्यन्तराभावादनवस्थाप्याश्रीयते इति चेत्तर्हि ते भे-
दाः किं क्रमेण धर्मिणि वर्त्तन्ते उत युगपत् क्रमेण चेत्तर्हि धर्मिणोऽनादित्वप्रसंगः उत्तरोत्तरभेदेनैव पूर्वपूर्वभेदकार्यस्य धर्मि-
णि भिन्नव्यवहारस्यान्यथासिद्धेः पूर्वपूर्वभेदस्य वैयर्थ्येन प्राग्लोपप्रसंगश्च युगपच्चेत्तर्हि भिन्ने भेदस्थितिरिति पक्षहानिः
अथैतद्दोषपरिहारायैकविशिष्टेऽपरस्य स्थितिराश्रीयते इति चेत्तर्हि अविनिगमः एतद्भेदविशिष्टे एतद्भेदस्थितिरित्यत्र नियाम-
काभावात् किंच यमपि भेदाः स्वीक्रियेरन् यदि परंपरावगाहिनी का चित्संविदुदयमासादयेत् न च सास्तीति प्रमाणाभावादे-
नानन्तभेदस्वीकारः अथैतद्दोषपरिहाराय धर्मिप्रतियोगिनोर्भेदं युगपदेव प्रत्यक्षमवलंबते इत्युच्यते तर्हि नतां परस्परास-
स्वरूपतया भेदग्रहः तत्प्रतीतेर्वैशिष्ट्यावगाहित्वनियमात् ननु विशेषणविशेष्यभावेन ताहि प्रत्यक्षं भेदं गृह्णातु तर्हि भेदा-
व्यतिरिक्तभेदागोचरत्वेऽपि स्वरूपभेदगोचरत्वस्य दुरपह्नवत्वात् न च स्वरूपं भिन्नमिति प्रतीत्यनुपपत्तिः राहोः शिरः आ-
त्मनश्चैतन्यमितिवदुपपत्तेः न च भेदस्वरूपशब्दयोः पर्यायत्वापत्तिः स्वव्यवहारे इतरसापेक्षत्वानिरपेक्षत्वाभ्यां विशेषा-
त् न चाभेदे तदनुपपत्तिः एकस्मिन्नपि देवदत्ते पितृत्वादिव्यवहारार्थं पुत्राद्यपेक्षादर्शनात् ॥५१॥५२॥५३॥५४॥
वगाहित्वे च प्रतीतिर्विशेषणप्रतीति उताभ्यां काचित् नाद्यः कार्यकारणबुद्ध्योः एकत्वायोगात् न द्वितीयः विशेषणत्वेन ज्ञान-
स्याभेदज्ञानाधीनत्वात् स्वरूपेणभासमानस्य भेदज्ञानाजनकत्वायोगात् नो द्वितीयः विशेषणत्वेन ज्ञानस्य स्यावेदितत्वादिदूष-
णसंग्रहायादिपदमिति न च वाच्यमिति प्रतिज्ञायां हेतुमाह आतिरिक्तेति ननु स्वरूपमपि भेदोपपत्तिर्बाधितः भिन्नं नाम भेदा-
धिकरणं न चाभेदे आधाराधेयभावः इष्यते स्वरूपं भिन्नमिति प्रतीतिश्च सर्वजनसिद्धा तत्कथं स्वरूपं भेद इत्यत्राह न चेति
ननु स्वरूपभेदशब्दयोः प्रवृत्तिनिमित्तं भिन्नमस्ति न वा न चेत्स्वरूपं भेद इति सहप्रयोगो न स्यात् पर्यायाणां तदर्शनादिति प-
क्षं दूषयति न चेति स्वरूपपदं निरपेक्षत्वं निमित्तमादाय प्रवर्त्तते स्वरूपे भेदस्य प्रतियोग्यादिसापेक्षत्वमिति न पर्यायतेति हेतुमा-
ह स्वव्यवहार इति स्वभेदशब्दः स्वरूपशब्दः तत्प्रयुक्तो व्यवहारः स्वव्यवहारस्तस्मिन्नित्यर्थः ननु स्वरूपभेदशब्दयोः प्रवृत्तिनि-
मित्तं भेदो न युक्तः स्वरूपभेदयोरैक्ये तन्मात्रवाचकपदयोः प्रवृत्तिनिमित्तभेदस्यायुक्तत्वादिति नेत्याह न चेति तत्र हेतुः ए-
कस्मिन्निति एकस्मिन्देवदत्तेऽपि पितृपुत्रशब्दप्रयुक्तव्यवहाराय प्रवर्त्तमानानां पितृादिशब्दानां पुत्राद्यपेक्षत्वस्य प्रवृत्तिनि-
मित्तसापेक्षायादर्शनादित्यर्थः

धर्मिप्रतियोगिनोः ॥२

सहप्रयोगादर्शनात् ॥५८॥

तृदेव२ स्वरूपेणापेक्षत्वेप्राप्ते ॥= यद्यपि प्रासंगतत्राशाप्रभवातीति विवेकानसापेक्षत्वभेदस्य प्रापीति स्वरूपस्यनिरपेक्षत्वात् =१

ननु स्वरूपस्य निरपेक्षत्वेऽपि भेदस्य प्रामाण्यानवभासेऽविज्ञानं सापेक्षत्वभावपूर्वकं तथाच प्राप्ताप्राप्तविवेकात् सापेक्ष एव पदार्थो भे
दस्याव्यवस्थितः न स्वरूपेण तस्य निरपेक्षत्वादिति तत्राह नचेति तस्यापीति सापेक्षत्वस्यापीत्यर्थः यथा द्रव्यं वस्तुतः स्व
रूपेण निरपेक्षमपि हस्तवितस्त्यादिशब्देन व्यवह्रियमाणमितरसापेक्षं भवति न तु हस्तादिशब्दवाच्यं द्रव्यादतिरिच्यते तथा
यथा हस्तादिव्यवहारस्य द्रव्यान्तःपातित्वं तथा स्वरूपस्य वैलक्षण्येन स्वान्तःपातिभेदव्यवहारे सापेक्षत्वं स्वव्यवहारे निरपेक्षत्वम् =४
प्रकृतेऽपीत्यर्थः ननु स्वरूपात् किंचिद्भिन्नमस्ति न वा नाद्यः तस्मिन्निःस्वरूपत्वप्रसक्तेरकत्वापत्तिः अथ स्वरूपाद्भिन्नं ना
स्ति तर्हि स्वरूपमेकमेवेति ननु यद्यपि स्वरूपप्रतियोगिकोऽन्यभेदस्तथापि स्वरूपमेवेतरभिन्नं किं न स्यात् तथा चक्रं नः
स्वरूपमेवाखण्डमिति चेन्न स्वरूपभेदस्य प्रतियोगिनोऽनिः स्वरूपत्वे भेदस्यापि तथात्वापत्तेः स्वरूपत्वे स्वस्मादेव भेदापत्ति
रिति सिद्धान्तिमतमाशंक्य निराचष्टे नचेत्यादिना स्वरूपाद्भिन्नमस्त्येव नच तस्यास्वरूपत्वापत्तिः घटभिन्नस्य घटान्तर
स्य घटत्वादर्शनादित्यर्थान्तरन्यायेन हेतुमाह घटादिति ननु चेन्नात् घटस्याभेदेऽपि घटत्वादर्शने किं भेदान्तरप्रयोजकं किं
पूर्व१
न च प्राप्ताप्राप्तविवेके न सापेक्षत्वमेव भेदोऽस्त्विति वाच्यम् तस्यापि स्वरूपानतिरेकात् नच स्वरूपायस्याभेदस्य स
निः स्वरूपत्वापत्तिः अन्यथा स्वरूपमेवाखण्डमिति वाच्यम् घटाद्घटस्याभेदेऽपि घटत्वादर्शनात् नच घटादेकस्मा
त् घटान्तरे किंचिद्वैधर्म्यमस्त्येवेति वाच्यम् तस्यापि तस्योक्तदोषेणाभेदत्वानंगीकारात् नच वैधर्म्यसत्त्वे
व स्वरूपभेद इति वाच्यम् अनात्मस्वरूपाणामपि वैधर्म्यव्याप्तत्वात् यत्तु केश्चिदुक्तं यथा यथा घटत्वं न यमेव भेदः य
था घटादौ स्वरूपमन्योन्याभावो वैधर्म्यं च सामान्यादौ तद्द्वयमेव वैधर्म्याभावात् ॥ ॥
योगि१४
वा घटस्वरूपभेदे विशिष्टतावच्छेदकभेद इति आयमनूद्य दूषयति नचेत्यादिना उक्तदोषेणेति धर्मिप्रतियोगिभेदानंगी
कारात् इत्यत्रोक्तदोषेणेत्यर्थः द्वितीयमनूद्य दूषयति नचेति अनात्मस्वरूपाणां वैधर्म्यव्याप्तत्वेन तत्स्वरूपभेदे तदेव प्रतियोगिता
वच्छेदकमिति तद्भेदाद्वात्मनोऽनतिः स्वरूपत्वापत्तिरिति हेतुमाह अनात्मेति तथा च द्वितीयपक्षे दृष्टान्तो नास्तीति भावः न
न्वकिं स्वरूपमेव भेद उत नेति नाद्यः इतरस्यापि भेदत्वे दोषाभावात् तथाहि भिन्नधर्मिणो भेदो वक्तव्ये स्वीक्रियते न चा
न्योन्याश्रयादिदोषः स्वरूपभेदः भिन्नधर्मिणि धर्मभेदस्थिते स्वरूपभेदस्य चेतरानिरपेक्षत्वात् न केवलं स्वरूपमेव भेदः
किन्तु सर्वत्र अन्योन्याभावादयो यथायोगं भेदा इति कस्यचिन्मतं नाममात्रं यथेति घटादौ भेदत्रयं विविच्य दर्शयति
स्वरूपमिति वैधर्म्यमसाधारणो धर्मो घटत्वादि सामान्यादाविति द्रव्यत्वादित्रयं तावत् सामान्यसमवायवृत्ति द्रव्यमात्र
वृत्तित्वात् न सामान्यं सामान्ये समवायेवावर्तते तयोर्निःसामान्यत्वात् समवायस्य सामान्यवृत्तित्वेऽपि दृष्टत्वाद् वैधर्म्या

त तस्मात्स्वरूपभेदोऽन्योन्याभावस्वरूपएवभेदः सामान्यादिविशे घ्रं

ॐ
वे॰ स्तु॰
टी॰ ५८

अभावोऽन्यभावाश्च यत्र न तत्रैव वैधर्म्यं नापि तत्रान्योन्याभावः अभावेऽभावानंगीकारात् तस्मात्तत्स्वरूपमेव भेद इत्यर्थः तत् दूषयति तन्नेति पदार्थमात्रेऽनुगततत्वेनावधूपकत्वादिति हेतुमाह स्वरूपभेदस्येति तत्र भेदव्यवहारोपपादकत्वं वैधर्म्यादीनां तत्स्वं तत्कार्यस्वरूपभेदस्यावधूपकत्वमिति तत्राह इतरयोश्चेति अन्योन्याभाववैधर्म्ययोरंगीकारवैयर्थ्यात् अप्रयोजकत्वेनेति तृतीयाऽन्योन्याभावे तथा तत्तद्रूपेणांगीकारो व्यर्थ इत्यर्थः तत्र हेतुः व्यभिचारादिति सर्वत्रानुगतत्वादित्यर्थः ननु व्यभिचारेऽपि व्यवहारप्रयोजकं किं न स्यादिति तत्राह एकाकारेति यथा घटो घटोऽयमिति व्यवहारेऽनुगतं घटत्वं नाम सामान्यमेव प्रयोजकं न व्यक्तिरननुगतत्वादन्यथा ज्ञानेऽसिद्धिप्रसंगात् तथा चानुगतव्यवहारे प्रयोजकमनुगतमेवेति नियमः एवं स्वरूपभेदस्य भेदव्यवहारविषयस्यानुगतस्यासंभवेऽननुगतमन्यद्वैधर्म्यादि तद्व्यवहारप्र

अभावे स्वरूपमेवेतरासंभवादिति तत्र स्वरूपभेदस्यावधूपकत्वात् इतरयोश्चाव्यभिचारात् भेदव्यवहाराप्रयोजकत्वेनांगीकारवैयर्थ्यात् एकाकारव्यवहारस्य चैकरूपविषयसाध्यत्वनियमात् न च स्वरूपभेदपक्षे स्वस्मादपि स्वस्य भेदः स्यादिति वाच्यम् स्वस्य प्रतियोगिकोटिनिवेशेनास्य धर्मिणो विरहात् धर्मिकोटिनिवेशे वा प्रतियोगिनोऽभावात् न च भेदस्वरूपयोः परस्परान्तर्भावेनान्यतरपरिशेषापत्तिः भेदस्य स्वरूपानतिरेकात् न च स्वरूपभेदः किं भिन्नो भेदव्यवहारप्रयोजकोऽभिन्नो वेति विकल्पावकाशः उपस्थितवस्तुमात्रे धर्मिप्रतियोगिज्ञानापेक्षानपेक्षाभ्यां भेदाभेदव्यवहारयोर्जायमानत्वात् ॥।॥

योजकं न युज्यत इत्यर्थः ननु स्वरूपभेदस्य [illegible] न भेदव्यवहारहेतुता स्वरूपेणाभेदात्मनि तद्व्यवहारादर्शनादन्यथा स्वस्मादपि स्वस्य भेदः स्यादिति नेत्याह नचेति स्वरूपमितरसापेक्षं भेदव्यवहारहेतुरिति प्रागेव निवेदितम् यद्वा स्वस्मादपि स्वस्य भेदापत्तिरिति तत्राह स्वस्येति भेदस्य च धर्मिप्रतियोगिघटितत्वनियमादित्यर्थः ननु स्वरूपभेदयोरभेदे किं स्वरूपं भेदे प्रविष्टमिति स्वरूपे वा भेद इति नाद्यः भेद इत्येव व्यवहारः स्यान्न स्वरूपमिति न द्वितीयः भेदाकारप्रतीतेरभावप्रसक्तेरित्यत आह नचेति अन्यतरपरिशेष इति नहि किंचित्परिशिष्यते स्वरूपमेवेत्याह भेदस्येति कथं तर्हि भेदव्यवहार इति चेन्न धर्म्यादिसापेक्षस्य स्वरूपस्यैव तदाकारव्यवहारहेतुत्वादित्यसकृदावेदितत्वादिममेवार्थं प्रकटयितुं परकीयं चोद्यमनूद्य निरस्यति नचेति ॥

ननु जन्मत्वमेव जन्मस्य मायिकत्वसमर्पकमित्यत्र प्रपंचस्य मायिकत्वेन मिथ्यात्वं प्राक् निरूपितं तत्र च प्रत्यक्षादिकं न प्रव
र्तते मानाभावात् सिद्धत्वात् कल्पितप्रतियोगिकभेदस्यापि कल्पितत्वेन तत्प्रत्यक्षाद्यविषयत्वाच्च. ततः कथं प्रत्यक्षादिबलेन आत्मन
भेदो ब्रह्मात्मैक्यं प्राक्तन इति सिद्धान्तीप्राकृते नन्विति अज्ञानकार्यत्वेऽनन्तत्वस्यासिद्ध्या त्वन्मते वा प्रपंचस्यासिद्धं ब्रह्मकार्यत्वश्रवणा
द् ब्रह्मणश्च सत्यत्वेन तत्कार्यस्य प्रपंचस्यापि सत्यत्वावधारणात् तथा च सत्यप्रतियोगिकभेदस्यापि सत्यत्वात् प्रत्यक्षादिविषयत्वं ज्ञायते
ति प्रपंचभेदस्यात्मनि ज्ञानमेवेत्यभिप्रायेण पूर्वपक्षी सिद्धान्तिमतं दूषयति नन्वस्यैवेत्यादिना नत्वश्रुतिः प्रपंचस्य ब्रह्मकार्यत्वं प्र
तिपादयत्यपि न नत्वश तत्तस्य कार्यकरणं च विद्यते तदेतद्ब्रह्मापूर्वमनपरमित्यादिविरोधादिति तत्राह वहुश्रुतिगतेति
सामान्यन्यायेनाभ्यासस्य तात्पर्यग्राहकत्वाच्च तस्य च श्रुतेः सद्भावात् तत्त्वमेव श्रुते स्तात्पर्यं युज्यते उदाहृत विरोधिवाक्यस्य सदे
हेतुयाभावश्रुतिपरत्वेन तयायुक्तत्वेनेति भावः वहुश्रुत्यश्रवणमुदाहरति सदेवेति इदं परिदृश्यमानं जगदग्रे सृष्टेः प्राक् स्थूले
रूपपरित्यागेन सदित्येवासीत् हे सोम्य प्रियदर्शनेत्यर्थः एवमिति यथा एकस्मादग्नेः स्फुलिंगावयवविस्फुलिंगा विविधं
नन्वज्ञानकार्यत्वं प्रपंचस्य पूर्वमुक्तं तत्कथं प्रत्यक्षाद्यविरोधेन भेदाशंकेति चेन्न तस्यैवासिद्धेः ब्रह्मकार्यत्वस्य वहुश्रुतिश्रवणा
त् सदेव सोम्येदमग्र आसीत् यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति एतस्मादात्मन आकाशः संभूतः
यथाग्नेः क्षुद्रा विस्फुलिंगाः एवमेतस्मादात्मनः सर्वे देवाः सर्वे लोकाः सर्वे एते आत्मानो व्युच्चरन्तीत्यादिश्रुतिभ्यः
नाना उच्चरन्ति उद्गच्छन्ति एवमेतस्मादिति ज्ञानमयस्य प्राप्तवोधाय तस्य रूपं तस्मादात्मनः स ॥ जन्माद्यस्य यत इति न्यायाच्च ॥ १ ॥
र्वे देवाः प्राणाद्यधिष्ठातारोऽग्न्यादयः लोकाः कर्मफलानि आत्मानः उपाधिसंपर्कजनित नवद्भासमानविशेषात्मानस्त्यर्थः ब्र
ह्मणो जगत्कारणत्वेन केवलं श्रुतिसिद्धं किं तु युक्तितोपीत्याह जन्माद्यस्येति अस्य जगतः प्रत्यक्षादि प्रपंचस्यापि तस्य जन्म
स्थितिभंगं यतः सर्वज्ञात् सर्वशक्तेर्भवति तद्ब्रह्मेति सूत्रार्थः अत्रेयमधिकरणरचना यतो वेमानीत्यादि वाक्यं किं ब्रह्म न लक्षय
ति उत लक्षयत्येकस्यो भयहेतुत्वासंभवाभ्यां संदेहे एकत्र नवमानानन्तगुणापादेकस्योभयहेतुत्वात् स्थितौ भावेनाशक्तानुमा
नत्वादेकस्य हेतत्वस्य चलत्वान्नि वक्तृपरिच्छेदात् लक्षयत्यात्मा ब्रह्म न लक्षयतीति प्राप्ते पूर्वमति प्रभवते नान्मानस्यासंभावित
दोषस्याऽयोरूपयते नापरत्वदोषानुमानग्राहकत्वादतीन्द्रिये धर्मे सतोः प्रमाणत्वादागमिकोभयहेतुत्वे स्वत्वादिदृष्टान्ते
नसंभावनामात्रहेतुत्वाद्वस्तुतः परिच्छेदात् लक्षणस्य ब्रह्मसिद्धेर्जगज्जन्मिन्यायादानंदं सच्चिदानंदं ब्रह्मेति लक्षयतीति सि

व संभ४४

विषयोऽविषयश्चैव पूर्वपक्षस्तथोत्तरं प्रयोजनं च पंचैतेऽधिकरणं विदुरिति यत्र यतो वेत्यादिवाक्यो विष
यः न लक्षयति किं वा कोऽविषयः किं ब्रह्म न लक्षयति उत लक्षयतीति संदेहे न लक्षयतीति पूर्व
पक्षः लक्षयतीत्युत्तरं ५= तदस्य लक्षणं १= स्वरूपलक्षणं =१

Left margin notes:

ननु स्थूलस्य सूक्ष्मस्य कार्यं स्थूलशरीरं कारणं सूक्ष्मशरीरं न विद्यते नास्त्येवेत्यर्थः ६=

ब्रह्मणः उपादानत्वं निमित्तत्वं च ४=

ब्रह्मणः उपादानत्वं निमित्तत्वं च वा २

Right margin notes:

अज्ञानकार्यत्वमेव २=

न तिसामान्यन्यायेन निर्देशः तस्य तेऽभ्यासस्यापि तात्पर्यग्राहकत्वमेव निरूपितम् = ४=

अज्ञानकार्यत्वस्यैव ५=

॥ श्रीः ॥

समाने ५= तत्र हेतुमाह

ॐ वे॰ सू॰ टी॰ ५८

ननु यथा प्रपंचस्य ब्रह्मकार्यत्ववादिन्यः श्रुतयः संति तथा ज्ञानकार्यत्ववादिन्योपीति शंकते नन्वज्ञानेति सत्स्वेनेति
साभासमज्ञानं सत्स्वः तद्धेदमिति तदिति बीजावस्थं जगदुच्यते एतिहस्य प्रयोगे ह शब्दः इदमिति व्याकृतावस्थं तदिदं शब्द
योः सामानाधिकरण्यात् परोक्षापरोक्षावस्थस्य जगत एकत्वमवगम्यते तदिदं जगद व्याकृतं साभासाज्ञानात्मकमेवासीदित्य
र्थः इंद्र इति इंद्रः परमेश्वरो मायाभिर्ज्ञानैरनंतैः परमार्थतः पुरुरूपो बहुरूप ईयते गम्यते इत्यर्थः ननु सत्स्वमव्याकृतं तदि प्र
ह्लानाज्ञानमात्रवाचकास्तेषामज्ञानात्मोपस्थापकत्वादित्याशंक्यासत्त्वान्मायादिपदांकितवाक्यसदाह इति मायांवि
द्यादिना प्रकृतिरुपादानमित्यर्थः कार्यकारणयोः साम्यादित्यभिप्रायः नासदासीदिति असदभावः सद्भावस्तदुभयम
वेदांते=१ अध्याये प पि नासीत् तमः शब्द आवरणप्रधानाज्ञानवाचक इति एकाश्रयविषयमिति यावत् पूर्वोक्तार्थश्रुतेरन्यथाह कांचुलिम
प्याह मायामात्रमिति उत्तरतंत्रे तृतीयस्थितं अत्रेदं विषयवाक्यमामनंति स यत्र प्रस्वपितीत्युपक्रम्य न तत्र रथा न र

नन्वज्ञानकार्यत्वमपि बहुशः श्रूयते सत्स्वनैवेदमाहृतमासीत् तद्धेदं तर्ह्यव्याकृतमासीत् इंद्रो मायाभिः पुरुरूप ईयते
मायां तु प्रकृतिं विद्यात् नासदासीन्नो सदासीत् तम आसीदित्यादिश्रुतिभ्यः मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्व
रूपत्वादिति न्यायाच्च एवं तर्हि श्रुतीनां परस्परविरोधान्नोभयमपि कारणमस्तु किं तर्हि जगत्कारणमिति चेन्न ॥

पथो गा इत्यादि तत्र संशयः किं स्वप्ने बोधवद्वस्तमेपि पारमार्थिकार्थक्रियासमर्था सृष्टिः उत मायामयी प्रातीतिकसत्तामात्रेयता
इति किं तावत् प्राप्तं पारमार्थिकीति कुतः श्रुतिप्रामाण्यात् अथ रथान् रथयोगान् पथः सृजत इति श्रुतेः रथादीनां
सृष्टिरत्र स्वप्ने प्रतीयते तत्र च श्रुतिप्रामाण्यात् पारमार्थिक्येव सृष्टिरिति एवं पूर्वपक्षे सिद्धांतयति मायामात्रमित्यादिना तु
शब्दः पूर्वपक्षं व्यावर्तयति नैतदस्ति स्वप्ने सृष्टिः पारमार्थिकीति कीदृशी तर्हि सृष्टिस्तत्राह मायामात्रमिति
मायैव सृष्टिर्न परमार्थगंधोप्यस्तीत्यर्थः कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् नहि कार्त्स्न्येन पारमार्थिकवस्तुध
र्मेणाभिव्यक्तस्वरूपः स्वप्न इति अत एव स्वप्नसृष्टिर्न पारमार्थिकी सृष्टिमाह न तत्र रथा इत्यादिप्रामाण्येन सृष्टिश्रु
तिविषयाणां रथादीनां स्वप्ने निषेधाच्च न स्वप्नसृष्टिः पारमार्थिकीति किंत्वविद्योपादानैवेति अत्र तटस्थः शंकत
ते एवं तर्हीति कथं तर्हि निष्कारणं कार्यं स्यादिति शंकते किं तर्हीति ॥ ॥

श्रुतिः

कारणं न तस्य सत्त्वान्निष्कारणं कार्यमिति परिहरति यथायोग्यमिति स्वसिद्धान्ते यादृक् कारणं भवितुं योग्यं परमा
ण्वादि तादृगस्त्येवेत्यर्थः तत्र त्रसरेणुस्तावदारब्धः महत्त्वे सति द्रव्योपादानत्वात् कपालादिवदिति त्रसरेणोः कार्यत्वसि
त्रसरेणोः २= द्धौ एवं तदवयवेष्वप्यूह्या तथाच विवादाध्यासितं कार्यद्रव्यं त्रसरेण्ववयवावयवस्वपरिमाणादणुतरपरिमाणारब्धं का
र्यद्रव्यत्वात्सम्मतवदिति य एव द्व्यणुकपरिमाणापेक्षयाल्पतरपरिमाणो द्व्यणुकारंभकः स एव परमाणुर्जगतो मू
लकारणमिति वैशेषिकादयो मन्यन्ते एवं प्रधानादिवादेऽप्यूह्यमिति भावः प्रपंचस्य परमाण्वादिजन्यत्वे प्रकृ
तोपयोगमाह तस्मादिति यस्मात्तत्तदुपादानस्य सत्यता पृथिवीकार्यस्य पृथिवीत्ववृत्तं सत्यं च परमाण्वादिज
परम.णां२= न्यस्तदुपादानप्रपंचोऽपि सत्य एव तस्मादनात्मश्रुतियोगिके भेदे प्रमाणिके सति कथमद्वैतमित्यर्थः एवमनात्म
भेदं पूर्वपक्षे उपपाद्य तन्निराकरणं प्रतिजानीते मैवमिति तत्र किमिति श्रुत्यभिप्रायापरिज्ञानं श्रुत्यर्थाभिज्ञेन त्वया

यथायोग्यं परमाण्वादिकमेव तस्मादनात्मभेदे प्रत्यक्षादिसिद्धे जागरूके कथमद्वैतसिद्धिः तदयं संग्रहः आत्माऽभे
दप्रमित्यापि नाद्वैतं तेन प्रसिद्ध्यति अनात्मभेदसंसिद्धेः प्रत्यक्षादिप्रमाणतः मैवम् श्रुत्यभिप्रायापरिज्ञाना
त् नहि तत्त्वमस्यादिश्रुत्या अनात्मा न पृथक् स्यात् अपि त्वात्मब्रह्मणोरभेदो बोध्यते इति श्रुत्यभिप्रायः किंत्व
प्रत्यक्चैतन्यैकदृष्टे जागराद्यवस्थात्रयं कल्पितान्यः नर्थजातं च व्यभिचारि सर्वं ॥

संसारधर्मेभ्यो निष्कृष्टस्य तत्कर्तृत्वादिभ्यो निष्कृष्टेन त्वत्र संसारधर्मादीनां पृथगवस्थितत्वाभिधानादिति तत्राह तर्हीति कु
तत्त्वपदयोः२= र्यन्तर्हि तयोरभेदो बोध्यते इति जिज्ञासायामाह किंत्विति जिज्ञासितं स्वरूपमुपपादयति प्रत्यगिति सुषुप्तान्तःकरणा
वधारयतीत्यन्वयः तत्र वाक्ये यद्यपि तत्त्वे पदार्थज्ञानं सर्वकत्वाद्याकार्यज्ञानं सेतीति मन्वानः त्वंपदार्थशुद्धिप्रकार
माह जागरेत्यादिनेति निश्चित्येत्यन्तेन विज्ञानं व्यावर्तयति प्रत्यगिति सर्वान्तर इत्यर्थः एतेन विशेषणेन सादिसादृश्या
न्वयव्यतिरेकौ सूचितौ अवस्थादीनामध्यस्तत्वं चोक्तं पूर्वमधिकरणं विशिनष्टि कूटस्थेति अविकारिणीत्यर्थः तेन
वस्तुतो विकाराभावाद् ज्ञानस्वरूपेणैव न्याकारत इत्यर्थः एतेन कार्यकारणान्वयव्यतिरेकौ सूचितौ दुःखत्वप्रेमास्पदत्वा
ख्यान्वयव्यतिरेकं सूचयितुं विशिनष्टि अनर्थजातमिति व्यभिचारीति व्यभिचार्यन्वगततत्त्वात् ख्यान्वयव्यतिरेकसू
चनाय विशेषणं सर्वपदं पूर्वोक्तमवस्थापयति ॥ ॥ अननुगत

तत्रैव कूटस्थ इत्यर्थः तस्याधिष्ठानतामाह अनुगत इति स्वसत्ताप्रदस्फूर्तिप्रदत्वमुभयथापि तद्विशिनष्टि
साक्षिणीति एतच्च विशेषणद्वयं अन्वयाद्युपपादनेनोपपन्नमेव उपलक्षणं चैतत् परप्रेमास्पद इति बोद्धव्य
म् अध्यस्तत्वस्य फलमाह इतीति इति शब्दो हेतौ यतोऽध्यस्तमतस्तदधिष्ठानस्वरूपं चैतन्यं तद्भेदेन स्वातंत्र्येणेति
यावत् तस्याध्यस्तस्य स्वरूपं सत्ता नास्तीति निश्चित्यावधारयतीत्यन्वयः तदेवावधारणप्रयोजनमाह शुद्धेनेति
ब्रह्मणापीत्यपिशब्दः प्रत्यक्चैतन्यपरामर्शार्थः इत्थं च चतुर्विधान्वयव्यतिरेकसिद्धये विशिनष्टि अनन्व
गतमित्यादिना अधिष्ठानं शून्यमिति बोद्धः तं पराचष्टे सदिति स्फूर्तिस्वरूपप्रदर्शनाय विशिनष्टि अधि

तत्रैवानुगते साक्षिण्यध्यस्तमित्यन्वयव्यतिरेकाभ्यां तदतिरेकेण तत्स्वरूपं नास्तीति निश्चित्य शुद्धेन
प्रत्यगात्मना साक्षिणोऽभेदसिद्ध्यर्थं ब्रह्मणापि जगत्कर्तृत्वपरोक्षत्वादि आकाशादिकं च जगज्जातम
नन्वगतमनुगतेन तस्मिन्सच्चिदानंदात्मन्यध्यस्तारोपितमसद्रूपत्वेव प्रतिपन्नमित्यन्वयव्यतिरेकाभ्या
मध्यारोपापवादन्यायमाश्रित्य प्रवृत्तस्य श्रुतिवाक्यसमनंतरप्रवृत्तेन नेति नेतीत्यादिवाक्येन चावधारयति॥

परशब्दोऽत्र निषेधार्थः तेन तत्पराकृत्येत्यर्थः =।

ष्ठानं चिदात्मनीति अधिष्ठानभेदेनासत् तस्य प्रमाणगम्यत्वं परिहरति भ्रांत्यैवेति इत्थंभावे तृतीया तदात्मनैव
व प्रतिपन्नमतस्तदाह असदिति वस्तुतोऽसदित्यर्थः अवधारणक्रियायां साधनमाह इत्यन्वयेति चतुर्विधान्वय
व्यतिरेकाभ्यामित्यर्थः अन्वयव्यतिरेकयोस्तर्कत्वेन संभावनामात्रहेतुत्वेपि अप्रमाणत्वादवधारणहेतुत्वं न सं
गच्छते इत्याशंक्याह नेतीति ननु निषेधः प्राप्तिपूर्वकः तदभावे कथं स इति तत्राह दृष्टिरिति तर्हि प्रामा
णिकत्वात्तन्निषेध इति चेत् न अविद्याप्रत्युपस्थापितानुवादत्वात् किमर्थं तर्हि श्रुतिरनुवदतीति चे
त्तत्राह अध्यारोपेति ॥१॥

त

अवस्थानात्मत्वं तत्त्वमस्य प्रत्यगात्मनि ब्रह्मणि च जगत्कर्तृत्वादेरध्यस्तत्वनिश्चयस्य फलमाह ततइति ततो गुरुमुपसर्पतीत्य
न्वयः ततः कर्तृत्वादिप्रपंचस्य कल्पितत्वज्ञानानंतरमित्यर्थः ननु गुरूपसर्पणं निश्चयार्थं स चेद् ज्ञातो विषयाज्ज्ञातः किं त
दुपसर्पणेनेत्यत आह संदिहान इति संदेहे हेतुमाह श्रुत्युक्त्योरिति ननु तत्त्वंपदार्थयोर्भेद एव प्रमाणं दृश्यते नाहमीश्व
र इत्यादिरित्यत आह लक्ष्यपाशयोरिति को वा लक्ष्यपाश इत्यत आह शुद्धेति शुद्धत्वमुपपादयति तिरस्तेति प्रत्यक्षादेरना
त्मविषयत्वादात्मभेदग्राहकत्वं न युक्तमिति भावः ननु ज्ञप्तिपूर्वेव भेदकानात्मसंबंधस्यात्मन्यध्यस्तत्वनिश्चयेनाभावा
द्भेद एवात्मब्रह्मणोर्भविष्यतीत्यत आह अभेद इति युक्तेस्तर्कत्वेन स्वातंत्र्येण प्रमाणत्वाभावात्तत्राभेदप्रमापकत्वेन से
ति ननु प्रमाणाऽदर्शनमसिद्धमधीतवेदस्यैवाधिकारादित्यत आह संदिहानेति यद्यपि गृहीतपदार्थसंग पद २
र्थ तिना श्रुतेः शाब्दोऽप्रत्यायक एव तथाप्यसंभावनाग्रस्तविषयत्वात्तत्र शाब्दप्रत्ययः प्रतिष्ठां न लभते इति ततत्र प्रमा

ततः श्रुत्युक्त्योस्तत्त्वंपदार्थयोः लक्ष्यांशयोर्निरस्तसमस्तानात्मसंबंधयोर्भेदेऽभेदे वा प्रमाणमपश्यन्संदि
हानः संसाररोगराजानुचरगर्भवासाद्यनेकरोगसमुद्भूतदुःखजातानुभववासादितो द्वेगः ब्रह्मलो
कप्रभवमपि सुखं विषमिव मन्यमानः तरति शोकमात्मविदिति श्रुत्या संसारदावानलप्रसूततंतापो
पशमनामृताब्धिमात्मविद्यामजानानः परमजिज्ञासुर्गुरुं स्वरूपापरोक्षदर्शिनं परमकारुणिकमुपसर्पति ते
— न श्रुत्युक्त्योस्तत्त्वंपदार्थयोरभेदे तत्त्वमादिवाक्येनानित्यनिर्दोषेण बोधिते स्वयमेवाद्वैततत्त्वसाक्षात्कृत्य स्वानंदः प्रमा

णत्वेन व्यवह्रियत इति भावः एतेन नित्यानित्यवस्तुविवेक इत्यधिकारिविशेषणमर्थान्निरूपितम् इदानीं वैराग्यमधिकारिविशे
षणांतरमाह संसारेति ननु तथापि गुरूपसदनमनुपपन्नं तदुपसदनस्य संसारनिवृत्त्यहेतुत्वात् न चाचार्यादेव विद्या इत्यादि गुरूपसदन २
श्रुतेः संसारनिवर्तकज्ञानहेतुत्वं गुरूपसदनस्येति वाच्यम् आत्मज्ञानस्यानित्यनिवर्तकत्वे प्रमाणाभावादित्याशंक्याह तरतीति त संसार ३
नु स्वर्गसाधनं याग इति जानन्नपि न सर्वो वैदिको यागे प्रवर्तते एवं तितिक्षुश्चिंत्यं भवतीत्यत आह परमेति परमं परिपूर्णं ब्रह्मात्मै
क्यानंदपरोक्षज्ञानेप्सुः तथा च यस्येच्छा स प्रवर्तते नान्य इति भावः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिमाश्रित्य गुरुं विशिनष्टि अप
रोक्षेति उपसर्पतीत्यत्र शास्त्रोक्तविधिनेति शेषः गुरुः कुत्र माह तेनेति वाक्यप्रामाण्यमुपपादयति नित्येति यद्यप्यस्मिन्मते
वेदस्यापि कल्पितत्वात्ततोऽनित्यत्वं तथाप्यबुद्धिपूर्वकत्वात्प्रयत्नाजन्यत्वान्नित्यत्वोपचारः बालबुद्धेरपि साक्षाद्दर्शयति स्वयमेवेति
साक्षात्कृत्येत्यनंतरमानंदप्राप्त्यवरकमज्ञानं सविलासं बाधित्वेति च पदशेषः तत्फलमाह स्वानंदेति ॥

वे० मु० टी० ६२

ननु च सर्वभेदोच्छेदात्सर्वाद्वैतमेव तत्त्वमस्यादिवाक्यावगम्यमित्यभिप्रायः सिद्धमित्युपसंहरति अत इति यत्तु पूर्वपक्षे स्वरूप भेदः प्रत्यक्षादिगोचर इति तद्विरोधान्न वेदांतप्रामाण्यमिति तद्दूषयितुमनुवदति यच्चेति असद्विषयत्वेनेति परोक्षत्व निवर्तनादिति श्रुतेः प्रत्यक्षादेरनात्मविषयत्वमित्यर्थः स्वरूपस्य सद्रूपत्वेनात्मत्वात्तदात्मनि भेदे प्रत्यक्षादिप्रवृ त्तिर्युक्तेति भावः ननु सर्वप्रत्ययवेद्यं स्वरूपमिति भवतो मतम् तत्कथं तस्य प्रत्यक्षाद्यविषयत्वमित्याशंक्याहेत्यंतरमाह स्वरूपस्येति स्वरूपस्य शुद्धत्वमुपाध्यसंस्पृष्टत्वं विशिष्टत्वमुपाधिसंबंधकत्वं आद्य इति शुद्धस्वरूपमेव भेद इति पा ठे इत्यर्थः व्यवहारेति अयमर्थः ब्रह्मणो नावच्छिन्नस्वाभाविकोऽयमर्थो अविकारिस्वभावत्वात् उपाधिकस्तु पाध्यसं सर्गेण न संभवतीति शुद्धपदमहिम्नानिर्थमेकत्वं वक्तव्यत्वेन प्राप्तं तथा च व्यवहारविषयत्वमपि नास्तीति वक्त

अतः सत्यमभिप्रायापरिज्ञानविजल्पितमेतत् यदनात्मभेदेनाद्वैतहानिरिति यच्च स्वरूपभेदः प्रत्यक्षादिगोच र इति तदनितरूच्छे प्रत्यक्षादेरसद्विषयत्वेन स्वरूपागोचरत्वात्स्वरूपस्य भेदत्वानुपपत्तेश्च कुत इति चेत् शृणु किं शुद्धं सर्वधर्मविनिर्मुक्तं स्वरूपं भेदः किं वा विशिष्टम् आद्ये व्यवहारहेतुत्वमपि तस्य नास्तीति वक्तव्यम् तथा च सर्वव्य वहाराणामसदेसर्वधर्मविनिर्मुक्तमस्थूलानण्वादिशास्त्रसिद्धं सदात्मकं ब्रह्मैव नामांतरेण प्रत्यक्षादिगोचर इ त्युक्तं स्यात् न च तदुपपद्यते न च तद्वागप्युच्यते नैव वाचानान्यदेवैतल्लपमाकमेणावेत्यादिश्रुतिविरोधप्रसंगाव

व्यवहारो हि द्विविधः नामव्यवहारो रूपव्यवहारश्चेति — अभिवदनं शब्दप्रवृत्तिरूपः १

द्यं तथा हि व्यवहारो हि अभिवदनमभिज्ञा वा नाद्यः धर्मप्रसादायैव शब्दप्रवृत्तिस्तदभावे कथं स्यात् स्वप्रकाशत्वादेव न द्वि तीयः ततो व्यवहाराणामसदेस्वरूपं वक्तव्यमिति अस्त्वेवं किं तत आह तथा चेति नन्वस्थूलमित्यत्र नञः प्रसज्यार्थकत्वादभाव रूपेण ब्रह्मणः स्यादिति नेत्याह सदात्मकमिति कल्पितस्य स्थूलत्वादेरधिष्ठानभेदेनासत्वादसदभावस्य भावत्वात्सदा त्मकं ब्रह्मेत्यर्थः नामांतरेणेति भेदः प्रत्यक्षादिगोचर इति वदता भेदस्योक्तस्वरूपात्मकब्रह्मानतिरेकात् ब्रह्मैव भेद इति संज्ञांतरेण प्रत्यक्षादिगम्यमित्युक्तं स्यात् तथा च नानिष्टापत्तिरिति भावः ननु कथमपि प्रपंचभेदः प्रामा णिकस्त्वेनावतापि अस्मदिष्टसिद्धिरित्याशंक्याह न चेति भेदस्तावदतिरिक्तस्त्वयैव न स्वीक्रियते ब्रह्मात्मकत्वेन तस्य स्वप्रकाशत्वात् प्रत्यक्षादिविषयत्वनिषेधाच्च न भेदस्य ब्रह्मस्वरूपत्वेनापि प्रामाणिकतेत्यर्थः सर्वप्रत्ययवेद्यत्वमुपहितेऽपव

स्वरूपात्मनि २ — सि २ — भेदशब्दवाच्यत्वेन २ — ज्ञानविषयत्वरूपाभिज्ञा व्यवहारः १ — आधाराधेयभावा पेक्षत्वात् २ — भेदधारोपितं तत्काल्पे ३ — भेदशब्दवाच्यत्वेन प्रत्य क्षादिव्यवहारविषयत्वेन २ — ततस्तु इति भावः — ६२

न चहुक्तेत्यादि १ — शुद्धस्य व्यवहारविषयत्वे ऽनिष्टापत्तिः ३ — विशिष्टे १

विशिष्टस्वरूपमेव तर्हि भेदः स्यात् तत्रोक्तदोषाप्रसंगादित्याशंक्य द्वितीयमनुवदति द्वितीय इति विशिष्टस्वरूपं भेद इ-
ति यद्यपीदं च विवेचनीयम् विशेषणविशेष्ययोर्भेदे सति विशिष्टस्वरूपान्तरं विशेषणादिभेदादन्यदिति वक्तव्यम् उत विशे-
षणादिभेदाभाव एव विशिष्टस्वरूपं भेद इति वक्तव्यमिति विकल्प्याद्यमनुवदति विशेषणेति आद्यपक्षमंगीकारयि-
त्वा दूषयति तथा चेति विशेषणविशेष्यभेदो विशिष्टस्वरूपभेदोपपादकः किं विशिष्टभेद एव उत भेदान्तरम् आ-
द्ये आत्माश्रयः द्वितीये अन्योन्याश्रयः अथ विशेषणविशेष्यभेदोपपादकस्तृतीय एव विशिष्टभेदः स्वीक्रियते तेन दाच
उक्तं च तुर्थः न वस्येत्यर्थः द्वितीयपक्षं दूषयति अभेदे वेति विशेषणविशेष्ययोरभेदे ऽन्यतरपरिशेषाद्विशिष्ट-
स्वरूपासिद्धिरित्यर्थः विशिष्टस्वरूपात्मकत्वे भेदस्य प्रामाणिकत्वं न स्यादिति हिन्त्वेतरमाह न वेति किं च विशिष्ट

द्वितीये विशेषणविशेष्ययोर्भेदे विशिष्टस्वरूपान्तरं भेद इति वाच्यम् तथा च तत्राप्यन्यत् तत्राप्यन्यदिति से-
वउरुत्तरानवस्था अभेदे वा विशिष्टस्वरूपासिद्धिः न वा विशिष्टं स्वरूपं प्रत्यक्षादिगोचरः तस्यापि अ-
द्धवस्तुवन्निर्धर्मकत्वात् न हि रूपादिविशिष्टे रूपादयः सन्ति न च विशिष्टं नाम किंचिद्वस्त्वस्ति वि-
शेषणविशेष्यसंबंधातिरिक्तस्य तस्याननुभवात् तेषां च प्रत्येकं समुदायाभ्यां विशिष्टव्यवहाराजन-
—नात् न च संबंध एव विशिष्टं विशेषणविशेष्यतत्संबंधाइत्यत्र संबंधेपि तद्व्यवहारादर्शनात् वि-
शेषणविशेष्ययोस्तद्व्यवहाराभावप्रसंगाच्च ॥

स्वरूपं किल भेदः तत्र विशिष्टं किं विशेषणादिभ्योन्यत् उतानन्यत् आद्यं दूषयति न चेति द्वितीयं द्वेधा विकल्प्य
दूषयति तेषां चेति विशेषणविशेष्यसंबंधानां प्रत्येकं विशिष्टत्वे केवलदंडेपि विशिष्टव्यवहारः स्यात् न च सोस्ति केव-
लदंडस्य विशिष्टव्यवहाराजनकत्वात् एवं विशेष्यसंबंधयोरप्यूह्यम् समुदायः के मते भ्योऽतिरिक्त एव यते एव वा आ-
विशिष्ट = ३ = द्ये दूषणं पूर्वमुक्तम् द्वितीये प्रत्येकं तद्व्यवहारापत्तिः तर्हि पूर्वोक्तदोषापन्नत्वे विशेषणविशेष्ययोः संबंध एव विशिष्ट इ-
ति नेत्याह न चेति किं विशेषणादिव्यावृत्तः संबंधो विशिष्ट उत तदुपलक्षितः आद्ये निरासे हेतुमाह विशेषणेति अ-
पि शब्दो विशेषणादिदृष्टान्तार्थः द्वितीयं दूषयति विशेषणेति तद्व्यवहारो विशिष्टप्रयुक्तव्यवहार इत्यर्थः न हि देवदत्तगृह्य

॥ [illegible]

भेद॰१=

वे॰ मु॰ किंच स्वरूपं भेद इति वदन् प्रष्टव्यः किम स्वरूपप्रतियोगिकः उत स्वरूपप्रतियोगिकः नाद्यः निःस्वरूपस्य तुच्छत्वे
टी॰ न तत्प्रतियोगिकभेदस्यापि तुच्छत्वापत्तेः द्वितीयं दूषयति नवेति अयमर्थः स्वरूपप्रतियोगिको भेदः किं प्र
६२ तियोगिनः स्वरूपमुत धर्मिणः नाद्य इत्याह नाशेति तत्र हेतुः तस्येति भिदिर् विदारण इति स्मृतेर्विनाशः प्र
तदेव स्पष्टयति नहीति नद्वितीयः स्वरूपत्वस्य प्रतियोगितावच्छेदकत्वे तदनधिकरणस्य धर्मित्वे निःस्वरूपत्वा
दाश्रयत्वानुपपत्तेः अथ स्वरूपभेदेन स्वरूपत्वं प्रतियोगितावच्छेदकं किंतु वैधर्म्यं स्वरूपभेदस्य सर्वत्र वैधर्म्य
त्र२४ व्याप्तत्वादिति चेन्न वैधर्म्यं हि तद्भिन्नत्वे सति तद्वृत्तित्वं न चेतरधर्मज्ञानाधीनज्ञानं प्रतियोगितावच्छे
दकज्ञानाधीनं च भेदज्ञानं तथा चान्योन्याश्रय इति अयं न दोषपरिहाराय वैधर्म्यापादकोपधर्मभेदं एवकाश्रित्यरूप

न च वस्तुस्वरूपं भेद इति शंकितुमपि शक्यम् तस्य विदारणत्वनो वस्तुस्वरूपनाशरूपत्वात् नाशतत्प्रतियोगि
नोः भेदासंभवात् नहि घटविदारणं घटस्वरूपं वस्तुस्वरूपातिरिक्तस्य च तस्य निःस्वरूपत्वान्निराश्रयस्यासि
द्धिरेव नहि भिन्नस्याश्रयो भवति अन्यथाध्वस्तोपि घटो जलाधारः स्यात् अभिन्नत्वाश्रये भेदो विरोधादेव
न प्रवर्तते तस्मादलमनेनानात्मविचारेण सर्वथाप्रत्यक्षादेरात्मानात्मभेदगोचरत्वं नास्तीति सिद्धम् यदु
क्तं जगत्कारणत्वविषययोः श्रुत्योरज्ञानब्रह्मगोचरयोर्मिथो विरोध इति तन्न

भेदादन्यः स्वीक्रियते तर्हि स किं भिन्ने आश्रयेवर्तते उताभिन्ने इति आद्यं दूषयति वस्त्विति स्वरूपभेदादन्यश्चे
द्धर्मभेदस्तर्हि निःस्वरूपः स्यात् भिन्नस्य द्विधाभूतस्य चाश्रयत्वानुपपत्तेर्निराश्रयत्वं एवमस्य इति न निरूपणमर्थमहे
तीत्यर्थः निराश्रयत्वमेवोपपादयति नहीत्यादिना द्वितीयं दूषयति अभिन्नेत्विति किंच घटप्रतियोगिको भेदो घट
स्यस्वरूपं धर्मो वा आद्ये सप्रतियोगिकभेदस्य घटस्वरूपत्वे घटाद्वैतप्रसंगः घटधर्मत्वे पटोपि घटधर्मतामियात् किं
च स्वरूपस्य भेदत्वे संशयाद्यच्छेदप्रसंग इत्यादि दोषमभिप्रेत्य भेददूषणमुपसंहरति तस्मादिति सर्वथेति स्वरूपभेद
धर्मत्वपक्षेपीत्यर्थः किंचाविद्यकप्रपंचस्य साक्षिमात्रसिद्धस्य प्रमाणायोग्यत्वात् तत्प्रतियोगिकभेदस्य कल्पितत्वान्न पा
रमार्थिकाद्वैतक्षतिः न च प्रपंचस्य ब्रह्मकारणत्वमविद्योपादानत्वप्रतिपादकवाक्यविरोधात् नहि ब्रह्मकारणत्वप्रतिपादक

६२

नेनिप्रतिज्ञायांहेतुमाह ब्रह्मेति अज्ञानमेवजगदुपादानमित्यर्थः ननूभयत्रकारणत्वप्रतिपादकवाक्यसत्त्वेकथमयंनियमस्त
त्राह ब्रह्मणइति अविकारित्वादित्यर्थः सदेवसोम्येदमग्रआसीदित्यादिवाक्यानांब्रह्मकारणत्ववादिनांगतिमाह अधि
ष्ठानत्वेति जगदुपादानमायाश्रयत्वमात्रेणेत्यर्थः श्लोकंव्याचष्टे दृश्यत्वादीति जगतोऽविद्यैवकारणमित्यन्वयः नन्ववि
द्यानामविद्यायाअभावःसचनजगदुपादानंतत्कार्यस्याभावत्वान्नेत्याह अनिर्वचनीयेति सदसद्विलक्षणेत्यर्थः जगदुपादानत्व
सिद्धयेअविद्यांविशिनष्टि अनादीति ननुतथापिजगतःसत्त्वेनप्रतीतिःसद्विलक्षणाविद्याकथंतदुपादानंतत्राह अनिर्वच
नीयस्येति तत्रप्रमाणमाह दृश्यत्वादीति विमतंसद्विविक्तंदृश्यत्वात्परिच्छिन्नत्वात्स्वमतवदित्यर्थः अपरोक्षत्वाच्चनासन्मतःस
दसद्विलक्षणमनिर्वचनीयंजगदित्यर्थः तथाचानिर्वचनीयस्यजगतोऽनिर्वचनीयमज्ञानमेवोपादानंयुक्तंकार्यकारण

ब्रह्माज्ञानाज्जगज्जन्म ब्रह्मणोऽकारणत्वतः अधिष्ठानत्वमात्रेणकारणंब्रह्मगीयते २८ दृश्यत्वाद्यनुमान
सिद्धाऽनिर्वचनीयस्यजगतोऽनाद्यऽनिर्वचनीयाऽविद्यैवकारणंनब्रह्मतस्यकूटस्थस्यकार्यकारणविलक्षण
त्वात् तदेतद्ब्रह्माऽपूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरितिश्रुतेःकथंतर्हिब्रह्मणःजगत्का
रणत्वंश्रुतौप्रसिद्धमजगत्कारणऽविद्याधिष्ठानत्वेनकारणत्वोपचारात् ब्रह्मकारणत्वश्रुतेरन्यार्थत्वा

योऽल्पत्वदृश्यत्वादित्यर्थः एवकारव्यावर्त्यमाह नब्रह्मेति ननुश्रुत्यैवचेत्कारणतावोध्यतेकथंमात्मातद्विलक्षणस्तत्राह
तदेतदिति तदेतदज्ञानादिविषयेजगत्ब्रह्मैवनजगतोऽन्यांतरमस्तीत्यर्थः अपूर्वमकार्यंनविद्यतेअपरंकार्यंयस्यत
दनपरमकारणमित्यर्थः नसामान्यंब्रह्मेत्याह अनंतरमिति तर्हिविशेषइतिनेत्याह अबाह्यमिति अव्यावृत्ताननुगत
मित्यर्थः तस्यपरोक्षत्वंनिरस्यति अयमिति अपरोक्षमित्यर्थः आत्मनःसंसारित्वव्यावर्तनायाह ब्रह्मेति आत्मानंविशिन
ष्टि सर्वानुभूरिति सर्वात्माचिद्रूपमित्यर्थः अनुभूरिति इतिशब्दःपूर्वपरामर्शार्थः पूर्वोक्तविज्ञानंकर्तव्यमितिवेदानुशा
सनमितिवदाज्ञातत्वंवचनेसंसारानर्थप्रसक्तिस्तत्करणेचात्मनःकृतकृत्यतेत्यर्थः कूटस्थस्यतदात्कारणत्वस्यचश्रुत्या
निषिद्धत्वात्कारणश्रुतेर्जगदुपादानाज्ञानाधिष्ठानत्वेनाप्युपपत्तेर्नब्रह्मकारणंकिंत्वज्ञानमेवेत्यर्थः ननूपचरित
मपिकारणत्वंकिमितिश्रुतिर्वक्तिनिष्प्रयोजनत्वात्तत्राह ब्रह्मकारणत्वेति ॥

वे॰ मु॰ टी॰ १६२

अन्यार्थत्वं स्पष्टयति एकमेवेत्यादिना तस्याद्वितीयत्वेन ननु सर्वेषां वेदान्तानां ब्रह्मपरत्वं समन्वयार्थः न च वेदान्तैकदेशस्याज्ञा
नस्य कारणपरत्वे कथं नाप सिद्धान्तस्तत्राह नचेति किमर्थं तर्हि श्रुत्योच्यत इति तत्राह तस्येति कारणत्वस्येत्यर्थः अ
खंडानंदचिदात्मनो नानादुःखित्वाप्रकाशत्वादिरूपेण प्रतिभासो भ्रमस्तन्निमित्तत्वेनाज्ञानकारणवाद इत्यर्थः ननु
नैं विषयकरणदोषान्नभ्रमः संविदि स्यात् अपितु भवति मोहात्केवलादेवमेव भगवति परमात्मन्यद्वितीये विचित्रा
ह्वयमति रियमस्य भ्रांतिरज्ञानहेतुरिति १ किंनिमित्तत्वोपादानकारणतां श्रुतेः अच्चाव्य निमित्तमात्रपरतां कल्प
त इति तत्राह कार्येति सदसतोः कार्यत्वानिरूपणात् व्यापारवतः कारणत्वे व्यापारस्याकार्यत्वे सदाकार्यप्रसक्तिः का
र्यत्वे त्वनवस्थाप्रसक्तेः कार्यकारणभावस्य कल्पितत्वेन प्रमाणयोग्यत्वान्नत्वे च द्वैतापत्तेः वेदान्तवादवहिर्भूतः कार्य

५२ एकमेवाद्वितीयमिति श्रुतेरद्वितीयत्वं तावद्ब्रह्मणः सिद्धं तत्कथं संभाव्यतामिति कार्यकारणयोरभेदस्तावल्लोकप्रसि
द्धः ब्रह्मापि जगत्कारणमिति कथं संभावनास्यादित्यद्वितीये संभावनाबुद्धिमात्रप्रयोजनत्वान्नस्याः न चाज्ञानम
पि जगत्कारणं श्रुत्याविवादितं तस्य भ्रमनिमित्तमात्रत्वेनैवोक्तत्वात् कार्यकारणवादस्य वेदान्तवहिर्भूतत्वा
त् विवर्तवादस्यैव वेदान्तवादत्वात् किं जगत्कारणमिति एष्टे प्राप्ता प्रतिभानिवृत्तिमात्रप्रयोजनतयाऽज्ञानकारणमि
त्यभिहितत्वाच्च नन्विदमज्ञानं कार्यमकार्यं वा आद्ये किमस्य कारणमज्ञानं ब्रह्म वा नाद्यः तेनैव तज्जनने आत्माश्रयात् अज्ञानो

कारणवाद इत्यर्थः यद्वा कार्यकारणवादे आरंभवादस्य परिणामवादस्य वा प्रसक्तेस्तस्य चानिष्टत्वाद्वेदान्तवादवहिर्भूतत्व
वसइत्यर्थः कस्तर्हि वेदान्तवाद इति तत्राह विवर्तेति एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतानेकरूपावभासो वि
वर्तः नन्वेतस्याकल्पनायां मायातः प्रकृतिविद्यादित्यादिवाक्ये प्रकृतिशब्दो विरुध्यत इत्याशंक्योपादानत्वबोधकवा
क्यस्य गत्यन्तरमाह किं जगत इति नन्वज्ञानं यदि निरूपणपथमवतरेत्तर्हि तत्तदुपादानं वा निमित्तमात्रं वा तदे
व नास्ति वस्तुमात्रप्रकेरिति शंकते नन्विदमिति अनवस्यादीति अनवस्यातस्या आद्ये चानवस्यादयस्तेषां प्रसंगादि
त्यर्थः अनवस्यायामादिभूतावन्योन्याश्रयचक्रकाख्यौ दोषौ अज्ञानान्तरान्वेषणेऽन्योन्याश्रयः तृतीयाज्ञानस्वीकारे चक्रकं च
तुर्थेऽनवस्येत्यर्थः यद्वा अनन्ताज्ञानस्वीकारस्तदा स्याद्यद्यनेनाज्ञानपरस्परावगाहिनी काचित्संवित्स्यान्न च सास्तीति प्रमाणभाव १६२

ब्रह्मणः विद्याकारणत्वमित्याद्यं दूषयति नहि द्वितीय इति किमन्योपहितं ब्रह्म विद्याकारणं उत शुद्धम् नाद्यः उपधानस्यावि
द्यातत्कार्यान्तरस्याविद्यातः प्रागसत्वात् द्वितीयं दूषयति ब्रह्मण इति कूटस्थत्वादित्यर्थः कारणत्वमंगीकृत्यापि
दूषयति अनिर्मोक्षेति मुक्तं ब्रह्माऽज्ञानकारणं चेन्नहि मुक्तस्यापि संसारः स्यात् संसारकारणाज्ञानस्य सामग्रीसत्वेन तत्
उत्पत्तेरावश्यकत्वादित्यर्थः द्वितीयेत्विति विमतमज्ञानं न निवर्तते अनादित्वे सति भावत्वाद्ब्रह्मवदित्यर्थः घटा
दावनैकांतिकत्वपरिहाराय अनादीति विशेषणम् प्रागभावे व्यभिचारवारणाय विशेष्यं अत्रापि मिथ्यात्वमुपाधिमाशं
क्य निराचष्टे नचेति साधनव्यापकत्वादिति हेतुमाह कल्पनेति सादृश्यं पूर्वसंस्कारो दोषश्चेति त्रयं कल्पनासामग्री
तदत्राज्ञानकल्पनेनास्ति अज्ञाने यदि कल्पितं तर्ह्यात्मन्येव तत्कल्पितमित्यात्माधिष्ठानम् नचात्माज्ञानयोः सादृश्यमस्ति

नहि द्वितीयः ब्रह्मणोऽकारणत्वादनिर्मोक्षप्रसंगाच्च द्वितीये त्वनादिभावस्यानिवृत्तिप्रसंगः ब्रह्मवत् नचकल्पि
तत्वाकल्पितत्वाभ्यां विशेषः कल्पनासामग्र्यभावेन कल्पितत्वानुपपत्तेः नचानादिरयमध्यासः अध्यास
त्वासिद्धेः विद्याबाध्यत्वात्तत्सिद्धिरिति चेन्न अन्योन्याश्रयात् न चैते दोषा वस्तुनो वस्तुत्वापहारकाः कल्पितस्य चा
ज्ञानस्य किमेते कुर्युः स्वतएव तस्य वस्तुत्वाभावात् अतएवस्फुटम् अलंकारो ह्ययमस्माकं यद्युक्तिप्रमा
णाभ्यां दुर्घटत्वं सुघटत्वे कल्पितत्वं भवेदिति वाच्यम् कल्पितत्वस्यैवाद्याप्यसिद्धत्वात्

एवं संस्कारदोषयोः।

नि२ निरवयवत्वात् नचपूर्वसंस्कारो दोषो वास्ति तयोरज्ञानपूर्वकत्वेनाऽज्ञानात्प्रागसिद्धेरित्यर्थः ननु सादेरध्यासस्याभू
त्वाभावित्वेन कार्यत्वाद्भवतु तत्र सामग्र्यपेक्षा अध्यस्यमानमज्ञानमनादीति किं तत्र सामग्री करिष्यतीत्याशंक्याह नचेति वा
ध्ये कोऽन्त्वेयमध्यासत्वेन वाज्ञाने बाधकमस्तीति नाज्ञातमध्यस्तमित्यर्थः अज्ञानबाधमाशंकते विद्येति किं विद्यानिवर्त्यं
न बाध्यमुत कल्पितं सद्विद्यानिवर्त्यं वा आद्ये पूर्वज्ञानस्योत्तरज्ञाननिवर्त्यस्य बाध्यत्वाभावादित्यभिप्रेत्याह नेति द्वितीयं दूषय
ति अन्योन्येति कल्पितत्वसिद्धेर्ज्ञानबाध्यत्वं ज्ञानबाध्यत्वे च कल्पितत्वमित्यन्योन्याश्रयादित्यर्थः ननु पूर्वोक्तदोषाः
किमज्ञानस्य स्वरूपमपलपंति उत वस्तुत्वम् नाद्यः अहमज्ञ इति प्रतीतिसिद्धेरज्ञानस्वरूपापलापायोगात् नहि द्विती
यः इष्टापत्तेरिति सिद्धान्तिमतमनूद्य दूषयति न चेत्यादिना अज्ञानस्य कल्पितत्वे सिद्धे दोषैरपि तदेव संपाद्यते इति स्यादेवे
ष्टापत्तिः नच कल्पितत्वमिति कथमिष्टापत्तिरिति तत्र च वाच्यमित्यत्र हेतुमाह कल्पितत्वस्येति

वे. मु. टी. ९६

नन्वेते दोषास्तर्ह्यविद्यायां कल्पितत्वं साधयिष्यन्तीति तत्राह धर्मिण एवेति सिद्धे धर्मिणि दोषैस्तत्कल्पितत्वं साधकं साधनीयं
नाद्यापि धर्म्यज्ञानं सिद्धमहमज्ञ इति प्रतीतेः ज्ञानाभावविषयत्वादित्यर्थः असिद्धिशङ्कार्थस्य प्रतियोगिसिद्धिज्ञा-
नाधीनज्ञानत्वेन सिद्धिपदार्थं विचारयितुं सिद्धान्ती प्रवर्तते ननु केयमिति सादिसिद्धत्वेनेति अयमर्थः अह-
मज्ञ इति प्रतीतिस्तावदुभयवादिसिद्धा सा च न तावत्स्वप्रकाशमहिम्ना अज्ञानस्य जडत्वात् नापि प्रमाणात् लिङ्गा-
द्यप्रतिसंधानजन्यत्वेनानुमानादेरभावात् प्रत्यक्षादिति चेत् तत्किं बहिरिन्द्रियमुत मनः बहिरिन्द्रियाणामन्तरप्रवृत्ते-
र्नाद्यः मनश्चेत्तन्न तद्धि ज्ञानमात्रं स्फुरति किं त्वहमवच्छिन्नम् तत्राहमिति निर्विशेषणः शुद्धात्मा अहंकारविशिष्टो वा अ-
हंकारोपाधिको वा नाद्यः शुद्धस्य स्वप्रकाशत्वात् द्वितीयेऽहंकारात्मकस्य मनसोऽपि मनोवेद्यत्वमित्यतीन्द्रियत्वहतिः आ-
त्माश्रयश्च तृतीयेऽहंकाराकारता प्रतीतिर्नैष्यात् उपाधेस्तटस्थतया विषयकोटावप्रवेशात् तथापि तदाकारत्वेन साक्ष

धर्मिण एवासिद्धेः ननु केयं सिद्धिः उत्पत्तिर्ज्ञप्तिर्वा नाद्यः अनादेस्तदभावस्येष्टत्वात् न द्वितीयः सादिसिद्ध-
त्वेन तदभावात् मैवम् अज्ञानस्य सादिसिद्धत्वेन सादित्वेऽनादित्वभंगप्रसंगात् संबंधं विना चाप्र-
काशत्वात् न च पारमार्थिकसंबंधाभावेऽपि कल्पितः संबंधोऽस्त्वेवेति वाच्यम्

रवादप्रसंगात् सुषुप्तौ मनसोऽसत्त्वेऽपि अज्ञानप्रतिभासात् मनसस्तत्प्रतीतिकरणतानुपपत्तेश्च तस्मादविशेषात्सा-
क्षिवेद्यमेवाज्ञानमिति धर्मिणो ज्ञानस्य सिद्धिरेवेति तदसिद्धिरसिद्धेति साक्षिवेद्यत्वमज्ञानस्य निरस्यति नैवमिति
साक्षी किं स्वसंबद्धं प्रकाशयति उतासंबद्धम् आद्यमपसिद्धान्तप्रसंगेन दूषयति अज्ञानस्येति तथा चासंगो नहि
सज्जते इति श्रुतिविरोधप्रसंग इति द्वितीयं दूषयति संबंधं विनेति प्रदीपादौ संबद्धस्यैव प्रकाशत्वदृष्टेरिति हेतुसमु-
च्चयार्थः चकारः ननु संबंध एवाज्ञानेन साक्षिणो न गृह्यते किं वा वास्तवः नान्त्यः असमर्थविशेषणत्वात् नहि कल्पितः
प्रदीपेन भास्यते न वा तेन संबंधः
संबंधः प्रदीपस्य पारमार्थिकः आद्यसंबंधमात्रं तत्र न गृह्यते तर्हि कल्पितः सोऽस्त्वेवेति सिद्धान्ति शंकामनूद्य दूषयति न चेति
संबंधकल्पनं किं साक्षि अनादि वा सादि चेत् तर्हि कल्पकः किं संबंधतत्संबंधिभ्यामन्यत् उत तदेव नाद्यः संयोगे संबंधिनोऽन्यत्वे सा

द्वितीयमनवस्था दूषयति संबंधेति संबंध एव विश्वात्मानं कल्पयति किं वा संबंधिना वेति द्वितीयपक्षं द्विधा विकल्प्य क्रमेण दूषयत्
माह आत्माश्रयेति संबंध एव चेत्स्वात्मानं कल्पयति तदात्माश्रयः संबंधिमध्येऽपि किमज्ञानं कल्पयति साक्षी वा नाद्य इत्याह अ-
न्योन्याश्रयेति अज्ञानं लब्धसत्ताकं स्वसंबंधं जनयिष्यति जनिते च संबंधे लब्धसत्ताकं भविष्यतीत्यन्योन्याश्रय इत्यर्थः साक्षिपक्षं प्रतिषे-
धयति कूटस्थत्वेति उपचयन्नपचयन्न धर्मी विकरोति हि धर्मिणमिति न्यायात् कूटस्थत्वहानिरित्यर्थः अथैतद्दोषपरिहारायोपा-
ध्युपरक्त एव साक्ष्यज्ञानसंबंधं करोति साक्षीत्यत्राह असंगत्वेति अज्ञानं हि साक्षिणाऽसंबद्धं न स्वरूपं लभते अलब्धसत्ताकं च नोपाधिं जन-
यति तथा च येनोपहितः साक्षी सउपाधिः पारमार्थिक इति तत्संगित्वे संगत्वहानिरित्यर्थः अत्रैव दूषणांतरमाह अनिर्मोक्षे-
ति तत्वसाक्षात्कारेऽप्यज्ञानं तत्प्रभवं च न नश्यति विरोधान्नात्मवत् तथा च येनोपहितः साक्षी सउपाधिः परमार्थसत्स्योपाधेरक्षावि

२।१४ ज्ञानदृ=१

ता१

संबंधसंबंधिनामन्यतमस्य कल्पकत्वे आत्माश्रयान्योन्याश्रयकूटस्थत्वहान्यसंगत्वहानिर्मोक्षप्रसंगानां यथाय-
थं प्राप्तेः न चाविद्याध्यासवत्संबंधाध्यासस्याप्यनादित्वेनाविद्यादिहेत्वजन्यत्वेऽपि तत्तज्ज्ञानयानन्तरं निवृत्तौ निवृत्तिः
स्यादिति वाच्यम् तस्यानादेरुत्पत्तौ निरपेक्षस्य साक्ष्यधीनज्ञानस्याज्ञानानपेक्षतया तत्तंत्रत्वानुपपत्तेः न च संबं-
धिज्ञानाधीनं संबंधज्ञानं लोके दृष्टमिति वाच्यम् तस्य प्रत्यक्षादिसिद्धस्य तत्सापेक्षत्वेऽपीह संबंधिनो ज्ञानस्य सा-
क्षिसंबंधसापेक्षस्फूर्तिकत्वेन वैपरीत्यात् न च संबंधः स्वस्थित्यर्थं संबंधिनमपेक्षतेऽतो निवाच्यम् लब्धसत्ताकस्फूर्तिकस्यैवास्य

अज्ञानसंबंधे=२
घटादिसंबंधज्ञानस्य
संबंधिज्ञानसापेक्षत्वेपि

धर्मपारमार्थिकत्वादनिवृत्तेर्ज्ञानावस्थायामपि तादृग्ज्ञानसंबंधहेतोः सद्भावादनुच्छिन्नः संसारः स्यादित्यर्थः अथैतद्दोषपरिहाराय
अज्ञानसंबंधाध्यासोऽनादिरिति तत्पक्षेऽनादिभावत्वादात्मवन्निवृत्तिर्न स्यात् नन्वनिवृत्तावनादिभावत्वेन प्रयोजकं किंत्वविद्यातंत्रत्वान-
धिकरणत्वं संबंधश्च निवर्तते अविद्यातंत्रत्वादिति शंकित्वा परिहरति न चाविद्येति उपाधेः साधनव्यापकत्वपूर्वोक्तहेतुमाह
तस्येति किमिदमज्ञानतंत्रत्वं किमज्ञानज्ञानजन्यत्वं उताज्ञानभास्यत्वं अथाज्ञानाधीनस्थितिकत्वं न प्रथमद्वितीयावित्याह
अनादेरित्यादिना न च संबंधिज्ञानाधीनमिति तथा च विशेषणीभूतसंबंधिनोऽपि तज्ज्ञानहेतुत्वात्संबंधस्याज्ञानतंत्रत्वमि-
त्यर्थः तृतीयं दूषयति न चेति संबंधः किमलब्धसत्ताक एव स्थितिमात्रार्थं संबंधिनमपेक्षते उत लब्धसत्ताकः आद्यं दू-
षयति लब्धेति द्वितीयेऽपि सत्तालाभः किंहेतोः न तद्धेतुर्नैरपेक्ष्येण आद्योऽनादित्वपक्षक्षतिः द्वितीयं दूषयति हेत्वनपेक्षत्वे इति आ-

अज्ञानसंबंधः नदि
वर्तते अनादिभा
वत्वात् आत्मवत्
अज्ञाततंत्रत्वाद्धिक
रणत्वमत्रोपाधिः

वे॰ मु॰
टी॰
६५

नन्वज्ञानेनाज्ञानप्रागभावः स च ज्ञानानुपलब्ध्या गृह्यत इति कथं तदसिद्धिरित्याशंकां दूषयति नचेति ग्रहशब्देन किं ज्ञप्ति
र्विवक्षिता किं स्वरूपं चैतन्यं नाद्यः ज्ञप्तेर्जडत्वेन ग्रहे मुख्याग्रहत्वानुपपत्तेः द्वितीयं दूषयति नित्योपलंभेति नित्योपलंभात्म
नोनुपलब्धिरयुक्तेत्यर्थः अज्ञाननिराकरणमुपसंहरति तथा चेति तन्निराकरणस्य प्रकृतोपयोगमाह कथं तदिति य
तस्त्वं पदार्थनिषेधं प्रतिजानीते मैवमिति विरोध इति इतः स्वरूपप्रश्नादेरपाभ्या अन्यथा स्वरूपविषयप्रमाणप्रश्नेवि
रोधः स्यादज्ञानस्य प्रमाणनिरसनीयत्वात्तत्र प्रमाणप्रश्नो विरुद्धः स्यादित्यर्थः श्लोकं व्याख्यातुं भूमिकामाह कथमिति अ
ज्ञानांगीकर्तॄन्प्रति यदिदं पूर्वपक्षी वदति अज्ञानासिद्धिः कथमिति स इत्थं वदन्सिद्धांतिना प्रष्टव्य इत्यर्थः प्रष्टव्यमाह किं
मयमिति स्वरूपसाधकं स्वरूपबोधकमित्यर्थः आद्यमज्ञानस्वरूपविषयकप्रश्नपदमनूद्य दूषयति आद्य इति अयमर्थः
प्रश्नो हि वाग्व्यवहारविशेषः व्यवहारश्च व्यवहर्तव्यज्ञानसाध्यः व्यवहर्तव्यं चात्राज्ञानस्वरूपमिति तज्ज्ञानमावश्यकं न

नचाज्ञानस्य ग्रहप्रागभावरूपस्य ग्रहानुपलंभात् उपलंभ इति वाच्यम् नित्योपलंभरूपस्यात्मनोनुपलंभानुपपत्तेः भा
वरूपस्य जगदुपादानस्य चाज्ञानरूपस्याभावरूपत्वानुपपत्तेश्च तथा चाज्ञानस्यैवाभावात्कथं तज्जगत्कारणत्वे
नोपन्यस्तमिति मैवम् प्रश्नस्य ज्ञानपूर्वत्वादाद्ये प्रतियोगिधीः अवश्यंभाविनी पूर्वा विरोधः स्यादितोन्यथा ६६
कथमज्ञानसिद्धिरिति वदन्प्रष्टव्यः किमयमज्ञानस्वरूपविषयकः प्रश्नः किं वा तत्स्वरूपाक्षेपः किं वा तत्स्वरू
पसाधकप्रमाणप्रश्न एवायं आद्ये ज्ञाते स्वरूपे प्रश्नानुपपत्तेः प्रश्नात्पूर्वमज्ञानस्वरूपसिद्धेर्वा स्वरूपभावाज्ञ
येवाज्ञानस्वरूपं सिद्धमिति कोत्र प्रश्नः नच सामान्यतो ज्ञानाद्विशेषजिज्ञासा युक्ता उक्तदोषात् नचाक्षेपो युक्तः अभाव
ज्ञानस्य प्रतियोगिज्ञानपूर्वकत्वनियमेनाज्ञानस्वरूपसिद्धेः पूर्वमेव युक्तत्वात् नच भ्रमोपस्थितस्याज्ञानस्याक्षेपो न्याय्यः

याचाज्ञानस्वरूपस्यत्वं प्रतिसिद्धत्वात् अतोज्ञानस्वरूपसिद्धये व्यर्थः प्रश्न इति ननु नाज्ञानस्वरूपसामान्यजिज्ञासया प्रश्नोयं येना
नायमुपालंभः स्यात्किंतु तद्विशेषजिज्ञासयेति तत्राह नचेति कुत इति तत्राह उक्त इति वैयर्थ्यादित्यर्थः अज्ञानस्वरूपासिद्धिरे
वमगम्यते सा चेत्सामान्यत एव प्रसिद्धा एवं विशेषज्ञानेनेत्यर्थः पदार्थसामान्यप्रतीतिरेव विना विशेषमपर्यवस्यंती विशेषमपि
नेक्षितवतीति बुद्ध्या तज्जिज्ञासया प्रश्न इत्यर्थः द्वितीयमाक्षेपपक्षं दूषयति नचेति अज्ञानाक्षेपो नाम अज्ञाननिरस्करणं तद
भावबोधनमिति यावत् तदभावश्च शब्देन बोधनीयः शाब्दं च ज्ञानं पुरस्सरं अभावज्ञानं प्रतियोगिज्ञानाधीनं ज्ञानमिति प्रति
योग्यज्ञानासिद्धमिति तत्तदपलापमर्हतीत्यर्थः ननु प्रमाणासिद्धमेव नापलापयोग्यमज्ञानं पुनर्भ्रमोपस्थितमिति कथं तन्नापलाप

व्यमिति सिद्धांती आह यत इति

यतः केन कृत्स्नभ्रम इति

योग्यमिति तत्राह नचेति भ्रमस्य करणविषयाधीनत्वात्तदुभयं त्वया वा

१.५

शाब्दाभासएवभ्रमेकरणमज्ञानं च तस्य विषय इति पूर्वपक्षिणो सिद्धांतीमतं दूषयति परोक्षेति शाब्दस्याभासत्वोपपादनाय परोक्षेति
विशेषणम् सिद्धांत्येव पूर्वपक्षिणो मतमित्यंदत्वात् दूषयति तथा चेति अज्ञानं भ्रमे ऽपादानं किमज्ञानं ऽज्ञान्यत् नाद्यः अ-
ज्ञानस्योपादानत्वात् तदज्ञानं किं निरूपणीयत्वेन प्रक्रांतं तदेव ऽज्ञान्यत् आद्ये आत्माश्रयः द्वितीये अन्योन्याश्रयः तृतीये चक्रकं
चतुर्थे ऽनवस्थास्यादित्याह भ्रमस्येति अस्त्वनेकाज्ञानपरंपरेति चेत्तत्राह इहेतेति अज्ञानांगीकारे स्वमतव्याघातः एकेनैवा-
ज्ञानेन स्वाकारस्यान्याकारस्य च भ्रमस्य सिद्धेरनेकाज्ञानस्वीकारे गौरवम् किं चाज्ञानस्य जडत्वेन स्वत एवावृतेः कस्य दूषणत्वा-
त्तत्रावरणकृत्याभावादज्ञानविषयकाज्ञानस्वीकारे वैयर्थ्यम् एवमप्यज्ञानानि स्वीक्रियेरन् यद्यज्ञानपरंपरावश्यं हि नी-
काचित्संविदुदितास्यान्नचैवमस्तीति दूषणद्योतनायादियदम् यत्रोभयोः समो दोष इतिन्यायमाश्रित्य यत्पूर्वपक्षिमतं तद्दूषय- यत्रोभयोः समो दो-
षः परिहारोपि वा भवेत् नत्रावर्य-
नुयोक्तव्यस्ताहृग-
र्थविचारणे ।

परोक्तशाब्दाभासेनाज्ञानविषयक इत्येवोत्तरम् तथा च भ्रमस्य स्वसमानविषयकाज्ञानोपपाद्यमानत्वादज्ञानविषय-
कापराज्ञानस्वीकारे ऽनवस्थानवारा हंततर्हि एकाज्ञानानां हि स्वजयादेयप्रयुंजानस्यानेकाज्ञानस्वीकरणमदो-
षमन्नस्य स्वव्याघातगौरववैयर्थ्यादिदोषमपश्यतः स्वयत्ननिर्वाहो व्याहतयद नचैवं क्वचित्त्वापि प्रसादेययोः स-
त्वात्तुल्यः पर्यनुयोग इति वाच्यम् अज्ञाननतयासादिसिद्धाज्ञाननिवृत्त्यर्थं प्रमाणप्रश्नस्य प्रमाणदर्शनेनस्व-
पुनिरस्कारतृपुस्य चाद्वेयस्यकर्तुमशकरत्वात् अस्तु तर्हि मापिसादिसिद्धाज्ञाने प्रमाणप्रश्नः समंजसः एवं त-
र्हि अज्ञानसाक्षिणोः संबंधोपि वाच्यः अन्यथा साक्षिणः साधकत्वानुपपत्तेः तथा चाज्ञानतत्संबंधयोरनादित्वमपि
अन्यथा पूर्वमुक्तस्येदानीं संसारोपलंभः स्यात् नच पूर्वमप्यज्ञानांतरमेवेति वाच्यम् अज्ञानपरंपरानयकस्यैव लघुत्वात्

तिनचैवमिति परिहारसाम्यहेतुमाह अज्ञानतयेति परिहारसाम्यव्याजेनतत्तीयंपक्षमुत्थापयति अस्तु तर्हीति अज्ञानस्य [illegible]
साक्षिसिद्धत्वे निर्वाहयितुमाह एवमिति अज्ञानसाक्षिसंबंधस्यानादित्वविपक्षबाधकेन दृढयति अन्यथेति साक्ष्यज्ञानसंबं-
धस्यानादित्वे आदिः कारणं किमात्मा अज्ञानं वा नाद्यः मुक्तस्यापि संसारोपलंभः स्यादित्यर्थः अज्ञानं चेत्तत्संबंधि रूपमन्यद्वा नाद्यः
स्वतंत्राज्ञानासंप्रतिपत्तेः संबद्धं चेन्न संबंधस्याद्याप्यसिद्धत्वात् अज्ञानांतरपक्षमनूद्य दूषयति नचेति तद्यज्ञानं संबद्धम-
संबद्धं वा अंत्ये स्वतंत्राज्ञानप्रसक्तिः द्वितीये ऽनवस्था नन्वियमनवस्था न दोषाय अज्ञानपरंपराया अनादित्वादिति चेत्तत्रा

किं २ अस्व ३ व

वे॰ मु॰
टी॰
६६

अयमर्थः आत्मनि किमित्यज्ञानपरंपरास्वीक्रियते आवरणार्थमिति चेत् एकेनैव तदुपपत्तेः अज्ञानसंबंधार्थमिति चेत्स्वेनैव
वस्व संबंधोपपादनात्समवायवत् यथा समवायः स्वसंबंधप्रतीतिसिद्धं संबंधं स्वयमेवोपपादयति न च समवायांतरं समवा
यघटयोः संबंधोपपादकं तथाज्ञानसाक्षिसंबंधोपपादकमज्ञानमेवेति लाघवादेकमेवाज्ञानं युक्तं न ततस्यरंपरेति अज्ञान
स्य सत्त्वे द्वैतापत्तेः असत्त्वे अपरोक्षप्रतीत्यविषयत्वापत्तेरनिर्वचनीयं तत् अभावत्वे प्रपंचोपादानतानस्यादित्यज्ञानभा
वरूपम् अभावस्याप्युपादानत्वे तत्कार्यं सद्बुद्धिर्न स्यादिति एकस्यानेकविचित्रकार्यजनकत्वानुपपत्तिकल्प्यरूपातरमा
ह विचित्रेति धर्मिभेदकल्पनातो धर्मभेदकल्पना वरमित्यभिप्रेत्याह एकत्वमिति अनादेरपितस्य निवृत्त्यर्थं ज्ञाननिवृत्ति
योग्यत्वमपि वक्तव्यमित्यभिप्रेत्याह अबोधेति एवं पूर्वपदिष्ठाराः ज्ञाने ततस्वरूपमनुपपाद्याज्ञानसाधकप्रमाणविषयकप्र

तत्र यद्येन विनानुपपन्नं तत्सर्वं संबंधित्वमनादित्वमनिर्वचनीयत्वं भावरूपत्वं विचित्रशक्तिकत्वमेकत्वमन्यद्वाय
त्किंचिदपेक्षितस्योपपादकत्वेन संकल्पयतीति वाच्यम् तथा च प्रमाणप्रश्नोऽनर्थक एव अज्ञानस्य साक्षिण्येव सिद्ध
त्वात् न चाज्ञानविषयाज्ञाननिवृत्त्यर्थं प्रमाणप्रश्नो युक्त इति वाच्यम् तदभावात् अज्ञानस्य प्रमाणेन ज्ञातुम- अज्ञाने
शक्यत्वाच्च तेन तस्य विरोधात् तदयं तमो दीपन्यायः तथा हि अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यंतमूढधीः स तु नू
नं तमः प्रपश्येद्दीपेनोत्तमतेजसा १ तथा चाज्ञानकथमिति प्रश्ने वात्मानमुपपादनीयमिति स्वानुभवसिद्धे कथंता
नुपपत्तिरेव

स्य पदं निरस्यति तथा चेति यद्येनादृशमज्ञानं साक्षिण्येव सिद्धं किमत्र प्रमाणं कविष्यतीति सिद्धे साधनवैयर्थ्यादित्यर्थः नाज्ञान
स्वरूपसिद्धये प्रमाणं पृच्छ्यते किं त्वज्ञानविषयाज्ञाननिवृत्तये न चाज्ञानविषयाज्ञाननिवृत्तिः साक्षिण्येव सिध्यतितस्य तत्सा
धकत्वादिति परमतं दूषयति न चेति तदभावादिति अज्ञानविषयकाज्ञानाभावादित्यर्थः अज्ञानस्य जडत्वेन स्वतः एवावृतै
करूपत्वादित्यर्थः ननु यथा लोके दृष्टा जडेऽपि घटे प्रमाणस्य प्रवृत्तिवदज्ञानेऽपि प्रमाणं प्रवर्ततामिति तत्राह अज्ञानस्ये
ति घटस्य प्रमाणानिवर्त्यत्वाज्ज्ञेयत्वं नाम प्रमाणेन शक्यज्ञानत्वे अज्ञानस्य प्रमाणेन निवर्त्यनिवर्तकत्वलक्षणविरोधान्न प्रमाण
ज्ञेयत्वमविद्याया युक्तमित्याह तेनेति उक्तं विरोधं न्यायेन स्पष्टयति तदयमिति ननु दीपतमसोरपि न निवर्त्यनिवर्तकत्वविरो
धः मंदप्रदीपे वेश्मनि युगपदुभयोरुपलब्धेरिति तत्राह उत्तमतेजसेति अज्ञानप्रश्नान्यथानुपपत्तिसिद्धमज्ञानं न कथंता

महतीनुपपत्तिरिति तथाचेति ॥

ननु तदेवस्वीकर्तव्यं यन्नस्य प्रयोजनविरोधि अज्ञानं चानर्थहेतुत्वान्मुक्तिलक्षणप्रयोजनविरोध्येवेति कथं तत्स्वीकर्तव्यं नचवे
दांतवाक्यजन्यज्ञानान्निवृत्तिः अतवेदांतानामपि पूर्ववत्संसारानुवृत्तिदर्शनादिति शंकते कुतस्तर्हीति अज्ञानस्वीकारेपिन
मुक्त्यनुपपत्तिः वाक्यार्थाद्ब्रह्मात्मैक्यसाक्षात्कारादज्ञानबाधायां मुक्त्युपपत्तेर्विनि कुतो मुक्तिरितिहेतुप्रश्नमत्वोत्तरमाह त
त्वेति बाधप्रश्नार्थं निरूपयितुं जिज्ञासामुत्थापयति ननु कोयमिति तत्र नैयायिकाभिमतं बाधस्वरूपमाह तत्रेति इ
दं रजतमिति पूर्वप्रत्ययः पुरोवर्तिविषयिको रजतत्वप्रकारकः तस्य प्रत्ययस्य इदंत्वेन व्यधिकरणइदंत्वाधिकरणानधिकर
णः प्रकारो यस्य स तत्प्रकारकस्तस्य भावस्तत्त्वं तद्विषयको यो निश्चयो नेदमिदमिति सएव बाध इत्यर्थः ततश्च पूर्वज्ञानस्य
भ्रमत्वनिश्चयो बाध इति भावः तदेतदपसिद्धांतेन दूषयति तन्नेत्यादिना अन्यथाख्यातिवादिमते हि पुरोवर्तिनि शुक्तिशकले
का १

कुतस्तर्हि मम मुक्तिः कर्तव्याद्यशेषानर्थव्रातप्रसवबीजस्यात्माज्ञानस्य स्वानुभवसिद्धत्वात् तत्त्वमस्यादिवाक्यज
न्यापरोक्षब्रह्मात्मसाक्षात्कारेणाज्ञानबाधादेवेति गृहाण ननु कोयं बाधः न च पूर्वप्रत्ययस्य व्यधिकरणप्रका
रकत्वनिश्चय इत्यन्ये तन्न अन्यथाख्यात्यनंगीकारात् अज्ञानस्य बाधापत्तेश्च सविलासाज्ञाननिवृत्तिरिति
त्वदीयाः केचित् तदप्यापातरमणीयम् प्रत्येकसमुदायाभ्यामव्याप्तेः

न रजतं किं तु साक्षादनुपाध्युद्बुद्धसंस्कारोपनीतरजतात्मना पुरोवर्ति भातीति भवति पूर्वज्ञानं भ्रमः विषयस्य तत्राऽसत्वात् तत
श्च तत्त्वेन निश्चयो बाध इति तेषामेव युज्यते नास्माकं अस्मन्मते पुरोवर्तिनि मिथ्यारजतस्योत्पन्नत्वेनेदंत्वेन प्रकारस्य व्यधिकर
णत्वाभावात् ततोऽपसिद्धांत इति भावः किं च पूर्वप्रत्यये व्यधिकरणप्रकारकत्वनिश्चयोऽधिष्ठानविषयाज्ञानं बाधते न त्व
ज्ञानं भिन्नविषयत्वात् अज्ञानं हि शुक्तिविषयं बाधश्च ज्ञानस्य व्यधिकरणप्रकारकत्वविषयः न च भिन्नविषययोर्ज्ञानाज्ञान
योर्निवर्त्यनिवर्तकभावोऽतिप्रसंगात् द्वितीयलक्षणं दूषयितुं पर्यायमुपादत्ते इत्याह अज्ञानस्येति तथा च ज्ञाने विफलं संसारस्य तस्मादज्ञान
स्य निवृत्तेरिति भावः विवरणकारमतं दूषयितुमुत्थापयति सविलासेति प्रत्येकेति किं विलासनिवृत्तिर्बाधः उताज्ञाननिवृ
त्तिर्बाधः उतोभयनिवृत्तिः न प्रथमः द्वितीयो अव्याप्तेः अतएव न तृतीयः न हि प्रत्येकं निवृत्तिः उभयनिवृत्तिः प्रतियोगिभेदेनाः

अद्वैतसिद्धि

वे॰ मु॰ टी॰ ९८

ननु कार्याकारपरिणताज्ञाननिवृत्तिरेव बाधः न चैवमव्याप्तिः सर्वत्रैवानुगमादिति चेत्सत्यं तथापि निवृत्तौ प्रतियोगिका॰
र्याकारपरिणतमज्ञानं किं विशेषणमुपलक्षणं वा नाद्यः नादृगज्ञानस्यापि बाधत्वापत्तेः उपलक्षणं चेन्न अभावे परिचायक॰
धर्मस्योपलक्षणत्वेन तस्याभावान्निवृत्तिमात्रं बाधः स्यादिति तत्र विकल्पयति किं चेति पदार्थान्तरमिति न सन्नासन्न सदसदात्म
केन चानिर्वचनीयं किंतु पंचमप्रकार इत्यर्थः तद्व्यवहारात् बाधाव्यवहारादित्यर्थः तथात्वापत्तेः बाधत्वापत्तेरित्यर्थः ननु पू
र्वज्ञाननिवृत्तिं प्रति नोत्तरज्ञानत्वेन कारणता किंतु तत्तत्कविशेषगुणत्वेन तथा च न तत्र नातिव्याप्तिरित्याशंक्याह ज्ञानमात्रे॰
ति पदार्थान्तरं निवर्तते न वा आद्यं दूषयति तद्ध्वंसेति द्वितीयं दूषयति तदनिवृत्ताविति ननु कथमद्वैतक्षतिः सतो द्वितीय॰
स्याभावादिति चेन्न पदार्थान्तरस्यानिर्वचनीयवैलक्षण्यवदसत्त्ववैलक्षण्यस्यात्मवत्स्वरूपत्वोपपत्तेः ततः पदार्थान्तरस्यैतौ च

किं च ननु केयं निवृत्तिः ध्वंसमात्रं वा ज्ञानसाध्यमुपवा पदार्थान्तरमेव वा आत्मस्वरूपं वा नाद्यः मुद्गराद्याघातज
न्यघटादिध्वंसे तद्व्यवहारात् न द्वितीयः उत्तरज्ञानसाध्यपूर्वज्ञानध्वंसेन तथात्वापत्तेः ज्ञानमात्रध्वंसेऽतिव्या॰
प्तेश्च न तृतीयः तद्ध्वंसासाध्यापनात्तदनिवृत्तावद्वैतक्षतेः न चतुर्थः तस्य नित्यसिद्धत्वेन ज्ञानवैयर्थ्यापत्तेः तस्माद्बाध वे ३
स्यैव निर्वक्तुमशक्यत्वात्कथमज्ञानतत्कार्यबाधात्मा द्वा इति अत्र ब्रूमः साक्षात्कृतेत्वधिष्ठाने समनन्तरनिश्चितिः
अध्यस्यमानं नास्तीति बाध इत्युच्यते बुधैः ८० अधिष्ठाने विपरीतमध्यस्य प्रवर्तमानस्य निवर्तमानस्य वा यदाधि
ष्ठानविषयकं बाधकं ज्ञानं परोक्षमपरोक्षं वोत्पन्नं तदनन्तरमिदमिह कालत्रयेऽपि नास्तीति योऽयं निश्चयः स एव बाध इति सर्व
जनानुभवसिद्धम् न चान्यथाख्यातिवादे ध्यस्यार्थान्तरे वसानमस्तीति वाच्यम्

र्थेनाद्वैतक्षतिरिति तस्येति आत्मस्वरूपस्येत्यर्थः ननु नात्मस्वरूपमात्रं निवृत्तिः किंतु तदुपलक्षितमिति चेन्न गृहे काकवज्जन्यो
त्पन्नत्वादिवदत्र वृत्तिजन्यात्मपरिचायकस्यात्मनिष्ठस्य धर्मस्याभावात् वृत्तेरुपलक्षणत्वानुपपत्तेः प्रकृतोपयोगादयन्नबाध निराकरणार
मुपसंहरति तस्मादिति प्रतिपन्नोपाधावध्यस्यमानं कालत्रयेऽपि नास्तीत्यधिष्ठाननिश्चयानन्तरं योऽवबोधः स एव बाध इति परिह
रति अत्र ब्रूम इत्यादिना उक्तमर्थं संवादयति उच्यते बुधैरिति श्लोकं व्याचष्टे अधिष्ठान इति परोक्षमेऽपरोक्षमधिष्ठानज्ञा ९८
नमपरोक्षेतद्दपरोक्षमिति विभागमाश्रित्याह परोक्षमपरोक्षं वेति ननु बाधविषयो बाध्यमनिर्वचनीयमिति भवतो मतेन तदिदं वा म ३
थविषयत्वेनिरुक्तमन्यथाख्यातिवादिमते सत्यापि कानाकरादौ विद्यमानरजते गतं यत्तत्सदापि कालत्रये पुरोवर्तिनि अत्र काश
केनास्तीति भवतानिश्चयविषयं इत्याशंक्य परिहरति न चान्यथेति ॥

अध्यस्यमानपदेनहेतुमाह तत्रेति अन्यथाख्यातौ भ्रमविषयो रजतादिरन्यत्र सत् अस्मन्मते तु यत्रैवाधिष्ठाने अध्यस्यते रजतादि
तत्रैव तदात्मना सत् न स्यात् अन्योऽतिभवत्यधिष्ठानान्यार्थके न त्रैकालं तदसदेवेति विशेष इति उक्तमर्थं दार्ष्टान्तिके योजयति एवमिति
अध्यस्तस्य त्रैकालिकाभावनिश्चयस्य बाधत्वे संप्रदायविदामनिर्वचनीयलक्षणमुपपन्नं भवतीत्याह अत एवेति अनिर्वचनीयलक्षणाऽ
संभवमाशंक्य परिहरति नचेति अध्यस्यमानस्य बाधोत्तरकाले सत्त्ववत्ततः पूर्वमपि असत्त्वमेवेति नासंभववल्लक्षणमित्यभिप्रेत्याह
अनिर्वचनीयेति इदमेवार्थं स्पष्टयति नहीति कदाचिदसत्त्वमात्रेणानिर्वचनीयत्वमतिव्याप्तेरित्यर्थः यद्यप्यसत्त्वेन घटादिरप्यनिर्व
चनीय एव तथापि परस्य तत्र विप्रतिपत्तेरतिव्याप्तिः स्यादेवेति द्योतयितुं पराभिमतेत्यादि विशेषणं घटादिव्यावृत्तये विशिंष्टि किन्त्वा दूष शेषणं २
यति नचेति आविद्यकत्वे सति कादाचित्कमनिर्वचनीयमिति लक्षणेन युक्तमित्यर्थः शुक्तिरजतस्याविद्यकत्वे किं कारणमात्रप्रभ

तत्राध्यस्यमानस्यान्यत्र सत्त्वाभ्युपगमात् एवं ब्रह्मात्मसाक्षात्कारे ज्ञातेऽज्ञानं तत्कार्यं च सर्वं यावत्किंचित्तत्राध्यस्तं तत्सर्वं
तत्र कालत्रयेऽपि नास्तीति यो निश्चयः स्वानुभवसिद्धः स एव तत्र तस्य बाध इत्युच्यते अत एव प्रतिपन्नोपाधौ निषेधप्रति
योगित्वमनिर्वचनीयत्वमिति संप्रदायविदां लक्षणमपि समंजसम् न चोत्तरकालीननिषेधप्रतियोगित्वे
ऽपि वर्तमानातीतकालयोः सत्त्वान्न त्रैकालिकनिषेधप्रतियोगित्वमनिर्वचनीयत्वमिति वाच्यम् अनिर्वच
भ्रमत्व ५ नीयापरिज्ञानात् नहि कादाचित्कत्वमात्रेणानिर्वचनीयत्वं संभवति पराभिमतस्यापि घटादेस्तथात्वात् नचावि सतः २
द्यकत्वेन विशेषः कारणस्याज्ञानान्तरकल्पनापत्तेः न च ज्ञानबाध्यत्वेन विशेषः तस्यापि सतोऽनास्तित्वप्रतीत्यनुपपत्तेः नच
सकलकार्यकारणबाधरूपस्य नास्तीति प्रत्ययस्य बाधान्तरमस्ति अन्यथाऽद्वैतक्षतेरिति वाच्यं ॥ ॥ मित्यर २x

वत्त्वमुत ज्ञानबाध्यत्वं नाद्य इत्याह कारणस्येति अविद्यापदेनकारणमुच्यते तथा च तज्जन्यं कादाचित्कमनिर्वचनीयमित्युक्तं भवति
तथा चातिव्याप्तिरित्यर्थः द्वितीयमनूद्य दूषयति नचेति तथा च घटादौ पूर्वपक्षेणातिव्याप्तिरिति भावः तस्यापीति तस्यापि विशेष
स्यासंभवः कथं ज्ञानबाध्यत्वं नाम ज्ञाननिवर्त्यत्वं न च तत् सतः संभवति आत्मन्यपि प्रसंगात् अत एवाह सत इति तत्रोक्तज्ञानबाध्यत्वा
न्यथानुपपत्त्या वर्तमानातीतकालयोरध्यस्तस्य स्वरूपतोऽसदेवेत्यधिष्ठाने त्रैकालिकाभावप्रतियोगित्वमनिर्वचनीयत्वमित्यनवद्यं लक्ष
णमिति भावः ननु बाधात्मनिश्चयः किमात्मैव उत भिन्नः आद्ये संसारदशायां द्वितीये बाध्यो वा आत्मवत्सन्वा बाध्यश्चेत्तर्हि स्वस्य बाधः
स्वयमेव बाधान्तरं वा प्रथमे आत्माश्रयः द्वितीये अन्योन्याश्रयादिः सत्त्वे त्वद्वैतक्षतिरिति परमतं दूषयति नचेति ॥ ।श्री

वे॰ मु॰ दी॰ ६८

हेतुमाह ब्रह्मेति ब्रह्मण एव ध्यस्यमानं सर्वं कालत्रयेनास्तीति निश्चयस्यास्तित्वयद्वयं एकं वाधात्मकमपरमध्यस्यमानत्वं तत्राध्यस्यमान
त्वेन तद्येण स्वविषयत्वे वाधत्वेन विषयित्वमिति नात्माश्रय इत्यर्थः तथा च नाद्वैतक्षतिरिति भावः ननु वाध्यमानः प्रपंचो ब्रह्मातिरि
क्तोस्ति न वा अस्ति चेदात्मवदनिवर्त्यः स्यात् नास्ति चेत्तर्हि तदभावो द्देशेन ज्ञानादौ प्रवृत्तिर्न स्यात् तदभावस्य स्वतः सिद्धत्वात् न
च सदसद्विलक्षणप्रकारांतरमस्ति परस्परविरोधेन प्रकारांतरस्थितिन्यायादिति तत्राह न चेति अनिर्वचनीयत्वेनेति न तावदिदं जग
त्सत्त्वेनेति नेत्यादिश्रुत्या तावद्वाधात् नाप्यसदपरोक्षत्वात् तस्मात्ख्यातिवाधान्यथानुपपत्त्या ब्रह्मातिरिक्तं सदसद्विलक्षणमनि
र्वचनीयं उक्तन्यायस्य च प्रमाणविरोधेनाभासत्वात् एतच्च सतो जनिर्नैवमित्यादावसकृच्चोद्यं परिहृतमित्यर्थः नन्वविविक्तव्यव
हारप्रसंजकं स्मरणादगृहीतभेदं ग्रहणमेव भ्रमत्वेन व्यवह्रियते न च तद्विषयो निर्वचनीयः पुरोवर्तिनः सत्यत्वात् तथा नेदं र
जतमिति वाधप्रत्ययोपि व्यवहारमात्रं वाधत्वेन भ्रमविषयस्य कालत्रयाभावं वोधयतीति तत्कथमनिर्वचनीयवाद इत्याख्यातिवादि
नो मन्यंते आत्मख्यातिवादिनोपि न रजतमध्यस्तमित्याहुः किंतु संयोगमंतरेणापरोक्षत्वात्संविदात्मकत्वेनांतरस्य रजतस्य वहिष्ट्वेन प्रती
तिर्भ्रमः नेदं रजतमिति वाधोपि न रजतासत्त्वमावेदयति किंतु तत्त्वेदंतापरपर्यायं वहिष्ट्वं प्रतिषेधयति धर्मिधर्मोभयनिषेधापेक्षया धर्म

ब्रह्मातिरिक्तं सर्वं वाधरूपस्य तस्य स्वांतर्भावेनैव तथात्वात् न च ब्रह्मातिरिक्तमस्ति नास्ति
चेति विकल्पावकाशः अनिर्वचनीयत्वेन परिहृतत्वात् आख्यात्यात्मख्यात्य ॥ ॥

मात्रनिषेधे लाघवादित्येवं संगिरंते असत्ख्यातिवादिनो नानिर्वचनीयं रजतमित्याहुः किंतु निस्तत्त्वमसदेव रजतं ज्ञानादेवासत्प्रकाशन
समर्थत्वाद्रजतं भासते अत एव वाधोपि रजतासत्त्वमेव वोधयति नेदं रजतमिति ततो ब्रह्मातिरिक्तं जगदनिर्वचनीयमित्येतदेवानिर्व
चनीयमित्याशंक्याह अख्यात्यात्मेति अख्यातौ तावद्ग्रहणमेव स्मरणादगृहीतभेदत्वाभेदव्यवहारप्रसंजकत्वात् भ्रम इति व्य
वस्थापयति तदसत् ग्रहणस्मरणे भासेते न वा न चेत्तर्हि न स्तः त्वन्मते ज्ञानस्य स्वप्रकाशत्वादभासने स्वरूपाभावनियमात् भासे
ते चेत्कथं तर्हि तयोर्भेदाग्रहः भेदस्य स्वरूपत्वात् अत एव नाभेदव्यवहारप्रसंजकत्वं ततः कथं भ्रमव्यवस्थापनं तथा वाधव्यवस्था
पनमप्यनुपपन्नम् यत्तु त्वज्ञैषणस्य व्यवहार एव नोदेति तत्र नेदमिति ज्ञानस्य वाधकत्वं न स्यात् तस्मादाख्यातौ भ्रमादिव्यवस्था
पनानुपपत्तिरिति आत्मख्यातावपि किं ज्ञानाकारता वाह्ये अध्यस्यते ज्ञानात्मनि रजते वा वहिष्ट्वं नाद्यः विज्ञानवादिमते वाह्यस्यालो
कत्वात् सत्त्वेनाधिष्ठानत्वानुपपत्तेः तथात्वे वा इदं रजतमसदिति प्रतीतिः स्यात् ननु सदित्युल्लेखाभावादसदेवेति चेन्न तथात्वे रजता
र्थिनः प्रवृत्तिर्न स्यात् अथ रजते वहिष्ट्वं समारोप्यते तर्हि तस्याप्यसत्त्वात्तद्विषयज्ञानस्यापरोक्षता न स्यात् असत्ख्यात्यापत्तेश्च रजतस्य ज्ञा
नाकारत्वे प्रमाणाभावाच्च न च नेदं रजतमिति वाधप्रत्ययवलाच्च वानुगृहीतो रजतस्य वाह्यत्वनिषेधेनार्थात्तरत्त्वमावेदयतीति सांप्रतम् ॥ ६८

हि

इदंत्वं हि सन्निहितत्वं तच्चेन्द्रियसंबद्धं तद्धर्म सन्निहितमेव रजतं तस्मात्तस्य प्रतिपन्नात्मकं सन्निहिततमत्वं कुतस्त्यम्‌ नच संप्रयोगमंतरेणापरोक्षत्वा
नुपपत्तिर्नात्मकत्वं दोषवशाद्दृष्टांतरवर्तिन एव रजतस्येन्द्रियसन्निकर्षोपपत्तेः संयोगमंतरेणेति विशेषणासिद्धेः यत्तु नेदं रजतमिति बाधोवा
धात्मिदंत्वं निषेधयति न रजतमिति तन्न बाधो नोभयमपि निषेधयति किं तु तयोस्तादात्म्यम्‌ तस्मिंश्च निषिद्धे इदंत्वं पुरोवर्तिनिस्था
स्यति रजतं रजतत्वेवादेशांतरे रजते भवति तन्मते भ्रमबाधव्यवस्थापनमनुचितमेव यत्त्वसत्ख्यातौ असद्देवासत्प्रकाशनसमर्थं ज्ञानं भा
सयतीति तदप्यसत्‌ असतोऽपरोक्षप्रतीत्यदर्शनात्सामर्थ्यस्य च कुत्रसामर्थ्यमिति विषयसापेक्षत्वेन विषयस्यासतश्चाकार्यज्ञाप्यविक
ल्पासहत्वादसत्येवासत्ख्यातिः यदपि बाधोऽरजतासत्वमावेदयतीति तदप्यन्यथाख्यातिवादिमते पूर्वमेवान्यख्यातिनिराकरणप्रसंग
एव परिहृतं तन्नोनस्थानं तत्र संयुक्तमित्यर्थः तन्वन्यथाख्यातिवादिना दर्शितं चोत्किं तद्वेतितत्राह नेहेति अन्यतएवख्यात्यंतरनिरा

सत्ख्यातिवादे षुभ्रमबाधव्यवस्थानुपपत्तेरन्यथाख्यातिवादेनैव दर्शितत्वान्नेह यत्यते ग्रंथगौरवभयादनात्मविचारत्वा
च्च तस्माद्बाधकप्रत्ययोत्तरं अन्यस्त्वस्य त्रैकालिकासत्वनिश्चयोबाधइतिसिद्धम्‌ तथाच सुरेश्वरः तत्वमस्यादिवा
क्योत्थसम्यग्धीजन्ममात्रतः अविद्या सह कार्येण नासीदस्ति भविष्यति १ अथकथं विद्याया अविद्याबाधकत्वं विरोधादि १८
तिचेत्कस्तर्हि तयोर्विरोधः किमेककालानवस्थितत्वं उतैकदेशानवस्थितत्वं आहोस्विद्‌ध्यहानकत्वमथवा भावाभा सि
वात्मकत्वम्‌ नाद्यः पूर्वभाविन्याऽविद्यया सह विद्याया एककालावस्थितत्वात्‌ विद्योत्तरमविद्यानिवृत्तेः अन्यथा विद्यावैय

करणस्यासिद्धत्वात्तन्निराकरणं नयुक्तम्‌ साक्षादात्मविचाराभावादित्यर्थः सर्वदोषायेतं बाधनिरूपणमुपसंहरति तस्मादिति उ
क्तमर्थं सुरेश्वराचार्यवचनेन दृढयति तथाचेति तत्र नासीदिति त्रैकालिकासत्वमेव जगतोधिष्ठानसाक्षात्कारानंतरं प्रतीयते इति
तत्प्रतीतिरेव बाधो नाविद्यानिवृत्तिरित्यर्थः इदमेवार्थं दृढयितुं शंकामुत्थापयति अथकथमिति विद्याधिष्ठानसाक्षात्कारः अस्यम
न्तोत्तरं शंकते विरोधेति तर्हि विरोधमेव निर्वदेत्याह कस्तर्हीति किं प्राप्तस्तु चितान्विकल्पानाह किमेकेत्यादिना ननु पूर्वभावित्व
वि ३५ मेककालावस्थानेन प्रयोजकं घटप्रागभावस्य पूर्वभावोपि घटेन सहानवस्थानादितितत्राह विद्योत्तरमिति घटस्य प्रागभावनिवृत्तिरू
पत्वान्नैककालत्वं तयोर्युक्तम्‌ अविद्यानिवृत्तेर्विद्याजन्यत्वेन तदुत्तरकालीनत्वादविद्याविद्ययोरेककालत्वमनपहरणीयमेवेत्यर्थः ननु कि
मिति विद्या अविद्यां निवर्तयिष्यति प्रमेयावभासकत्वेन तस्यान्यथासिद्धेरितितत्राह अन्यथेति प्रमेयस्य स्वप्रकाशत्वाद्विद्याऽविद्यां
चेन्न निवर्तयेद्व्यर्था स्यादित्यर्थः

वे. मु. टी. ९९

वक्तव्यत्वाद्विरोधसिद्ध्यर्थमित्यर्थः तृतीयमनूद्य दूषयति तृतीयेति घातस्य वक्तव्यत्वे प्रकृतोपयोगमाह यत्कर्तृत्वमिति घातस्य स्वरूपं निरूपयति ध्वंसइति स्वतंत्रइति ननु तावता ध्वंसो वध्यजन्यो भिन्नत्वात् न चाभिन्ने पि घटेति मित्तं दंडादिजनकं यथा एवं भिन्नमपि ध्वंसं प्रतियोगितया वध्यं जनयेदिति वाच्यम् कल्पितप्रतियोगिनो ध्वंसस्य कल्पितत्वेन मुक्तेरपि कल्पितत्वप्रसंगात् अकल्पितत्वे द्वैतापत्तेश्च नापि तस्याविद्याज्ञानाधीनत्वानुत्वम् अविद्यानिवृत्यवस्थायां प्रमातृत्वाद्यभावेन तद्विषयकज्ञानासिद्धेस्ततः सर्वात्मना विद्यायाः संबंधात् ध्वंसः सस्वतंत्र एवेत्यर्थः भिन्नोपि तस्य तंत्रस्तद्धर्मत्वादित्यपि प्रेत्य पक्षांतरमाह उतेति किं तद्धर्मइति पूर्वोक्तस्वतंत्रशब्दार्थमाश्रित्याद्यं दूषयति आद्यइत्यादिना निरस्तत्वादिति भाववतूपजगदुपादानस्येत्येतिशेषः किं च विद्याविद्ययोर्विरोधाविशेषाद्विद्यैव बाध्या किं न स्यान्नियमे प्रमाणाभावादित्याह विपरीतं वेति पूर्वपक्षानुवादेन सिद्धांतमुप

न द्वितीयः व्यधिकरणयोर्विद्याविद्ययोर्विरोधाभावेनैकाधिकरणत्वस्यावश्यं वक्तव्यत्वात् न तृतीयेवध्यस्य घातो वाच्यः यत्कर्तृत्वे घातकत्वं ध्वंसो घातः तत्कर्तृत्वं घातकत्वमिति चेत्स तर्हि वध्याद्भिन्नः स्वतंत्रः पदार्थः कश्चित् उत तद्धर्मः तदा तेववा आद्येवध्यस्य ध्वंसो न स्याद्धिमवद्विंध्ययोरिव परस्परासंबंधात् द्वितीयेधर्मिणं वृधर्मिणो दीर्घायुष्मान यति अन्यथा निराश्रयो धर्मएव न स्यात् तृतीयेतु विद्याऽविद्योत्पादकेवेति कुतो विरोधः न चतुर्थः विद्याविद्ययोरुभयोरपि भावरूपत्वात् अविद्यायाः प्रागभावस्वरूपत्वस्य निरस्तत्वात् अन्यथैककालावस्थानं न स्यात् तस्माद्विद्याऽविद्ययोर्विरोधस्य निर्वक्तुमशक्यत्वात्कथं विद्यायाअविद्याबाधकत्वं विपरीतं वा किं न स्यादिति अत्रोच्यते उपमर्द्यस्वभावत्वमविद्याया विरोधिता तत्कर्तृत्वं तु विद्यायाः प्रकाशतमसोरिव ६१ यद्यपि विरोधांतरमिह निर्वक्तुमशक्यं तथाप्युपमर्द्योपमर्दकभावलक्षणो यं विरोधः शक्यते एव वक्तुमविद्या

क्रमते अत्रोच्यते इत्यादि को विरोधइति प्रश्ने विरोधं निरूपयितुं विरोधकार्यमाह उपमर्द्येति विपरीतं वेति दोषं परिहर्तुं प्रमाणमाह स्वभावेति विद्यायास्तत्कर्तृत्वं विरोधितेति पूर्वेणान्वयः स्वभावे दृष्टांतमाह प्रकाशतमसोरिवेति श्लोकं व्याचष्टे यद्यपीत्यादिना पूर्वोक्तविरोधदोषाणामपरिहार्यत्वमाह विरोधांतरमिति तथापीति उपमर्द्योपमर्दकयोर्भावः तेन लक्ष्यते अनुमीयते यो विरोधः स उपमर्द्योपमर्दकभावलक्षणः कार्येण कारणस्यानुमानादित्यर्थः अविद्योपमर्द्यत्वे स्वभावपदसूचितं हेतुं विवृणोति अविद्योपमर्दकत्वस्येति सत्यां विद्यायां नाविद्याया यथा शुक्तिरितिविद्यायां शुक्तावविद्याया उपमर्दो नैवात्र रजतमासीदिति शुक्तिविद्यायाम्भावेसति शुक्तेरावरणमन्यथा रजतात्मना च प्रतिभासो दृश्यते इत्यन्वयव्यतिरेकाभ्यामविद्यैवोपमर्द्यस्वभावेति लोकप्रसिद्ध्या कल्प्यते इत्यर्थः ९९

अन्वयव्यतिरेकसिद्धस्वभावमप्युपमर्द्योपमर्दकत्वं विपक्षबाधकेनापि द्रढयितुं पूर्वपक्षवैपरीत्यप्रसक्तिरूपमनिष्टप्रसङ्गमाचष्टे
नचेत्यादिना विमताऽविद्याऽपमर्द्या अविद्यात्वात् शुक्त्यविद्यावदित्यनुमानं विपक्षबाधकसहितमर्थात्सूचितम् संप्रति तत्रै
वहेत्वन्तरमाह प्रतिनियतेति ननूपमर्दोऽस्याविद्यातो भिन्नः उत स्वतन्त्र इत्यादिदोषप्रसक्तिरत्रापि पक्षे भविष्यतीत्याशंक्याह
नचेति ब्रह्मणि कालत्रयेऽपि सविलासाविद्या नास्तीति निश्चयस्योपमर्दत्वात्तस्य च विषयाबाधेन प्रमात्वोपपत्त्वात् नन्वविद्या चेन्न
निवर्तते तर्हि ब्रह्मात्मैक्यसाक्षात्कारो विफलः स्यादत आह विद्योत्तरमिति ब्रह्मसाक्षात्कारस्याबाध्यात्मकोपमर्द एव फलमधिष्ठान
भेदेनाविद्यादेः सत्त्वेन तन्निवृत्तेः कर्तुमशक्यत्वात् किं तर्हि बाधस्य ज्ञानात्मकस्य विषयः निर्विषयज्ञानायोगादिति चेन्न अविद्या
देस्त्रैकालिकनिषेध एव ननु सोऽपि किमभावोऽसन्सन्वा आद्ये तत्प्रतियोगिनोऽज्ञानादेः सत्त्वापत्तिः संश्चेत्तर्हि आत्मनो भिन्नोऽभि
न्नेव आद्ये द्वैतापत्तिः अन्त्ये अधिष्ठानसाक्षात्कार एव स इति न बाधविद्ययोर्जन्यजनकतेति मैवम् साक्षात्कारोपाधिकात्मस्वरूपस्यैव त्रैकालि

नच विरोधित्वाविशेषे विद्योपमर्दकत्वमेवाविद्यायाः किं न स्यादिति वाच्यम् तथा च सति विद्योत्पत्तिरेव न स्यात् उप
मर्दिकाया अविद्यायाः पूर्वमेव स्थितत्वात् प्रतिनियतस्वभावस्य पर्यनुयोक्तुमशक्यत्वाच्च यथा प्रकाशतमसोः न त
त्र वैपरीत्यं शंक्यते दृष्टविरोधात् नच वध्यघातकपक्षोक्तदोषप्रसक्तिः उपमर्दस्य कालत्रयेऽपि नास्तीति प्रमितिरू
पस्य बाधापरपर्यायस्य विद्योत्तरं जायमानत्वात् ननु विद्योपमर्दकस्वभावत्वं चेदविद्यायास्तर्हि विरुद्धो विद्योत्प
त्त्यनन्तरमविद्यायाः सकार्यायाः समूलकाषं कषितत्वान्न देवविदेहकैवल्यप्राप्तौ देहपातस्तात्कालि

काभावत्वात् शुद्धेन बोधिना सविलासाविद्या कालत्रयेऽप्यात्मनि नास्तीत्यात्मस्वरूपविषयं ज्ञानं जन्यत इति को दोषः नचायं पक्षः
केनापि संप्रदायविद्भिरस्वीकृत इति वाच्यम् वार्तिककृतां सम्मतेर्दर्शितत्वात् विवरणाचार्यैरपि ननु प्रतिपन्नोपाधौ रजतादेरभा
वं बाधो बोधयति प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नामेति वदद्भिरयमपि पक्षो दर्शित एव कथमन्यथा त्रैकालिकाभावं बाधो
बोधयतीति वदेयुः कथं वा तत्त्वदीपनाचार्या अभावपदं त्रैकालिकाभावपरतया व्याकुर्युः तस्मान्नैरपि पक्षोऽयं स्वीकृत एवेति ना
साम्प्रदायिकमेतदिति नन्वविद्यायाः न युक्तं जीवन्मुक्त्यभावादिति केनचित् नन्वित्यादिना समूलमिति तन्नाविद्याया अनादित्वान्मू
लानुपपत्तिः न चाधिष्ठानमेव मूलं तस्य सत्यैकरूपस्य कल्पितत्वानुपपत्तेः तत्त्वेवात्मन्यात्मतापत्तिरिति चेन्नैवम् अहमित्यध्या
सोऽविद्या तस्याः कार्यकर्तृत्वादि तस्याः मूलम् तत्त्वाज्ञानं यथाहुः तमोनमेवं लक्षणमध्यासं पण्डिता अविद्येति मन्यन्त इति ॥

वे. मु. टी. ७० मास्ति तर्हि जीवन्मुक्तिरित्याह नचेति श्रोत्रियं ब्रह्मनिष्ठमिति विशेषणेनोत्पन्नसाक्षात्कारस्यैवाचार्यत्वात्तस्य च सद्य एव मुक्तत्वा
त्कउपदिशेत्तदभावे केवलं ब्रह्मविद्यासंप्रदायः प्रवर्तेतामिति वेदान्तानामबोधकत्वलक्षणमप्रामाण्यं प्रसज्येतेत्यर्थः ननु तत्त्वज्ञानोत्तर ८२
मेव देहपात इत्ययुक्तम् देहकारणस्य प्रारब्धकर्मशेषस्य सत्वात् नच तदपि ज्ञाननिवर्त्यं अविरोधादुपजीव्यत्वाच्चेति तत्राह नचेति
यद्यपि प्रारब्धकर्माविरोधि तत्त्वज्ञानं तथापि प्रारब्धं कर्म न तावन्निरुपादानं भावकार्यस्य तत्त्वादृष्टेः सोपादानं चेत् किमात्मो
पादानमविद्योपादानं वा नाद्यः आत्मनोऽकारणत्वेन तदुपादानत्वानुपपत्तेः द्वितीयश्चेत्तर्हि साऽनिवृत्ता निवृत्ता वा आद्यमनूद्य दू

तथा चोच्छिन्नः संप्रदायः स्यात् नच प्रारब्धकर्मसामर्थ्याद्देहपातो नास्तीति वाच्यम् प्रारब्धस्याप्यवि
द्याकार्यतया तदभावे स्यात्तु मणिशक्तेः तन्त्वभावे पटस्येव नच प्रारब्धकर्मफलभोगनिर्वाहकतयाऽकि
यत्कालमविद्याप्यनुवर्तत इति वाच्यम् विद्याया अविद्योपमर्दकत्वस्वभावहानिप्रसंगात् न
चोत्तरकालएव तत्स्वभावः एकस्य स्वभावद्वयानभ्युपगमात् नचावरणशक्तिप्रधानम
ज्ञानं निवृत्तमेव विक्षेपशक्तिप्रधानं त्वनुवर्तते प्रारब्धनिर्वाहायेति वाच्यम् अज्ञानद्वयाभावात् न चैक
मेव शक्तिद्वयविशिष्टं एकस्य युगपत्स्थितिनिवृत्त्योर्विरोधात् नच शक्तिनिवृत्तिमात्रमेव विवक्षितं शक्तिश
क्तिमतोरभेदाच्छेदे वाऽज्ञाननिवर्तनं नच प्रारब्धनिवृत्त्या तन्निवृत्तिः तस्या अप्रमाणत्वात् नचतदनंतरं सा

षयति प्रारब्धस्यापीति द्वितीयमनूद्य दूषयति नचेत्यादिना उत्तरकालएवेति प्रारब्धकर्मशेषनिवृत्त्युत्तरकाले इत्यर्थः अज्ञाने
न निवर्तते इति प्रारब्धकर्मशेषभोगात् प्रागावरणशक्तिं ज्ञानमपनयति उत्तरं विक्षेपशक्तिं निवर्तयति तथा ज्ञानस्य धर्मिणो नि
वर्तकाभावान्नज्ञानं निवर्तत इत्यर्थः ज्ञानव्यतिरिक्तमज्ञाननिवर्तकमाशंक्य परिचष्टे नचेति तस्या निवृत्तेरित्यर्थः ननु निवर्त ७०
काभावोऽसिद्धः ज्ञानस्यैवाविद्यानिवर्तकत्वात्तर्हि जीवन्मुक्तिविरोध इति चेन्न प्रारब्धकर्मशेषेण प्रतिबंधात् अप्रतिबद्धस्यैव कार
णत्वे [illegible] जनकत्वात् कर्मशेषनिवृत्तौ प्रतिबंधाभावादप्रतिबद्धं तत्त्वज्ञानमुपमर्दिष्यतीत्याशंक्य परिचष्टे नचतदनंतरमिति

नचवाच्यमित्यत्रहेतुमाह प्रारब्धेति ननुप्रारब्धकर्मनाशेसतिपश्चाद्देहोनपतितन्नाशस्यदेहनाशहेतुत्वात्तत्रप्रारब्धना
शोत्पत्त्यवस्थायांप्रतिबंधासंभवाद्देहादेश्चविनश्यदवस्थस्यसत्वात्तद्दशायांज्ञानंजायतामित्याशंकानापिविशिनष्टि देहपातानंतरमिति
प्रारब्धकर्मशेषोहिदेहएवनतत्कारणीभूतःकश्चिदन्योस्तिशेषशब्दवाच्यःकर्मणोदेहादिफलत्वरूपेणपरिणतस्वरूपांतराभावात्त-
याचशेषनाशएवदेहपातइतितदनंतरंकारणाभावाज्ज्ञानमेवनास्तिकिमज्ञानंनिवर्तयेदित्यर्थः ननुभुक्तज्ञानंयद्यपिनिवृत्तंतथा
पितत्संस्कारोनुवर्तते नचज्ञानक्रिययोरेवसंस्कारःनाशमात्रप्रयुक्तत्वात्संस्कारस्यततश्चापरोक्षात्मनःसंस्कारलक्षणदोषवशाद्दे
हाद्यनात्माकारावभासइतिस्यादेवजीवन्मुक्तिरितिपक्षंदूषयति नचेति ज्ञानक्रिययोरेवसंस्कारइतिनियममाश्रित्यसंस्कारशब्द
स्यार्थोतस्माह लेशेति लेशःपाविद्याऽविद्यावस्थाविशेषइत्यर्थः नदूषणेहेतुमाह तस्यापीति अयमर्थःसंस्कारोनतावदनादिःसं
स्कारत्वाभावप्रसंगात् सादिश्चेत्तदुपादानमात्माऽविद्यावा नाद्योनिर्विकारत्वात् अविद्याचेत्तर्हितस्यानाशेऽपिकथंस्यादुपादानाभावा

प्रारब्धनाशेदेहपातानंतरंज्ञानस्यैवाभावात् पूर्वज्ञानस्यचप्रारब्धेनप्रतिबद्धत्वात् नचाविद्यासंस्कारोलेशाविद्यादिशब्दाभि
धेयोऽनुवर्ततेइतिवाच्यम् तस्यापिविद्याकार्यत्वात् अविद्यामात्रत्वेचसंस्कारशब्दप्रयोगवैयर्थ्यात् जीवन्मुक्तिप्रतिपादकश्रु
तिस्मृतिप्रामाण्यादिज्ञस्येदेहस्थितिःकल्प्यतेइतिचेन्नशास्त्रस्यजीवन्मुक्तिप्रतिपादनेप्रयोजनाभावात् मुमुक्षूणांश्रवणा
दौप्रवृत्तिःप्रयोजनमितिचेत्

भावकार्यस्यसोपादानत्वनियमादिति नन्वविद्यैवलेशशब्दवाच्यासंस्कारशब्दार्थइतितत्राह अविद्येति अवस्थायाश्चाविद्यातोभेदाभेदा
भ्यामनिरूपणात् शक्तिपक्षोक्तदोषप्रसंगाच्चायुक्तत्वमितिभावः ननुतावदेवचिरंसचक्षुरचक्षुरिव प्रजहातियदाकामान्सर्वान्पार्थम
नोगतानित्यादिशास्त्रप्रमाणात्तत्त्वज्ञानिनोविदेहकैवल्यप्राप्तौविलंबप्रतीतेःशरीरस्थितिःकल्प्यतेइतिजीवन्मुक्तिवादीशंकते जी
वन्मुक्तीति देहस्थितिश्चविनाकर्मानुपपन्नाकर्मस्थितिमपिकल्पयतीतिभावः उभेहैवैषएतेतरतिइतिभिद्यतेहृदयग्रंथिः
ज्ञानाग्निःसर्वकर्माणीतिश्रुतिस्मृतिविरोधात्कल्पनमनुपपन्नमितिपरिहरति नेति ननुतर्हिविरोधइतिचेन्न जीवन्मुक्ति
शास्त्रस्याध्ययनविधिविरोधेनस्वार्थापरत्वादित्याह शास्त्रस्येति यद्यपिजीवन्मुक्तिप्रतिपादनंनसाक्षात्प्रयोजनंतथापिसुखात्मसा-
क्षात्कारहेतुविचारादौप्रवृत्तिजनकतयापरस्परप्रयोजनमितियुज्यतेएवस्वार्थपरतेतिजीवन्मुक्तिवादीशंकते मुमुक्षूणामिति॥

वे मु. टी. ७१ तर्हि जीवन्मुक्तिशास्त्रं किमादावेव विचारादौ मुमुक्षून्प्रवर्तयति उत तद्विधायकवाक्यशेषतया नाद्यः विचारविधायकपदाभावात् द्वि
तीयमंगीकरोति अस्त्विति तथा च न स्वार्थे प्रामाण्यमित्यर्थः ननु प्रमाणविरोधे तत्संवादे वानार्थवादानां प्रामाण्यं नवा नतद
स्ति ततो देवताधिकरणन्यायेन स्वार्थेपि प्रामाण्यं किं न स्यादित्याशंक्याह तथा चेति लौकिकप्रमाणमन्वयव्यतिरेकौ सति मुक्तिसाक्षा
त्कारे सविद्योपमर्दस्तदभावे नेत्येवंरूपो वैदिकप्रमाणं भिद्यते हृदयग्रंथिरित्यादि ततो विरोधान्न देवताधिकरणन्यायावतार इति ननु य
था मुक्तेषु कर्मणः प्रारब्धवेगस्तद्यादेव वदयो नान्यथा एवं प्रारब्धकर्मणो भोगतत्क्षणकार्यं तद्यादेवद्वयो नान्यथेति साधितेव
प्रास्तकारैः प्रारब्धस्थितिरिति शंकामुन्मूलयति न चेति परिहारः स्पष्टार्थः नन्वनारब्धकार्य एव तु पूर्वे तदवधेरिति सूत्रकारैः नन्वा

जीवन्मुक्तिः . जीवन्मुक्तिशास्त्रेण।

अस्तु तर्हि श्रवणादिविधेरर्थवादस्तच्छास्त्रं तथा च लौकिकवैदिकप्रमाणविरोधान्नैतत्कथं विदुषो देहस्थितिः कल्प्यते
न च मुक्तेषु दृष्टान्तेन प्रारब्धस्थितिः साधितेति वाच्यम् दृष्टान्तवैषम्यात् तत्र कर्मोपादानस्य योरनाशात् न च जीवन्मु
क्तौ सार्वलौकिकी प्रसिद्धिरव्याहतेति वाच्यम् प्रमाणविरहेण प्रसिद्धेरंधपरंपरारूपत्वात् न चाप्रामाणिकस्य शास्त्रकारैः
र्व्युत्पादनमनर्थकमिति वाच्यम् शिष्यस्याविद्वत्तया गुरावविश्वासपरिहारप्रयोजनतया तस्यार्थवत्त्वात् तस्माद्वि
द्यायास्त्वविद्योपमर्दकत्वस्याभावाद्विदुषः सद्योमुक्तावुपदेष्टुरभावात्कुतो विद्योत्पत्तिः न चाचार्यनिरपेक्षो वेविद्योत्तिसं
प्रतम् आचार्यवान्पुरुषो वेद नैषा तर्केण मतिरापनेया प्राप्य वरान्निबोधत आचार्यस्ते गतिं वक्तव्येति अन्यप्रोक्तेग
तिरत्र नास्ति प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ इत्यादिश्रुतिभ्यः

रब्धकार्ये सामिभुक्तफले इत्यादिग्रंथेन भाष्यकारैः नन्वारब्धविपाकसंपादितजात्यायुर्विज्ञानेत्यादिना वाचस्पतिमिश्रैः
ननु कर्मणामपि निवृत्तत्वात्कथं द्वैतदर्शनं नैव दोष इत्यादिना विवरणाचार्यैः आरब्धफलशेषैकहेतुत्वाद्देहसंस्थि
तेः रागप्रत्ययोद्भूतिरिषुचक्रादिवेगवदित्यादिभिर्वार्तिककारैः जीवन्मुक्त्युपपादनमप्रामाणिकत्वादनर्थकमाप ७१
न्नेरयुक्तमिति शंकां पराकरोति न चाप्रामाणिकस्येति एवं सर्वदोषापनोदनं येनत्वैयपादितो सद्योमुक्तिमुपसंहरन्पूर्वपक्षफल नो
माह तस्मादिति ननु विद्योत्पत्तौ किमाचार्यः करिष्यति स्वयमेव तर्कादिना विद्यासंपादनसंभवादित्याशंक्याह न चेत्या
दिना आपनेया आप्तव्येत्यर्थः वरानुत्कृष्टानाचार्यानित्यर्थः स्पष्टार्थाः श्रुतयः अन्याः ॥ श्रीरामाय॥

सद्योमुक्तिरेवमाथः पदस्मा हि विद्यासंप्रदायाभावाद्विद्यानुत्पत्तिप्रसङ्गं परिहरति नैष इति स्वाज्ञानकल्पितस्य गुरोरुपदेष्टुः सत्य
त्वात् ननु कल्पितस्य मिथ्याभूतस्य कथमुपदेष्टृत्वं तत्त्ववार्थक्रियाकारित्वान्मिथ्यात्वानुपपत्तेरित्याशङ्क्य श्लोकेन परावष्टे कल्पि
तोऽपीति उपदेष्टा समादिशेदित्यन्वयः उपदेष्टा आचार्यः नन्वाचार्योऽत्रास्तीत्युक्तं तत्राह कल्पितोऽपीति सत्यवदित्यपरार्थः ननु कल्पित
स्योपदेष्टृत्वं न युक्तं निस्सत्वादिति तत्राह यथा शास्त्रमिति निस्सत्वं यदि तुच्छत्वं तन्नाङ्गीकारात् यदि मिथ्यात्वं शास्त्रवद्देवत् यथा
कल्पितोऽपि वेदः स्वार्थं बोधयति एवमाचार्योऽपीत्यर्थः कल्पितत्वस्य तत्त्वसाक्षात्कारात्प्रागज्ञानात् उत्तरं च गुरोरनपेक्षणान्न दोष इति
भावः नन्वेक एव जीवस्तस्तरेतदविद्याकल्पिता इति भवतो मतं तत्र किं शिष्याज्ञानेन गुरुः कल्पितो गुर्वज्ञानेन वा शिष्य इत्यविनिगमे शिष्य
स्य स्वश्रवणादौ प्रवृत्तिर्न स्यादिति नेत्याह नचेत्यादिना श्लोकं व्याचष्टे यद्यपीत्यादिना व्याख्यानं स्फुटं ननु शास्त्रं न कल्पितं तस्यापौरु

नैष दोषः कल्पितोऽप्युपदेष्टा स्याद्यथाशास्त्रं समादिशेत् न चाविनिगमो दोषोऽविद्यावत्त्वेन निर्णयात् ॥८१॥ यद्यपि विदुष
स्तदानीमेवमुक्तत्वात्पारमार्थिकः कश्चिदुपदेष्टा नास्ति तथापि कल्पितेन गुरुणा विद्योत्पत्तिसंभवान्नानुपपत्तिः का
चित् न च कल्पितस्य कथं सत्यज्ञानजनकत्वमिति वाच्यम् शास्त्रवदुपपत्तेः प्रतिबिंबवच्च न च गुरुशिष्ययोर्मध्ये क
तरः कल्पित इत्यविनिगमो दोष इति वाच्यम् अविदुषः कल्पकत्वाद्गुरोश्च विदुषः कल्पनाबीजाभावेन तत्त्वोपपत्तेः नु उप४४
स्वस्य ज्ञानस्याचार्यप्रसादासादिततत्त्वमस्यादिवाक्योत्थसाक्षात्कारेण मोक्षोऽविभातु प्रतिबंधकाज्ञानतत्कार्यतिरस्कारसमनंतर
नित्यशुद्धबुद्धमुक्तस्वभावाद्वितीयानंदोऽस्मीति मन्यते ततः कृतकृत्यो भवतीति अतः स्वष्टक्रमात्मानमानंदस्वात्मा हि निश्चिन्वेति

षेयत्वादिति मीमांसकास्तान्प्रत्युदाहरणांतरमाह प्रतिबिंबवच्चेति विमतं बिंबपूर्वकं प्रतिबिंबत्वात्सम्मतवत् अत्र कल्पितमपि प्रति
बिंबं बिंबप्रतीतिहेतुरिति यथाऽऽस्थीयते तत्रापीत्यर्थः न च तत्र प्रतिबिंबज्ञानमेव हेतुर्न प्रतिबिंब इति वाच्यम् ज्ञानमात्रस्याहेतु
हेतुत्वे त्वात् प्रतिबिंबावच्छिन्नस्यैतत्त्वे प्रतिबिंबस्यापि तद्धेतुत्वाद्वियातादित्यनात्मनो कल्पितत्वाद्भेदस्य च निर्वक्तुमशक्यत्वात्प्रमाता
देतत्कोचरत्वानुपपत्तेश्च विद्याया अविद्योपमर्दस्वभावत्वाद्विद्याया आचार्योपदिष्टतत्त्वमस्यादिवाक्योत्थोऽन्वयादिना शोधिततत्त्वपदा
र्थस्याधिकारिणोऽलक्षणयोत्पत्तिसंभवात् उत्पन्नया विद्यया संवित्सुखात्मकब्रह्मात्मैक्यावरकाज्ञानोपमर्दात्स्वयं संवित्सुखा
त्माहमस्मीति स्वरूपेणावस्थितः कृतकृत्योऽधिकारी संपद्यत इत्युपसंहरति तस्मादिति उक्तेऽर्थे ग्रंथाद्यवाक्यानि विवृणुपदानीति
वेशयति अत इति ॥

वे॰ स्तु॰
टी॰
७२

पूर्वोक्तयुक्तीनां श्रुतिमूलतयाभासत्वं पराकर्तुं श्रुतीरुदाहरति विज्ञानमित्यादिना अनेकशाखासु विद्यमानाः श्रुतीरुदाहरता
आत्मनः आनंदात्मकत्वाकारानां स्वारस्येनात्यर्थलिंगमभ्यासो दर्शितः न केवलं श्रुतिप्रामाण्यमात्रेणानंदरूपत्वं किंतु युक्त्यापि मैत्रेयी
ब्राह्मणे श्रुत्यादितमानंदमयत्वमात्मन इति हेत्वंतरमाह न वा अरे इत्यादिना श्रुत्यर्थोपि स्पष्ट एव ननु श्रुत्यादिना ह्यात्मन आनंदम
यत्वस्येति वदतात्मनि ब्रह्मण्यानंदत्वं धर्मः प्रतीयते एवं सच्चिदादिपदानां ब्रह्मणि प्रयुक्तानामपि धर्मा अर्था उक्ताः तत्र इमं विचारमारभ
ते नन्विति संतीति वर्तते तेन वेति आत्मनि निष्ठा न भवंतीत्यर्थः आनंदत्वादयो धर्मा आत्मनि संतीति पक्षे द्वेधा विकल्पमाह आद्य इति
असत्या आरोपिता इत्यर्थः सत्यत्वं कालत्रयेप्यबाध्यत्वमिति पक्षे द्वैतापत्त्या दूषयति नाद्य इत्यादिना कल्पितपक्षे दूषयति नेतर
इति किं स्वरूपेणानंदत्वं कल्पितमुतात्मन्येव तत्कल्पितमित्याद्यं दूषयति धर्मिण इति किमयमानंदरूपं न भवेदित्यर्थः
द्वितीयमर्थांतरन्यासेन दूषयति नहीति ननु किमिदमापाद्यमानमनानंदत्वमानंदभिन्नत्वं वा आनंदत्वानधिकरणत्वं वा आद्ये

विज्ञानमानंदं ब्रह्म को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् सैषानंदस्य मीमांसा भवतीत्यारभ्य यश्चायं पुरुषे
यश्चासावादित्ये स एक इत्यंतेन भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेत्यारभ्य आनंदो ब्रह्मेति व्यजानादित्यं
तेन यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतिशतेभ्यः न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः
प्रियो भवतीत्यारभ्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्येतेन श्रुत्यादिना चात्मन आनं
दरूपत्वस्य नन्वानंदादयो धर्मा आत्मनि संति न वा आद्ये किं सत्या असत्या वा नाद्यः द्वैतापत्तेः नेतरः धर्मिणोऽनानंदत्वापत्तेः
नहि रजतत्वं यत्रारोप्यते तेन रज्यते न चानानंदत्वमानंदभिन्नत्वं तदापि नास्तीति वाच्यम् तथा ह्यानंदरूपत्वासिद्धेः न द्वितीयः
आनंदत्वानाश्रये आनंदव्यवहारादर्शनात् न च सर्वव्यवहारातीतोऽलौकिक एवायमानंदः

दांतिनं प्रत्यापाद्यासिद्धिरित्याशंक्याह तच्चेति आनंदभिन्नत्वं नापाद्यमित्यभिप्रेत्याह तथापीति आनंदरूपत्वासिद्धिमुप
पादितं प्रसंगादात्मन्यसत्त्वपक्षमपि दूषयति न द्वितीय इति व्यवहारोभिवदनरूपः आनंदपदस्यानंदत्वविशिष्ट एव गृहीत
संगतित्वात् तदनधिकरणे घटादावानंदपदप्रयोगलक्षणव्यवहारादर्शनवदात्मन्यपि तथा स्यादित्यर्थः ननु स्थितेष्वानंदे ३९२ ७२
षु वैषयिकेष्वानंदपदप्रयोगाग्रहे आनंदत्वव्यभिचारदोषात् तत्परिहाराय आनंदत्वकोटीकृतेषु प्रवर्तितानामानंदशब्दः अयं तु
ब्रह्मानंदो नोपास्थितः सर्वप्रमाणातीतत्वेनालौकिकत्वात् तत्र आनंदत्वानधिकरणे ब्रह्मानंदे लौकिकव्यवहाराभावप्रसंजनं नानि शव् २
ष्टं यो वै भूमा तत्सुखमिति वैदिकसुखादिशब्दप्रयोगादानंदव्यवहारः परीक्षकाणां युज्यते स्वर्गसुखादिव्यवहारवदिति शंकां दूषयति न

तर्हि ब्रह्मानंदे वेदानां दृष्यवहारं वदन्वादी प्रष्टव्यः किं पदार्थतया वेदोऽलौकिकानंदं प्रतिपादयति उत वाक्यार्थतया नाद्यः इत्या
ह लौकिक इति ननु प्रमाणानीतत्वानतीतत्वाभ्यां विशेष उक्तस्तत्राह अन्यथेति यथा नीलपीताद्यवांतरभेदेपि घटव्यक्ती
नां घटत्वेनोपस्थितानां घटशब्दवाच्यत्वमेवमवांतरभेदेपि सर्वानंदव्यक्तीनां सामान्यानंदत्वेन क्रोडीकृतानां युज्यते एवानंदश
ब्दवाच्यत्वम् न च लौकिकशब्द एव संगतिग्रहीतानं वैदिकानंदशब्द इति वाच्यम् लौकिकवैदिकशब्दयोरभेदात्स्वरा
द्युपाधिकत्वाद्भेदव्यपदेशस्य तथा चानंदत्वानाश्रये आत्मन्यानंदव्यवहारो नैव युज्यते इत्यर्थः प्रमाणलक्षणोक्तिस्तु प्रयो
गचोदनाभावादर्थैकत्वमविभागात् आकृत्यधिकरणोपोद्घाततया लोकवेदयोः पदपदार्थान्यत्वानन्यत्वे विचार्यो
ते तत्र लोकवेदयोस्तावत्पदान्यत्वं स्वरादिधर्मभेदात्पदान्यत्वाच्च तदर्थोपि भिद्यते इति प्राप्ते सिद्धांतः अर्थैकत्वपदपदार्थयो
रेकत्वं कुत इति चेत् अविभागात् प्रत्यक्षप्रत्यभिज्ञानात् यएवाग्नि वर्णो लौकिके पदे प्रतीयंते तएव वैदिकेपि पदे प्रत्यभिज्ञा
यंते वर्णात्मकं च पदं तेनातो न लौकिकपदाद्वैदिकं पदं भिद्यते यत्तु धर्मभेदाद्भेद इत्यर्थभेदहेतोरेव धर्मभेदस्य भेदहेतुत्वात् न च सर्वेष नत्र

लौकिकवैदिकपदार्थयोरेकत्वात् अन्यथा लोकवेदाधिकरणविरोधः न च वाक्यार्थ एवायमानंदः तेनापि आनंदत्वा
प्रतिपादनात् अखंड एव तात्पर्यात् न च सर्वेषां लौकिके सुखे कस्यापि कामनासंभवाद्विषयादेरपि लौकिकसुखसजाती
यत्वात् अत्र केचित् अनानंदत्वा वृत्तिमात्रमानंदत्वेन तु प्रसिद्ध आनंद एवात्मा धर्मिधर्मभावानभ्युपगमात् न चव्यावृत्त्याधि
द्वैतापत्तिः तस्याश्चाश्रयानतिरेकात् एतेन ज्ञानत्वादयो व्याख्याताः

मीभेदहेतत्व एव युज्यते वौ कल्पिकस्वरादौ व्यभिचारात् एवं च सति क्रियाकारकसंसर्गात्मकप्रयोगचोदना अप्युपपद्यंते अन्य
था वैदिकपदार्थज्ञानोपायाभावात्संबंधस्य चाश्रस्तहेतुत्वान्नासामभावप्रसंगोत इति अथानंदस्वरूपत्वे वाक्यार्थतया वेदः प्रति
पादयतीत्युच्यते तदपि दूषयति नचेति पूर्वपक्षे वाक्यार्थस्य सर्वत्रालौकिकत्वान्न लोकवेदाधिकरणविरोध इति भावः ब्रह्मानंद
स्य काम्यमानत्वाच्च नालौकिकत्वमिति हेत्वंतरमाह नचेति आनंदत्वाधिकरणानधिकरणत्वाभ्यामात्मनि द्वैतापत्त्यादि दोष
प्रसक्तौ तत्परिहारस्त्वनेकदेशी संक्षेपशारीरकाचार्यमतमुत्थापयति अत्रेति तदुक्तं ब्रह्मेतराणि किलनास्य वपूंषि ते
षां वृद्धौ स्फुरंत्यपरतूपनिवृत्तिभावादिति आत्मानंद इति कोर्थ इत्यपेक्षायामनानंदव्यावृत्तिमात्रं तेनानानंदव्यावृत्त्युपाधि
ना आत्मन्यानंदशब्दः प्रवर्तते नानंदत्वधर्मपुरस्कारेणातेनतोक्तविकल्पावकाश इति ननु धर्मवद्व्यावृत्तिरपि सत्यसती वे
ति पूर्वोक्तदोषता दवस्थ्यमिति तत्राह नचेति एवमानंदत्वधर्मप्रयुक्तदूषणं प्रतिक्षिप्यतन्न्यायेन ज्ञानत्वादिधर्मप्रयुक्तमपि
दूषणजातं प्रतिक्षिपति एतेनेति अज्ञानव्यावृत्तिरेव ज्ञानशब्दात्प्रतीयते न दूषणव्यात्मनि ज्ञानशब्दप्रवृत्तिर्नितु ज्ञानत्वविशिष्टेप्रा

एवंहिहि

वे॰ मु॰ टी॰ ७३

त्यागयोगा व्यावृत्तिः किमात्मन्यानंदादिशब्दप्रवृत्त्याउपाधिः उत नवाच्यः आद्यं निरस्यति तन्नेति आत्मव्यतिरिक्तत्वाभावेनोपाधित्वायोगा
त् द्वितीयं दूषयति व्यावृत्तेरिति अन्योन्याश्रयप्रसंगाद्योहवादो नयुक्त इत्यर्थः विवरणाचार्यमतमुत्थापयति अन्ये त्विति
लोके पीत्यपि शब्दो लौकिकात्मानंदसंग्रहार्थः ननु वैषयिकसुखे लोके आनंदः नचतत्रानंदत्वं कल्पितमबाधादित्याशंक्या
ह तत्रापीति धर्मिधर्मभावस्य भेदाभेदाभ्यामयुक्तत्वादित्यर्थः नत्वात्मा कल्पितः कल्पितधर्माधारत्वान्मिथ्यारजतवदि
तितत्राह नचैतावतेति कल्पितरजताधारे शुक्तिकाशकले व्यभिचारादिति भावः
तिनपश्चाच्चपुरुषार्थतया नोपादेयः स्यादितितत्राह नचैतावतेति कल्पितरजताधारे शुक्तिकाशकले व्यभिचारादिति भावः एवं चानंदत्वधर्मपुरस्कारेणानंदशब्द आत्मनि
तन्नास्वमिमतस्मात्मा आनंदरूपः आनंदत्वाधिकरणत्वाल्लौकिकानंदवदित्यर्थः

तन्न व्यावृत्तेरपदार्थत्वाद्योहवादाय तेऽव्यावर्तकधर्मस्यावश्यं वक्तव्यत्वाच्च अन्यथाव्यावृत्त्यसिद्धेः नचस्वरूपेणैव
व्यावृत्तिः आत्मनो व्यावृत्तत्वात् अन्यथाऽव्रह्मत्वापत्तेः अन्येतु आनंदत्वादयो धर्मा यत्र कल्पितास्तेषु वृ आनं
दादिपदार्थाः लोकेपि प्रसिद्धाः तत्राप्यानंदत्वादीनां कल्पितत्वात् नचैतावतानंदस्य काचिद्धानिरस्ति धर्मस्या
नुपादेयत्वात् तदाश्रयव्यक्तेरेवाभिलषणीयत्वात् तद्व्यापातरमणीयमिवाभाति विशिष्टस्यैवानंदपदा
र्थत्वाद्व्यक्तिमात्रे तदनुपपत्तेः कल्पितानंदत्वाश्रयस्यानानंदत्वप्रसंगानिवृत्तेश्च नहि योधर्मी यत्र न स्वाभावि
कस्तदं तत्र भावितः पदार्थः स संभवति अन्यथा शुक्तेरपि रजतत्वपदार्थतापत्तेः ॥ ७ ॥

प्रवर्ततेतस्य च कल्पितत्वान्नद्वैतहानिरित्युक्तं भवति तदेतत् दूषयति तदपीति अत्रायमाशयः आनंदत्वमानंदशब्दप्रवृत्ता
वुपलक्षणमुत विशेषणं वा नाद्यः शून्यानंत्यप्रसंगात् व्यक्तिविशेषाप्रतीतिप्रसंगाच्च द्वितीयेपि विशिष्टमतिरिक्तमनति
रिक्तं वा आद्यं दूषयति विशिष्टस्यैवेति तथा चाखंडवाक्यार्थासिद्धिरिति भावः द्वितीयं दूषयति कल्पितेनेति इदमेवार्थं स्पष्टयति ७३
नहीति अत्र विपक्षे बाधकमाह अन्यथेति अयमाशयः कल्पितधर्माश्रयस्यान वस्तु नस्तत्स्वरूपत्वमन्यथा धर्मस्य कल्पित
त्वमेवेन स्यादिति किंचात्मा कल्पितः कल्पितधर्माश्रयत्वान्मिथ्यारजतवत् नच शुक्तौ व्यभिचारः शुक्तिस्वरूपाप्रयुक्तत्वान्नदा
धारत्वस्यान्यथा रजतादेरपि वृत्तिप्रसंगात् मुख्यतया शुक्तेर्विशिष्टत्वेन शुद्धशुक्तिस्वरूपत्वाभावान्न तो व्यभिचार इति ॥ श्री

एवमेकदेशिनोपन्यस्तं यत्सिद्धांतयति अत्रैवेति विशिष्टस्यानंदत्वधर्मविशिष्टस्यानंदशब्दवाच्यत्वपक्षे आत्मैवोभयथा-
प्यानंदइत्यर्थः विशिष्टं हि विशेषणद्वयात्मकमेव तथा च विशेषणमानंदत्वसामान्यं तदाश्रयाश्च व्यक्तिरुभयमात्मैव यतः कथं
उपाधिषु मनोवृत्तिविशेषेषु प्रतिबिंबितत्वात्मा तदवच्छिन्नाव्यक्तिरूपतां प्रतिपद्यते तास्तु उपाधिभिन्नास्तास्ता व्यक्तिषु बिंबवदनुग-
तबुद्ध्याव्यादकत्वात्सामान्यानंदरूपतां भजते इति सर्वात्मनात एवमुक्त्वात्मानंद इत्यर्थः एवं व्यक्तिरेवानुगतबुद्धिहेतुत्वात्सामा-
न्यशब्दाभिधेया विशेषाकारबुद्धिहेतुत्वाद्व्यक्तिशब्दितेति तदुक्तं तत्र तत्त्वकारैः नहि जातिर्नाम व्यक्तेरर्थांतरभूतं किमपि तत्त्वमस्ति
अपितु वस्त्वेव द्वैकं व्यावृत्त्यनुगततया बुध्यते इति आत्मन एवोभयरूपत्वे लोकप्रसिद्धिमित्यभिप्रेत्य पक्षांतरमाह व्यक्तिर्वेति श्लोकं
व्याचष्टे यदीत्यादिना व्यक्तिर्वेति पक्षमुपपादयति अथवेति ननु व्यक्तिपक्षे सर्वासु व्यक्तिषु शक्तिग्रहः किं चैदेववा नाद्यः आनं-

अत्रोच्यते उपाधिसंश्रयोद्यात्मा वानंदत्वं तदाश्रयः विशिष्टशक्तिपक्षेतु व्यक्तिर्वा शक्तिगोचरः ६३ यदि लोके आ-
नंदत्वविशिष्ट एवानंदपदार्थस्तदात्मैवानंदपदार्थो मुख्यः एकस्यैव नानोपाध्यनुप्रविष्टस्यानुगतव्यावृ-
त्तिबुद्धिजनकतया जातिव्यक्त्युभयरूपतोपपत्तेः यथैकस्मिन्नेव स्वरूपे सर्वकल्पनारहिते मुखे चेशदौ बिंबप्रतिबिंबस्व-
रूपमिति द्विविधव्यवहारस्योपाध्यनुप्रविष्टत्वारोपादनंतरं दर्शनादित्युक्तं लक्षणास्थले अथवा व्यक्तिरेव सर्वत्र पदश-
क्तिगोचरोस्तु नच व्यक्तीनामानंत्यात्पदशक्तिसंबंधव्यभिचारदोषप्रसंगः विशिष्टशक्तिपक्षेपि तुल्यत्वात् विशेषणा-
भेदेपि विशेष्यभेदे न प्रतिविशेष्यभेदं विशिष्टभेदात् तस्मादशक्येनापि शक्यतावच्छेदकेनानुगतशक्यव्यवहाराय
शक्तिव्यावृत्तिव्यवहारयोर्जनयितुं शक्यत्वात् तत्रापि शक्तिकल्पने मानाभावात् कारणस्वरूपबहिर्भूतकारणतावच्छे-

दकवदिति भावः न द्वितीयः यासु व्यक्तिषु शब्दस्य वाच्यवाचकसंबंधो गृहीतस्ततोन्यत्र प्रवर्तमानः शब्दः स्ववाच्यं व्यभि-
चरेत्तेनसर्वासामनुपस्थितेः न द्वितीयः यस्तु व्यक्तिषु शब्दस्य वाच्यवाचकसंबंधो गृहीतस्ततोन्यत्र प्रवर्तमानः शब्दः स्ववाच्यं व्यभि
चरेत्ततो न व्यक्तिः शक्येति चोद्यं परिहरति नचेति यत्रोभयोः समो दोष इति न्यायेन हेतुमाह विशिष्टेति आनंत्यादिदोषोप
पादनाय विशिष्टस्यानेकत्वमाह विशेषणाभेदेपीति ननु विशेषणैकेन विशिष्टस्याप्यैक्यं संपाद्यते इति युक्तमशक्यत्वात्
नापि ताप्यंश्च सत्वात्तस्माद्विशिष्टवाच्यतापक्षेप्यानंत्यादिदोषो ध्रुव एवेत्यर्थः कथं तर्ह्यनुगतव्यवहारो दाचाव्यक्तेरन्यव्यावृत्त्या
प्रतीतिश्चानंत्यादिपरिहारश्चेति तत्राह तस्मादिति ननु कथमशक्येनेत्युच्यते यतो गोपदफोत्वविशिष्टैव व्यक्तिः प्रतीयते इ-
ति तत्राह तत्रापीति प्रतीतेरन्यथासिद्धिः शक्तिग्रहाहितसंस्कारवशात्तदुपस्थितेरित्यर्थः ।। ।।श्रीरामायनमः

नन्वेवं तवाप्यानंदादिपदानुक्तसंस्कारवशात् सच्चिदानंदत्वविशिष्टात्मप्रतीतेर्न शुद्धस्य लक्ष्यस्य पदादुपस्थितिरिति शंकां परा कु-
र्वन्नुपसंहरति तस्मादिति आनंदत्वमप्यात्मैकव्यक्त्यतिरिक्तसामान्यानभ्युपगमात् उपायेस्तटस्थतया शुद्धस्यैव प्रतीतेरिति आ-
द्यावेदितत्वान्न दोष इति भावः एवमात्मनः आनंदादिरूपत्वे श्रुतियुक्तिभ्यां निर्णीते नैवाक्योत्थाद्वैतसाक्षात्कारादावरकाज्ञाने प्रवृत्ते
स्वात्मारामस्याचार्यः स्वस्यानुभवं कृत्स्नमभिनयति आनंदरूपमिति प्राप्य साक्षात्कृत्य सदाद्वितत्वकर्तृत्वे प्रमाणमाह अपूर्वादी-
ति तद्वपुस्तदात्मकं वपुरर्थः तच्छरीरमिति वा ननु सद्वयस्याद्वयात्मकत्वमनुपपन्नं प्रमाणविरोधान्नत्राह योहमिति
अद्वयस्य सद्रूपत्वेनाधिष्ठानत्वात् द्वयत्वस्याज्ञानकल्पितत्वान्न प्रतीतेर्भ्रमत्वान्नाद्वयात्मकत्वं प्रमाणविरुद्धमिति भावः न
न ब्रह्मसत्त्वादधिष्ठानमित्यनुपपन्नं नास्ति ब्रह्मेत्येव प्रतीतेरित्याशंक्याऽस्ति ब्रह्मेति चेद्वेदेत्यादिश्रुतिजन्यात्मबोधविरो-

तस्मादानंदस्वरूपत्वेप्यात्मनो न काचिदनुपपत्तिः आनंदरूपमात्मानं सच्चिदद्वयमनन्तकं अपूर्वादिप्रमाणोत्थं प्राप्याहं
तद्वपुः स्थितः ४४ योहमद्वयवस्त्वेवमद्वये दृढनिश्चयः प्राप्य चानंदमात्मानं सोहमद्वयविग्रहः ४५ नास्ति ब्रह्म स-
दानंदमिति मे दुर्मतिः स्थिता क्व गता तामहं न जानामि यदाहं तद्वपुः स्थितः ४६ पूर्णानंदाद्वयेनत्वे मयीदं जग-
दाकृतिः बोधेऽबोधकृदेवासीद्बोधः क्व गतोऽधुना ४७ संसाररोगसंग्रस्तोऽहं खराग्निविवायरः आत्म-
बोधसमुत्पन्नादानंदाब्धिः कथंस्थितः ४८ योहमल्पेपि विषये रागवानतिविह्वलः आनंदात्मनि संप्राप्ते सरा-
गः क्व नु गतोऽधुना ४९ यस्य मे जगतां कर्तुः कार्यैः पहतात्मनः आविर्भूत परानंद आप्तः श्रुतेर्बलात् ५० ॥

ना प्रा

धान्नेति परिहरति पूर्णेति तर्ह्यज्ञानमप्यबाधितत्वाद्ब्रह्मवत्सत्यमिति तन्मूलकं जगदपि न मिथ्येति तत्राह बोध इति बोधे ब्र-
ह्मात्मैक्यसाक्षात्कारे समुत्पन्ने सत्यज्ञानं क्व गतं दीपे सति तम इवेत्यर्थः तथा चाज्ञानवाध्यमज्ञानं मिथ्येति भावः नन्वज्ञा-
नाज्ञानयोरेव विरोधस्ततः सुखात्मरूपाधिष्ठानावरकाज्ञानस्य तत्त्वबोधान्निवृत्तावपि संसारनिवृत्तिः कथमित्याशंक्योपा-
दाननिवृत्त्योपादेयस्यापि निवृत्तिस्तंतुनाशे पटनाशवदित्यभिप्रेत्याह संसारेति आनंदाब्धिरिति विशेषणफलमाह यो- ७४
हमिति रागमूला हि प्रवृत्तिः निरतिशयसुखे सर्वेषां सुखानामंतर्भावात् प्राप्ते च तस्मिन्नस्तं वस्तुतस्यापि प्राप्तत्वान्न तत्र रागाभावा-
न्न प्रवृत्तिरित्यर्थः नन्वज्ञानस्यानंदात्मावरकत्वं न युज्यते सुषुप्ते सत्यप्यज्ञाने सुखस्य भानात् अन्यथा सुखमहमस्वाप्समि-
ति परामर्शो न स्यादित्याशंक्य कार्यकारणपरिणमतमज्ञानं सुखावभासप्रतिबंधकं तत्स्वरूपेणेत्याह यस्येति ॥ श्री

नन्वात्मा तावदपरोक्षः तद्भिन्नं ब्रह्म परोक्षं तमात्मा च भाति तथा च सति ब्रह्मसाक्षात्कारे कथं संसार इत्याशंक्यात्मज्ञाने किमहं कर्त्तेत्येव
ज्ञानेन अथवा ब्रह्मस्वरूपसाक्षात्कारः नाद्यः तस्यानात्मज्ञानत्वात् न द्वितीयः विचारात्प्राक् तदसिद्धेरित्याह परात्परोऽस्मीति
ननु तत्त्यक्तौ को दोषस्तत्राह त्वां विनेति ब्रह्मणोंऽशेन सद्रूपत्वान्न द्वित्वभासत्वप्रसंगान्न त्यागो न युक्त इत्यर्थः ब्रह्मणोऽपि प्रत्य
गभेदे जडत्वप्रसंगात्प्रतीचोऽभिन्नं ब्रह्म युज्यत इत्याह मां विनेति नमस्कार्यत्वे वंधनिवृत्त्युपकारकत्वं हेतुमाह देहेति
ननु वंधमुक्त्योः को विशेष इत्याशंक्याह विशुद्ध इति बद्धस्याहं मलिनता लोके प्रसिद्धा तथा न्यूनताऽदीनत्वात् मुक्तेतु
तद्विपरीतत्वं लोकादेव सिद्धमिति विशुद्धो मलरहितो द्वितीयाभावात् पूर्णो हि भोगाकाशादपि पूर्णतम इति त्रिविधप
रिच्छेदशून्य इत्यर्थः एतदेव निरतिशयमहत्त्वं स्पष्टयति असंस्पृष्टेति तत्त्वसाक्षात्कारसाधनानां तु करणशुद्धिहेतू
नां वेदान्तानुवचनादीनां कार्यलिंगेनानुष्ठितत्वमाह तत्त्वमादीति जालशब्दः समूहवचनस्तेन सर्वैर्वेद इत्यर्थः ३०

परात्परोऽस्मि त्वद्ध्यातोऽसि प्रेषितोऽसि चिरं मम इदानीं त्वामहं प्राप्तो न त्यजामि कदाचन ५१ त्वां विना नित्यः स्वरूपोऽहं मां विना
त्वं कथं स्थितः द्विष्टः इदानीं मया लब्धो योऽसि योऽसि नमोऽस्तु ते ५२ देहाभिमाननिगडैर्बद्धो वो धाव्यतस्करैः चिरं तेदृशो
नादेव त्रातिर्तव्यो न त्यजामि ५३ विशुद्धोऽस्मि विमुक्तोऽस्मि पूर्णोऽस्मि पूर्णतमाकृतिः असंस्पृष्टपरमात्मानं म
तत्त्वस्मा इकोदयः ५४ तत्त्वमादि वचोजालमास्पृष्टं मसकृत्मुरा इदानीं तत्त्ववादेव पूर्णानंदो व्यवस्थितः ५५
ननु पूर्णानंदस्वभावस्येदात्मा कथं न संसारावस्थायां स्फूर्ति न च परमप्रेमास्पदतयात्मनः स्फूर्त्तिरेवानंदस्वरूपस्य

लक्षणमेतत् अष्टचत्वारिंशत्संस्कार नित्यानित्यवस्तु विवेकाद्यन्तरंगसाधनमपि संपन्नमित्यर्थः वेदान्तवाक्यविचारजन्यसाक्षा
त्कारादेव मुक्तिर्न कर्मसहितादिति संन्यासस्यावश्यकत्वसूचनायाह इदानीमिति तच्छ्रवणं वेदान्तश्रवणविचारः जन्यसा
क्षात्कार इत्यर्थः नन्वानंदरूपत्वमात्मनो न युज्यते तद्रूपेणाप्रतीयमानत्वात् घटादिवदिति शंकते नान्विति यद्यप्यह
मानंदरूपेणैव तस्याज्ञानविषयत्वादित्यत्र प्रागेवानंदांशस्याज्ञानावृतत्वमस्फुरणकारणमुक्तं तथापि तदावरकाज्ञाना
दिविषयकविचारेणातितराहृढीकर्तुं स्फुरणानिरवनन्यायेनाचार्यः प्रवर्त्तत इति न दोषः मा न भूवं किं तु भूयासमेवे
ति तावदिच्छाविषयत्वेनात्मा प्रतीयते तदेव सुखस्फुरणं तदतिरिक्तसुखाभावादिति ततोऽप्रतीयमानत्वमसिद्धमित्यन्
यदूषयति नचेति किं वस्तुतो निरतिशयानंदरूप आत्मा परमप्रेमास्पदत्वेन भासते इत्युच्यते उत निरतिशयानंदोऽह
मस्मीत्यभिमन्यते वा आद्यमंगीकृत्य द्वितीयं दूषयति ताद्दगिति ॥ श्री ॥ ॥ ॥ ॥ ॥

टी॰
वे॰मु॰
७५

नि १ ………… नि २

ननु सुखमहमस्वाप्समिति परामर्शाद् अभिमन्यत एव सुखरूपतामिति तत्राह नहीति ननु सुखं सुप्तेयद्भासते तदपि निरतिशयमेव नाहं नि
त्ये आत्मसुखे कश्चिदतिशयोऽस्ति तत्राह आनंदमिति आनंदोऽहमित्यभिमानस्य ज्ञानविशेषत्वेन सुषुप्तिकालेऽभावात् भासमानमप
रिस्फुटं न भासते इत्यर्थः नन्वानंदात्मनोऽप्रतीतिरनानंदात्मकत्वादेव न किं तु प्रतिबद्धत्वादिति शंकते संसारेति नान्योऽत
इति आत्मनः परमात्मनः अनेन जीवेनात्मनेति सामानाधिकरण्याज्जीवब्रह्मणोरेकत्वमित्यर्थः ननु ज्ञानं न जीवे नवा
३४ विवर्ते ब्रह्मणि किं तु चिन्मात्रे निर्विभागे तत्प्रागेवावेदितमिति तत्राह न चेति तत आनंदरूपत्वप्रतिबंधः किं वास्तवो वाऽवस्तानव
धानमात्रेणाप्रतिभासमानात्कल्पितो वा आद्यमनूद्य दूषयति यदीति द्वितीयमाशंक्य परिहरति न चेत्यादिना आत्मन्यनवधान
मात्रं प्रतिबंध इति संबंधः अनवधानमुपपादयति केवलेति ईश्वरमात्मानमिति सामानाधिकरण्याद् ऐक्यमीप्सितं तु तत्त्वमस्यभिमानस्येत्य

न हि मोक्षावस्थायां यादृगानंदोत्माऽऽत्मनः श्रूयते एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीत्यादिश्रुतेः तादृगानंदात्मा
भिमानः कस्यचिदप्यस्ति आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति मोक्ष एव तदभिव्यक्तिश्रवणाच्च संसारावस्था
यां प्रतिबंधसद्भावाद्भासमानमप्यानंदस्वरूपत्वं नाभिमन्यते इति चेत्कस्तर्हि प्रतिबंधः अज्ञानं तत्कार्यं वा आद्ये जी
वस्य परस्य वा नाद्यः तस्य सर्वज्ञस्य तदभावात् नांत्यः तस्य परेणाभेदात् नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति मंतेत्यादि अ
नेन जीवेनात्मना तत्त्वमसि अयमात्मा ब्रह्मेत्यादिश्रुतिभ्यः न तु कल्पनामात्रेणैव जीवस्याप्यज्ञानं न वस्तुतोऽस्ती
ति वाच्यं परस्मिन्नपि प्रसंगात् न च चिन्मात्रनिष्ठमज्ञानं तत्सर्वात्मनाऽप्रतिबध्नात्येवेति वाच्यं यदि संसारावस्था
यामप्रतिबद्धस्वात्मानंदः आनंदो नास्त्येव कस्य प्राप्ता तर्हि प्रतिबंधनिवृत्तिः स्यात् नाहि संसारिणामज्ञानसमा
रनिवृत्तिः संभवति न चाप्रतिबद्ध एवात्मानंदः संसारावस्थायामप्यस्त्येव केवलमज्ञानसमुद्रे तद्धेतोऽनः पातिशय्या
दि विषयविषविषलस्मात् तद्दर्शनाभिलाषलसमानसस्य तद्दर्शनवेलायामप्यत्यंतभावनासमर्पितविषयाविड्ढिश
कुष्टहृदयस्य परमप्रियतमं जगदीश्वरं सर्वांगप्रोततयातिसन्निहितमप्यात्मानमीप्सितु तत्त्वमस्यभिमानस्यस्व
श्रीवत्से ग्रैवेयकाद्यनवधानवदनवधानमात्रं स्वात्मनि प्रतिबंधो न वस्तुतः प्रतिबंधोऽस्तीति वाच्यम् ॥ ७ ॥ ६ ॥

त्यर्थः तेषु दर्शनयोग्यतामाह अतिसंनिहितमिति साक्षादपरोक्षाद्ब्रह्मेति श्रुतेरित्यर्थः परमेति यो वै भूमा तत्सुखमि
ति ब्रह्मणः सुखश्रवणादित्यर्थः आनंदात्मनो जगत्कारणत्वादीश्वरत्वमाह ईश्वरमिति आनंदाद्ध्येवेति श्रुतेरित्यर्थः उपाद
नत्वमाह द्वैत इति उक्तविषया एव विषं तेन विषमस्तदधीनस्तस्येत्यर्थः ननु विषमप्यौषधादिना त्याज्यते एवं विवेकेन
विषयत्यागो युज्यते इत्याशंक्याविवेक एव नास्तीत्याह तद्दर्शनेति ननु तथापि वैषयिकसुखस्यानैकांतिकत्वादेव ततो वि
रक्त्या भवितव्यमिति नेत्याह तद्दर्शनेनेति तथा च विषयदर्शने नैवं सर्वस्याप्यापुरुषव्याप्तत्वादात्मनोऽनवधानं युज्यत

इति मनः तेन सुखाद्वैतेऽप्यात्मनि रतः ……

तद्दर्शनानुपपत्तेरित्यादिना भेदस्योक्तत्वादित्यंतो ग्रंथो विस्पष्टार्थः उक्तत्वानान्योतोस्ति द्रष्टेत्यादावित्यर्थः ततो जीवस्य सर्वज्ञस्य
ग्राभिन्नस्य भ्रमबीजाज्ञानाभावान्नत्कृतद्वैतदर्शनं नयुज्यत इत्यर्थः नन्वेतथापि बिंबप्रतिबिंबयोस्तदेवेदं मुखमिति प्रत्य
भिज्ञयैकत्वेपि स्यामत्वप्रतिबिंब एव अवदातत्वं बिंब एव उपाधेः प्रतिबिंबपक्षपातित्वनियमात्तद्वदज्ञानोपाधिकं द्वैतदर्शनं
जीवस्यैव न परस्येति शंकां प्रत्याह नच भेदेपीति दृष्टांते बिंबप्रतिबिंबभावस्य नियामकत्वेपि प्रकृते ऽन्योन्याश्रयदोषग्रस्त
त्वात्तदसंभवतिः इति वैषम्येनोक्तमाह वैषम्यादिति वैषम्यं स्पष्टयति तत्रहीत्यादिना इहदार्ष्टांतिके द्वैतदर्शने सतितत्प्र
त्युपस्थापितस्याज्ञानतत्कार्यस्य प्रतिबिंबोपाधितया तदनुप्रवेशेन तदुपरागेन प्रतिबिंबादिकल्पना तस्याश्च सत्यां प्रति

तद्दर्शनत्वस्य प्रतिबंधस्याश्रयनिश्चयासामर्थ्यात् तथाहि कोसौ द्वैतद्रष्टा किं परमात्मा किं जीवः किं वा परः कश्चि
त् नाद्यः तस्य सर्वज्ञस्य भ्रमबीजाज्ञानाभावेन द्वैतदर्शनानुपपत्तेः यस्याज्ञानं भ्रमस्तस्य भ्रांतः सम्यक् न वेत्ति सः
इति न्यायादज्ञानमिथ्याज्ञानसम्यक्ज्ञानानां समानाधिकरणत्वनिश्चयेनाविद्यावत एव तत्संभवात् अस्तु त
र्हि जीवस्याविद्यावतो द्वैतद्रष्टृत्वं न तस्य परेणाभेदस्योक्तत्वात् नचाभेदेपि बिंबप्रतिबिंबभावानतः इव द्वा
वस्थयोः सर्वज्ञत्वद्वैतद्रष्टृत्वयोरुपपत्तिरिति वाच्यम् वैषम्यात् तत्र हि पूर्वसिद्धे उपाधौ बिंबप्रतिबिंबभावा
नंतरं प्रतीयमानयोर्मलिनत्वस्वच्छत्वयोर्व्यवस्थोपपत्तिर्युक्ता इह तु द्वैतद्रष्टृत्वापितद्वैतस्यैवोपाधितया तदनु
प्रवेशेन बिंबप्रतिबिंबभावकल्पनायां ततः पूर्वं द्रष्टृव्यवस्थापकानुपपत्तेः नचानादिसिद्धाज्ञानप्रतिबिंबस्या
व्यनादितया ततः पूर्वमिति पर्यनुयोगानुपपत्तिरिति वाच्यम् अनादिसिद्धाज्ञानद्रष्टुरपि अनादिसिद्धस्यैव वक्तव्य
त्वात् नचासौ वक्तुं शक्यः नचसाक्ष्येव तथा तस्य सर्वज्ञस्य स्वाविद्याविरहेण तद्द्रष्टृत्वानुपपत्तेः नच सर्वज्ञ
स्याप्यन्याविद्याद्रष्टृत्वेनाविरोधः

बिंबात्मा जीवो द्रष्टा इत्यन्योन्याश्रयाद्यं प्रकारो नोपपद्यत इत्यर्थः नन्पाधिप्रतिबिंबयोरनादित्वान्नेदुत्तरकालं द्रष्टृत्वव्य
न्या २४ वस्थेत्यनुपपन्नमिति नेत्याह नचेति तथाच नान्योन्याश्रय इति भावः भवत्वेवं द्रष्टा जीवः सादिरनादिर्वा सादिश्चेत्तत्राह
अनादिसिद्धेति तथाच जीवो द्रष्टा न स्यादित्यर्थः ननु जीवादन्यः परोवानादिसिद्धो द्रष्टास्तु तत्राह नचेति
अनादिसिद्धो द्रष्टा वक्तुं न शक्यत इत्यर्थः ननु कथं द्रष्टृभावः साक्षित्वेनैव सत्वादिति नेत्याह साक्षी किं परो
वा जीवो वा आद्यं दूषयति तस्येति साक्षी किं स्वाविद्यादिपश्यति जीवाविद्यां दिवा नाद्य इत्याह सर्वज्ञस्येति
द्वितीयं दूषयति नचेति ४४ ४४ ३३ ३३ २ ३

टी० के०मु० ७६

तर्हि जीवब्रह्मणोर्भेदः किंवास्तवः उतावास्तवः नाद्य इत्याह स्वभिन्नेति स्वभिन्नस्य चाविद्यातद्दृष्टत्वेनेत्यर्थः स्वस्या
विद्यानास्ति सर्वज्ञत्वात् स्वभिन्नो विद्याश्रयो नास्ति यतः स्वभिन्नापश्यतः परमात्मनो भ्रांतत्वस्यादित्यर्थः तर्हि ब्रह्मणो भ्रां
दि तत्वपरिहाराय वास्तवो जीवपरमात्मनोर्भेदोस्तु तत्राह नान्योतइति ननु परमात्मैवद्वैतद्रष्टास्तु नच सर्वज्ञत्वविरोधः सर्वज्ञ
त्वं नाविद्यानिवर्त्तकप्रमाणजन्यज्ञानाश्रयत्वं किंतु स्वरूपचैतन्येन स्वाध्यस्तसर्वजगदवभासकत्वं नाच स्वरूपचैतन्य न१
मविद्याविरोधितस्य तत्साधकत्वात् तथा च परमात्मैव द्रष्टेनेत्याह नचेत्यादिना अविद्याऽसुप्तीत्यपि शब्दोविद्याकार्यसंग्रहा
र्थं निरंजनशब्देनाविद्याकार्यस्य निषद्धत्वात् अविद्यादिनिषेधवाक्यस्यान्यविषयत्वेनाविद्यादिनिषेधकत्वमित्या ध२
शंक्याविद्याशब्दस्याविद्यामात्रशक्तस्य वास्तवाविद्यापरत्वे लक्षणापत्तेर्नैवमित्याह नचेत्यादिना किंचवस्तुभूताऽवि

स्वभिन्नाविद्याद्रष्टृत्वे परमात्मनो भ्रांतत्वप्रसंगात् नान्योतोस्ति द्रष्टेति श्रुतिविरोधाच्च नच सर्वज्ञत्वं नाम स्वरूप
चैतन्येन स्वाध्यस्तसकलभासकत्वं तच्चाविद्यावत्वेपि न विरुध्यत इति वाच्यम् निरविद्यं निरंजनमिति श्रु
त्याविद्याया अपि तत्र निरस्तत्वात् नु च वस्तुभूताविद्याया निषेधः न तु कल्पिताया अपीति वाच्यम् साधारण
निषेधात् वस्तुभूताविद्याः प्रसिद्धश्च जीवस्य चाविद्योत्तरभावित्वे नादित्वानुपपत्तेः अन्यथा अविद्योनिवृत्तयापि
जीवभावो न निवर्त्तेत न तृतीयः जीवपरमात्मव्यतिरिक्तस्य सर्वस्यैव जडत्वेन द्रष्टृत्वानुपपत्तेः नचोभयानुग
तचित्सामान्यस्यैव द्रष्टृत्वमिति वाच्यम् तथा च सत्यविद्याया अपि तत्रैव वक्तव्यतया जीवस्य निरवद्यस्याभ्रां
तस्य परमात्मवन्नित्यमुक्तत्वसर्वज्ञत्वाद्यापत्तिः उपाधिसिद्ध्युत्तरकालीनत्वाच्च तृतीयविभागस्य नचाविद्याजंगी
व २x कारे तद्विषयकप्रश्नो दोषानुपपत्तात एव प्रष्टुरात्ते पूर्वाविद्याद्रष्टृत्वमुक्तमिति मीमांसते तस्येवममाप्यविद्याद्रष्टुः
स्वरूपस्येदानीं तयातत्वनिर्णयार्थं वक्तव्यत्वात्

विद्याप्रसिद्धा न वा आद्ये द्वैतापत्तिर्निषेधानुपपत्तिश्च ब्रह्मवत्स्यात् द्वितीये प्रसिद्धत्वादेव निषेधानुपपत्तिरित्याह
वस्तुभूतेति जीवो नादिरिति पक्षं प्रत्याह जीवस्य चेति विपक्षे भावत्वे सत्यनादित्वाज्जीवस्य सांसारिकत्वस्यानिवृत्त्या
पत्त्याऽनिर्मोक्षः स्यादिति वाधकमाह अन्यथेति अथापरः कश्चिद्द्रष्टेति पक्षं प्रत्याह न तृतीय इति सर्वज्ञत्वाद्यापत्ति भाव२
रित्यंतो निगदव्याख्यातो ग्रंथः किंच जीवपरमात्मानुगतं चैतन्यं द्रष्टेति पक्षे ऽन्योन्याश्रय दूषणांतरमित्याह उपा
धीति तृतीयप्रकारस्य चैतन्यद्रष्टृत्वे तद्दशा उपाधिसिद्धिः तां ज्ञाना दिसिद्धिः स्यात् सिद्धो चतत्त्रैरूप्यविभावप्रतिविवास्तवब्रह्म
जीवप्रकारद्वयापेक्षितत्तृतीयप्रकारसिद्धिरित्यन्योन्याश्रयादयं पक्षो न समाधीयानित्यर्थः न तु प्रश्नस्य प्रज्ञान पूर्वत्वा
दित्यत्राविद्याप्रष्टेवाविद्याद्रष्टेत्यर्थादुक्तं तथा ते प्रावात द्रष्टेति तथा च द्वैतद्रष्टुरुक्तत्वात्प्रश्नः पुनर्न युज्यते

ननु कोऽहं तद्द्रष्टेति प्रश्नो विद्याद्रष्टृस्तत्स्वरूपज्ञानेनोपपद्यते प्रश्नविषयाज्ञाने तद्विषयकशब्दप्रयोगायोगादिति तत्राह न
चेति अज्ञातएवार्थः प्रष्टव्य इत्यर्थे विपक्षबाधकेन द्रढयति अन्यथेति संसर्गज्ञानं न वाक्यप्रयोगहेतुः हुंफडादिष्ठोभप्रयो
गे व्यभिचारात्तदज्ञाने स्वैवस्य कवेदवाक्यादिषु कारणत्वेन क्लृप्तस्येतरत्रापि तस्यैव वाक्यरचनाहेतुत्वोपपत्तेः संसर्गप्रतीतेः
प्रति४४ कारणत्वे प्रमाणाभावादिति न च वाच्यमिति ज्ञायो हेतुमाह स्तोभशब्दवदिति नन्ववाधितप्रसिद्धिसिद्धस्य वाक्यरचनाहेतुत्वस्य
संसर्गप्रतीतेः कथमपह्नवः क्रियतेऽइति तत्राह संसर्गज्ञानस्य चेति ननु वेदप्रामाण्येन संसर्गज्ञानमस्ति शुकवाक्यादिवाक्येऽपि त

न च यत्त्वस्यात्मस्वरूपमपि न जानासि अयमहमिदं पृच्छामीति तस्य तव प्रश्न
एव कथं स्यादिति वाच्यम् प्रश्नविषयाज्ञाने सत्येव प्रश्नोपपत्तेः अन्यथा प्रष्टव्या
र्थज्ञानाज्ञानविकल्पेन प्रश्नाभावेनाऽदृष्टः कस्यचिद्ब्रूयात् इति न्यायेन सर्वं वक्तु
मशक्यतयाम सर्वशास्त्रमरण्यरुदितं स्यादिति न च प्रश्नविषयापरिज्ञाने
कथं तद्विषयकशब्दरचना न हि संसर्गम ज्ञात्वा शब्दरचना नामेति प्रसि
द्धेरिति वाच्यम् स्तोभशब्दवत्सार्थकस्यापि तत्स्वरूपज्ञानादेव शब्दरचनोपप
त्तेः सर्वत्र शब्दस्वरूपज्ञानस्यैव शब्दरचनाहेतुत्वात् संसर्गज्ञानस्य च शब्दरचनाहे
तुत्वेन प्रसिद्धोपात्तस्य प्रमाणशब्दप्रामाण्यप्रयोजकतयाऽन्यथासिद्धेः न च देहा
दीनां बुद्धिपर्यन्तानामहंप्रत्ययालम्बनीभूतानामितरानात्मव्यावृत्तंया प्रतीय न
मानानां मध्येऽन्यतमत् ~ ~ ~ ~ ~ ~

त्राप्नि ततः कथं तस्य प्रामाण्यप्रयोजकतेति चेदेवम् नैयायिकमते चेश्वरज्ञानस्य वेदे शुकादिवाक्ये च प्रामाण्यप्रयोजकस्य
सत्त्वात् अस्माकं पुनः हुंफडादिशब्दप्रामाण्ये तदभावेन व्यभिचाराल्लोकप्रसिद्धं धपरं परावदनादरणीयत्वात् तस्माद् ज्ञा
ज्ञानेऽपि प्रश्नसंभवाद् विद्याद्रष्टृमेमस्वरूपं तत्त्वानिर्णयार्थत्वया वाच्यमिति स्थितम् तत्र शिष्यद्वारैव द्रष्टृस्वरूपनिर्णयार्थं
प्रश्नीरादीनां द्रष्टृस्वरूपत्वमाशंक्य परिहरति न च देहादीनामिति आदिशब्देनेन्द्रियमनश्च संगृह्यते तेषां द्रष्टृस्वरू
पत्वे हेतुमाह अहंप्रत्ययालम्बनीभूतानामिति आ[illegible]अहं प्रत्ययेत्यादि विशेषणफलमाह इतरेति अन्य
तमदिति शरीरएव वा मन एव वा बुद्धिरेव वेत्यर्थः ~ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~ ॥ ~

टी० वे०मु० ७७

एतेषां समुदायो वात्मस्वरूपमिति पक्षांतरमाह समुदायो वेति शरीरस्येंद्रियाद्यपेक्षया अतिस्थूलत्वात्प्रथमत्वेनोपन्यासः
शरीरात्मवादिनामयमभिप्रायः तत्र शरीरं नाम निरपेक्षत्वगिंद्रियाधारः निरपेक्षपदमगुल्याद्यवयवानां प्रत्येकं शरीरात्व
निरासाय तेषामितरावयवसापेक्षाणामेव त्वगाधारत्वात् अहं मनुष्य इति प्रतीतेरहत्वमनुष्यत्वयोरेकमधिकरणं
प्रतीयते मनुष्यत्वं च देह एवेति सर्वसंमतं तथा च देह एवात्मा न च ममेदं शरीरमिति भोक्तृभेदेषु तया प्रतीतेः स्वगादि
वदनात्मत्वमिति वाच्यम् ममात्मेतिवत्तत्प्रतीतेरुपचारात् ततः शरीरमेवात्मेति स्थूलदर्शिनो बौद्धविशेषाः प्रति
पन्नाः केचन पुनरिंद्रियाण्येवात्मेत्याहुः इंद्रियाणां ज्ञानान्वयव्यतिरेकाज्ज्ञानकारणत्वे उपादानस्याभ्यर्हितत्वा
त्तदेवोचितं अहं काणो वधिर इत्याद्यहंप्रत्ययालंबनत्वाच्चेंद्रियाण्येवात्मस्वरूपाणीति अपरे पुनः स्वप्ने पुनः इंद्रियोपरमे
पि मनसोनुवृत्तेरहं मन इति प्रतीतेर्मन एवात्मेति वदंति विज्ञानव्यतिरिक्तस्य मनसोभावात्क्षणिकविज्ञानमे
वात्मेति विज्ञानवादिनः प्रपेदिरे इति बुद्धिपर्यंतानामित्युपलक्षणं पक्षांतरमव्यभिचारित्वेन युक्तं भवति तदपि
स्वरूपत्वेन ग्राह्यमिति एवं गुरुणा स्वरूपे शिष्यस्योपदिष्टे न च वाच्यमिति तेन निषिद्धे सत्येव निषेधात्तत्र हेतुमाह तेषामि
ति शरीरादीनां प्रत्येकं समुदाययोरात्मवस्तुस्वरूपत्वानुपपत्तेरित्यन्वयः अनुपपत्तौ चतुर्विधान्वयव्यतिरेकौ हेतुत्वे

त्र२४ नत्समुदायो वात्मवस्तुस्वरूपमिति वाच्यम् तेषामज्ञानकार्यात्मसंयोगोपकरणतया ममप्रत्ययविषयाणां छत्र
चामरादीतरभोगसाधनवद्भमदुपसर्जनतया प्रतीयमानानां प्रत्येकसमुदाययोः कार्यकारणश्चेत्तत्वाद्देयानु
पादेयस्वभावममप्रत्ययाविषयपरमप्रियतमस्वातिरिक्तसर्वावभासकसर्वदाव्यभिचार्यात्मवस्तुस्वरूपत्वानुपपत्तेः

नाह अज्ञानकार्याणामित्यादिना अनेन कार्यकारणान्वयव्यतिरेकौ दर्शितौ न चाज्ञानमेव कारणं नात्मेति वाच्यं
अज्ञानाधिष्ठानत्वेनात्मनः कारणत्वस्यासकृदुक्तत्वात् अहंप्रत्ययालंबनत्वमन्यथयति ममेति तेन भेदप्रती
यमानेऽभेदप्रतीतिरुपचरितेतिभावः न च विपरीतं शंकनीयं ममात्मेति वदति वैषम्यात् आत्मशब्दस्यान्यथाना
त्मस्वपप्रत्ययः उपचारमर्हति न चात्र तथास्ति अहंप्रत्ययस्य देहादावात्मतादात्म्याध्यासेनाप्युपपत्तेः कस्तर्हि
ममेति षष्ठ्याः संबंधः प्रतिपाद्यते इत्याशंक्याह मत्संयोगेति तत्र दृष्टांतं छत्रादीति अनात्मत्वे हेत्वंतरमाह मदुपसर्जनेत
येति तेषां मध्ये प्रत्येकं समुदायो वात्मस्वरूपत्वेनेत्संगच्छत इत्यर्थः आत्मस्वरूपं विशिनष्टि कार्येति कारणमात्रोज्ञानवि
वर्तितत्त्वात्मन्यहेयत्वं वदता प्रपंचस्य शरीरादेः दुःखात्मकत्वं सूचितम् तेन दुःखत्वप्रेमास्पदत्वलक्षणान्वय
य व्यतिरेकौ सूचितौ अनुपादेयत्वमविक्रियत्वाद्देहादाविवाहंप्रत्ययस्यात्मनि गौणत्वप्रत्याह ममेति निरतिशयसु
खस्वरूपत्वेनान्योनुपसर्जनत्वमाह परमेति साक्षित्वमाह स्वातिरिक्तेति ज्ञानेन साक्षिसाध्यान्वयव्यतिरेकौ द
र्शितौ अज्ञानादावध्यस्तेषु सर्वत्रानुगतत्वेनाव्यभिचारित्वमाह सर्वदेति एतेन देहादीनामव्यभिचारित्वम्

तस्यापीति प्रत्यक्चैतन्यस्यापीत्यर्थः अशेषविशेषेणेति इत्थंभावे तृतीया तत्र गुरुशंकां शिष्यः परावष्टे नचेति विशेषशून्ये तदनात्मकेऽ
त्यर्थः तद्रहितादृशो वस्तुस्वरूपं त्वया वाच्यमिति शिष्यस्याह तस्येति ननु संदिग्धं जिज्ञास्यं देहादज्ञानांतेभ्यो विभिन्नतया परिशेषान्निश्चितं वस्तु
निःसंदेहत्वानुपपत्तेर्जिज्ञासायोगात् किं स्वरूपप्रश्ने नेति तत्राह नचेति ननु तिष्ठतु नामाज्ञानं निश्चिते वस्तुनि संदेहादर्शनात्कथं जि
ज्ञासेति तत्राह स्थितएवेति विवेकज्ञानस्यान्वयादिजन्यतया परोक्षत्वादपरोक्षसंशयादिनिवर्तकत्वं न युज्यत इत्यर्थः ननु
विविक्ततया निश्चितेप्यज्ञाने तत्प्रयुक्तः संशयोप्यस्तीत्युक्ते अज्ञानादिसत्वे निश्चयएव नास्ति तस्मिन्नासति नाज्ञानादीति शं
कामनूद्य दूषयति नचेति अध्यस्तादन्यत्वमधिष्ठानस्य विवेकः नच सत्यध्यस्ते तदन्यत्वं ज्ञातुं शक्यं अध्यस्तस्याधिष्ठानं ज्ञा
नच देहादिबुद्धिपर्यंतेभ्योपत्यस्वरूपं त्वया परिशेषितं तदेव तत्वस्वरूपमिति गृहाणेति वाच्यम् तस्याप्यज्ञानत्वात् नचाज्ञानं
परित्यज्य तद्विषयस्वरूपमात्रं प्रत्यक्त्वं ग्राह्यमिति वाच्यम् तस्यापि जीवेश्वरतद्भिन्नत्वादिरूपेण निर्णेतुमशक्यतया संदे
हाक्रांतत्वात् ननु किंनाम निर्णये ॥ न वस्तुस्वरूपं तु निर्णीतमेवेति वाच्यम् अशेषविशेषेण तत्वबुभुत्सुं प्रत्येतस्यानुक्तत्वा
त् नच सामान्यविशेषशून्ये विशेषबुभुत्सैवानुपपन्नेति वाच्यम् तस्यैव सामान्यविशेषशून्यस्यैवावक्तव्यत्वापत्तेः नचा
ज्ञानव्यतिरिक्ततया निश्चिते स्वरूपे संदेहएव नोपपद्यत इति वाच्यम् अज्ञानस्याध्यास्यनिवृत्तत्वात् स्थितएवाज्ञाने
विवेकदृष्ट्या तद्विविक्तस्वरूपनिर्णयेपि तेनैवाज्ञानेन विषयीकृते संदेहोपपत्तेः नचाध्यस्ताज्ञानस्वरूपे स्थिते तदधिष्ठा
नस्यात्मनो विवेकोऽशक्यएवाधिष्ठानभेदेनाध्यस्तस्य पृथक्स्वरूपाभावात् ततो यदि विवेकदृष्ट्याधिष्ठानस्वरूपमात्मतत्वं
निश्चितं तदा तत्राध्यस्तमज्ञानं तत्कार्यं वा तत्तोभेदेन तत्र नास्तीत्यवधार्यैव निश्चेतव्यम् तथाच तत्राज्ञानविरहात्संदेहानु
पपत्त्या प्रश्नानुपपत्तिरेवेति वाच्यम् एतावतापि द्वैतद्रष्टृत्वोत्पादनात् नहि शुद्धस्य कूटस्थस्य द्वैतद्रष्टृत्वमुपपद्यते
मोक्षकालेपि तद्दर्शनप्रसंगात् ननु मोक्षस्य नित्यत्वेन सर्वदा सत्त्वात्सर्वोपि हि कालो मोक्षकाल एव विमुक्तश्च विमुच्य
तेइति शास्त्रात् अन्यथा मोक्षस्य कादाचित्कत्वेऽनित्यत्वप्रसंगः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
दात्मनाद्वैतेन स्वरूपाभावात् अथ यदि विवेकान्निश्चयः स्वीक्रियते ततोऽज्ञानादीत्याह ततो यदीति संदेहाभावे प्रश्नोऽजि
ज्ञासाभावादेव न संगच्छत इत्याह तथाचेति न तत्त्वाच्यमिति व्यवहितेनान्वयः नन्वज्ञानादिके त्वदुक्ते युक्त्यापरास्ते शुद्ध
मोक्षान्वयि विकाररहितं चैतन्यमवशिष्यते तच्च न द्वैतद्रष्टृ अनिष्टप्रसंगादिति शंकते एतावतापीति द्वैतदर्शनप्रसं
गस्यानिष्टत्वमाह तेपतीति नन्विति ननु मोक्षस्य ज्ञानसाध्यत्वान्नित्यत्वमसिद्धमिति तत्राह विमुक्तश्चेति पूर्वमपि विमुक्त एव
वाज्ञानवशाद्विमुक्तत्वभ्रमे तत्साक्षात्काराद्ज्ञाने उपमर्दिते विमुच्यत इत्युपचर्यते न तु जन्यते मोक्षस्य पूर्वं सिद्धत्वादि

टी०
वे०मु०
४८

मोक्षस्याजन्यत्वेनानित्यत्वे फलितमाह तथा चेति इदानीमिति मोक्षकालेमत्यपीत्यर्थः द्वैतदर्शनमोक्षयोरेककालत्वं लौकिका
नुभवबलात्कल्प्यते उत श्रुतिबलात् आद्यं निषेधयति नेति न केवलमनुभवाभावः किंतु विपरीतानुभवो बाधकोऽस्तीत्याह
सार्वलौकिकेति नेति निषेधमुपपादयति नहीति द्वितीयं दूषयति नहीति द्वैतदर्शनमोक्षयोरेककालत्वनिराकरणमु
पसंहरति तत इति ततः शब्दार्थमाह सर्वेति तथा द्रष्टृत्वमपि न निरूपितं तदुक्तं व्याख्यामिति श्रीव्यासाभिप्रायः द्वैतानुभविता
रो मुक्तिनानुभवंतीत्युक्तमाश्रित्य गुरुरुत्तरमाह हंतेति अनुभवदर्शनयोः पर्यायत्वात् द्वैतानुभवितार एव तद्द्रष्टार इति त्व
येव निर्णीतमिति स्वबुद्धिसिद्धे कः प्रसंगः तत्र च मम निरूपणप्रयासोऽपेत्यर्थः ननु द्वैतानुभवितार एव द्वैतद्रष्टार इति
स्थितेपि मोक्षस्य कादाचित्कत्वेनानित्यत्वप्रसंगे किं समाधानं भवतीति शंकते किमत इति समाधत्ते इदमिति एतदेव

तथा च मोक्षकाले द्वैतदर्शनप्रसंगो नानिष्टः इदानीं तद्दर्शनादिति चेन्न सार्वलौकिकानुभवविरोधात् नहि द्वै
तदर्शनकाले कश्चिन्मोक्षमनुभवति नहि सर्वलोकविरुद्धमर्थं श्रुतिरपि प्रतिपादयति अन्यथा शिलाप्लवनादिवा
क्यानामपि स्वार्थप्रामाण्यप्रसंगः ततो न सर्वः कालो मोक्षकालः सर्वलोकानुभवविरोधादिति हंत तर्हि ये सर्वेऽनुभवितार
स्ते द्वैतद्रष्टारस्त्वयैव निश्चिताः तथा च स्वाधीननिश्चये द्वैतद्रष्टरि कः प्रसंगः । किमत इदमतो भवति एतेषां यत्
द्वैतदर्शनं तदेव सच्चिदानंदपरिपूर्णस्वरूपमोक्षाविर्भावप्रतिबंधकमिति गृहाण आस्तां तर्हि तेषां प्रतिबंधः मम
द्वैतद्रष्टुः कुतो मोक्षो नाविर्भवतीति चेन्न हि त्वं किं तेभ्यो भिन्नः येनाद्वैतद्रष्टृत्वं भवेत् कः संशयः नहि नानात्मत्वे
नानुभवामि तेषां सुखदुःखादिना मम लेपाभावात् अहो आश्चर्यतानेकविधान्द्ववतिर्यग्जात्वभ्यादिभेदेनाभि
न्नान्परपद्वैतं न पश्यामीति वदतस्तव वचः कथं श्रद्धेयं स्यात् नहि मुमुक्षोः संन्यासिनो तत्त्वबुभुत्सोरिदमुचितं यद

स्पष्टयति एतेषामिति आविर्भावोऽभिव्यक्तिरनुभव इति यावत् तथा चानित्य एव मोक्षः परं तु प्रतिबंधवशान्नानुभूयते
यथांधकारप्रतिबंधादपवरकदेशावस्थितो घटादिरिति द्वैतदर्शनं मोक्षाविर्भावप्रतिबंधकं तस्मिन्न सत्यपि मम मो द्रष्टृभि
क्षाविर्भावादर्शनादिति शंकते आस्तां तर्हीति द्वैतद्रष्टृत्वमसि त्वं कुत इच्छसि तर्हि किंशब्दस्य चितं द्वैतद्रष्टृभ्यो
भिन्नत्वपक्षं विनियोगी कुरुते कः संशय इति भिन्नत्वमुपपादयति नहीति किंशब्दस्य चितं सुखदुःखव्यवस्थानुपपत्तिं
तत्र प्रमाणयति तेषामिति द्रष्टृभेदे प्रमाणमुपन्यस्तं ताद्वैतानुभवितृत्वमात्मनि त्वयाव्यवस्थापितं तथा च द्वैतो द्रष्टृत्व
मात्मनि वदतो मिथ्याभाषित्वमिति प्रीष्यमुपालभते अहो इति ननु परव्यामोर्थ्यं कथायामपथ्यापि वक्तव्यं तत्राह नहीति
इदं शब्दार्थमाह यदसत्यमिति ।

स्ता।
निरे

तर्हि त्वं किमित्यत्र किंशब्दस्य चितं द्रष्टृभेदपक्षं पराकृत्य तदभेदपक्षमुत्थापयति ननु त्वमिति अभिन्न इति पदच्छेदः त्वमिति पदे व्य
वस्थानुपपत्तेः औपाधिकं भेदमादायापि प्रति विंबभेदानामिव चलनादिव्यवस्थानुपपत्तेः न स्वाभाविकात्मभेदप्रमापकत्वमि
ति सूचितम् तथा चोपालंभार्हो न भवामीति पक्षांतरस्वीकारफलमाह तथा चेति एतदंगीकृत्य गुरुराह तर्हीति यदि द्वैत
दूषणतत्त्वाववस्तुतो नातिरिच्यते किंतु त्वदात्मैव तथा मति स्वात्मत्वेन पश्यन् को दृशपश्यसीत्यर्थः किंशब्दार्थमाह किमिति आ
द्यमुपालंभेन निराकरोति पश्चाद्येति आत्मनः सदयत्वदर्शने श्रुतिविरोधमप्याह एकमेवेति द्वितीयमंगीकर्तुमनु
वदति अस्तु तर्हीति उक्तदोषस्यासत्याभावणादेरनवकाश इत्यर्थः एकमेवेति एतत्तर्हि पूर्णात्मदर्शनं तव कुतो
वृत्तमित्याचार्यः पृच्छति इतं तर्हीति शिष्य आह त्वद्वचनादिति पूर्वोक्तात्तद्युक्तिरूपवचनादित्यर्थः वचनस्य युक्ति
ननु त्वत्तोऽभिन्नो ऽवाहं तथा च ममासत्याभिधानमापादयतस्तवैवासत्याभिधानमायातीति चेत्तर्हि कोऽहं त्वया त्मत्वेन दृ
ती दृष्टः किं सद्वितीयः अद्वितीयो वा पश्चाद्यानामाद्यं यमपरो दोषः यस्त्वं विद्वांसं त्वैवाचार्यं मां ग्रस्य तूपेत्य पर्यवसितं द्वैतवान्तो
न भिन्नं सद्वितीयं कल्पयसि एकमेवाद्वितीयं ब्रह्मनेरना नास्ति किंचनेति श्रुतिविरोधश्च आस्कत होद्वितीयपक्ष उक्तदो
षविरहादिति चेत्तत् इतं तर्हि कुतो मामद्वितीयमात्मत्वेन ज्ञातवानसि त्वद्वचनादुदाहृतशास्त्राच्चेति हेदं तर्हि पू
र्वोक्तमिनातः परः द्रष्टव्यमस्ति नक्षात्मनि विदिते ततः परमविदितवस्तुत्वात्सियत्स्थव्यास्यात् आत्मनात्मेति चेत्त्र आ
त्मनो वारे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुत्या आत्मदर्शनेनेतरत्सर्वं दृष्टं भवतीत्युक्तत्वात् न
न्विदमनुपपन्नं यदात्मदर्शनेनेतरत्सर्वं दृष्टं भवतीति कुत इति चेत् तथा हि किमितरत्सर्वमात्मनो भिन्नमभिन्नं
वानाद्यः अन्यदर्शनेनान्यस्य द्रष्टुमशक्यत्वात् न हि घटे दृष्टे पटो दृष्टो भवतीति शक्यं वक्तुं अन्यथा तयोरभेदाप
त्तेः नाद्वितीयः आत्मानात्मनोर्विरोधात् ॥

प्रतिपादकत्वेनोपजीव्यप्रमाणमपेक्षा यां तदाह उदाहृतशास्त्रादिति उदाहृतं शास्त्रमेकमेवाद्वितीयमित्यादि शास्त्रं ताद्यु
त्सुपक्रतात्वेतद्द्वैतमात्मात्कारो जातस्तर्हि ज्ञातव्यांतरस्याभावादतः परं प्रश्नो न युज्यत इत्याह एवं तर्हीति ज्ञाते
व्यांतराभावमाक्षिपति अस्तीति श्रुत्यात्मवेदनेन सर्वस्य विदितत्वोक्तेऽज्ञातवस्तुनोऽभावाच्च विज्ञेयांतरमस्तीति परि
हरति नन्वात्मन इत्यादिना दर्शनं नाम विचारप्रयोजकं ज्ञानं तत्प्रयोजकाया विचारः सोऽत्र श्रुतिशब्दार्थः तथा श्रुत्य
मस्या मननेन चान्यत्र यद्विशेषमपरा तमात्मात्कारलक्षणं ज्ञानं तदत्र विज्ञानं तेनेत्यर्थः ननु किं श्रुत्युक्तमेव यथा श्रुत
तथोपपन्नाद्यः श्रिन्ना श्रवनस्यापि स्वीकर्तव्यत्वापत्तेः योऽयं चेत्तत्र योऽप्यतामाक्षिपति नन्विति प्रपंचस्यात्मभेदपक्षं
दूषयति नाद्य इति आत्मानात्मनोरभेदपक्षं दूषयति न द्वितीय इति प्रत्यक्षपरा त्वेनात्मानात्मनोः स्वभावैवि

टी. वे० मु. ७९

किंचात्मानात्मनोरभेदेऽप्यात्मन्यनात्मा प्रविशत्यनात्मन्यात्मा वा आद्यं दूषयति परमार्थेति द्वितीयं दूषयति आन्त्येति अधिष्ठान
स्वरूपमेवाध्यस्तस्वरूपमधिष्ठानपार्थक्येनाध्यस्तस्वरूपानिरूपणादिति घटविचारादावनेकशो निरूपितं तथा च जगदधिष्ठाना
त्मस्वरूपे विदिते जगत्स्वरूपं विदितमिति युक्ता जगतोऽपि ब्रह्मात्मैक्यविज्ञानात् विदितत्वसंभावितं योऽपततयाश्रुतिः प्रमाणप
त्वेवेति गुरुरुत्तरमाह नैष दोष इत्यादिना सत्तास्वरूपं न तु पराभिमतं सत्तासामान्यं तस्य विशेषसापेक्षत्वेन परमार्थत्वानुप
पत्तेः अत एव दृष्टान्तेऽपि रूपशब्देनैव व्यवहरति उक्तयुक्त्यात्मव्यतिरिक्तत्वेनाभिमतस्य सर्वस्यात्मरूपत्वे तद्व्यतिरेकेणाचास
त्वे संभाविते विधिशास्त्रं निषेधशास्त्रं चोपपन्नमित्याह अत एवेति विधिशास्त्रमुदाहरति तद्यथेति यत्र ब्रह्म जात्यादि

ब परमार्थसत्यात्माभिन्नस्य नेति नेतीत्यादिना निषेद्धुमशक्यतया बाधानुपपत्तेश्च अन्यथात्मनोऽपि बाधितं तया शून्यमे [illegible] स्य २५
वावशिष्यते तस्मादात्मदर्शनेन सर्वं दृष्टं भवतीत्युपपन्नं नैष दोषः आत्मसत्तैव द्वैतसत्ता नान्यायत्तता [illegible]
[illegible] आत्मन्येव जगत्सर्वं दृष्टं दृष्टं श्रुतेऽश्रुते ९८ आत्मसत्तातिरिक्ताकाद्वैतसत्ताया अभावात् आत्मनि दृष्टे सर्वं द्वै
तं दृष्टं भवति यथा रज्ज्वादिस्वरूपे दृष्टे तत्राध्यस्तानां स्रग्दण्डादीनां स्वरूपं दृष्टं भवति तद्वदत्रात्मनि दृष्टे सर्वं दृष्टं भ
वतीति नानुपपन्नं अत एवाविधिनिषेधशास्त्रयोरपि नानुपपत्तिः तद्यथा इदं सर्वं यदयमात्मा सदेव सोम्येदमग्र आ
सीदेकमेवाद्वितीयं ब्रह्म ऐतदात्म्यमिदं सर्वं ब्रह्म वा इदमग्र आसीत् अहं मनुरभवं सूर्यश्चेति यत्र त्वस्य स
र्वमात्मैवाभूत् नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यमिति विधिशास्त्रं तथा निषेधशास्त्रमपि नेह नानास्ति किं
चन अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति अतोऽन्यदार्तं न तु तद्द्वितीयमस्ति नैवेह किंच
नाग्र आसीत् नासदासीन्नो सदासीदित्यादि भवति हि लोके रज्ज्वां स्रगाद्यध्यासि न प्रत्युपदेशः इदं सर्वं रज्जुरिति नेह
स्रगादिरस्तीति तथाप्युभयोरप्युपदेशयोर्मध्ये कतरः श्रेयानिति चेत् यद्यप्युभयोरेकार्थत्वमेव तथापि विधेरस्ति
कश्चिदतिशयः तत्र परिदृश्यमानानां यासत्तामात्मैवेत्युक्ते तदन्यत्वाल्पात्मैव परिहृत इति ज्ञानमात्रादेवाविर्भवति

जगत्प्रत्यस्तत्वाद्युपस्थापितं तत्सर्वमात्मा एक एवासीत्कार्यजातं नैवासीदित्यर्थः आत्मभेदप्रतिनिमित्तं तत्प्रतिबंधयति अ
द्वितीयमिति यत्र यस्यां निर्विशेषावस्थायां आपातरति अथ सत्यस्वरूपनिरूपणानन्तरं यस्माद्यत्सत्यं तदेवानिरू
१३४ पणीयमवशिष्यते अतस्तस्मादेशो ब्रह्मस्वरूपति आदेशो निर्देशः स्वरूपप्रतिपादनमिति यावत् तत्र शब्दप्रवृत्तिनिमि
त्ताभावादिदं तदिति निर्वक्तुमशक्यत्वेऽपि प्रपंचापवादेनावधिभूतमधिष्ठानं ब्रह्मस्वरूपमिति निर्दिशति नेति नेतीति वी
प्सा व्याप्त्यर्थायद्यत्प्राप्तं तत्तन्निषिध्यत इत्यर्थः हि यस्मान्नेति नेतीत्येतस्मादपरं निर्देशनं नास्ति तस्मादयमेवादेशो मुख्य
इत्यर्थः इतरः श्रुतयः स्पष्टार्थाः

भवतिहीत्यारभ्यप्रत्यगात्मेतिसिद्धमित्यंतोग्रंथोस्यार्थः ननुयद्यप्यद्वैतद्रष्टारोवयं नतोमत्तोनातिरिच्यंतेइतिपद्ये अद्वैतात्मसाक्षात्कार
स्यसिद्धत्वादात्मव्यतिरिक्तानात्मस्वरूपाभावात्मेवेस्यविदितत्वात् प्रष्टव्यंनावशिष्यतेइत्युक्तं तथापिद्वैतद्रष्टानिर्णीतइतिशंकते न
नुतथापीति इदानींगुरुस्त्वंचेद्वैतद्रष्टृभ्योनभिद्यसेतर्हिभवानेवद्वैतद्रष्टेतिप्रश्नोत्तरमाह यत्स्त्वितिआत्मस्वरूपमजाननृच्छतिकोहमिति
किंसंसारिस्वभावउतब्रह्मरूपइति यद्यपिदेहादेरात्मत्वपराकुर्वताकर्तृत्वादिप्रपंचस्यमिथ्यात्वमावेदयताचब्रह्मरूपतात्मनोनि
र्णीतेवतथापिपदार्थशोधनेनार्थादेवमात्मब्रह्मणोः सिध्यतिइहतुशब्दतएवतद्वक्तव्यमितितदर्थमारंभोयुज्यतेइतिशोधितप
दार्थोधिकारिणप्रपन्नायगुरुणापरवशोगुरुराह ब्रह्मैवेति द्वैतद्रष्टुर्मम ब्रह्मणश्चाभेदे ब्रह्मणिकोटस्थ्यभंगंशंकते एवंतर्हीति

पुरुषार्थस्यपर्यवसितत्वादितिचेन्न अधिकारिभेदेनोभयोरुपयोगात् कश्चिद्धिसंसारदुःखेनात्यंतमुपहतचेतास्तान्निवृत्तिमेवप्र
थमतः कामयतेतंप्रत्यादौनिषेधवाक्यमेवोपक्रम्य विधिवाक्यंतुपश्चात् यथासर्पमारोप्यभयाकंपमानंप्रतिनायंसर्पइतिनि
षेधएवादौनतुविधिः यस्तुसंततमनुद्विग्नः केमस्यजगतस्तत्त्वमित्येवंजिज्ञासतेतंप्रतिइदंसर्वंयदयमात्मेत्येवोत्तरम् न्याय्यम्
निषेधस्तुपश्चात् यथासर्पमध्यस्यतत्प्रतीकारंजानानाभिभवः पृच्छतिकिमदंपुरोवर्तीतितंप्रतिरज्जुरित्येवोत्तरम् न्याय्यं नतु
८४ निषेधः तस्मादेवमभेदेनोभयोरुपयोगान्नकस्यापिवैयर्थ्यं अतोविधिनिषेधाभ्यांपरिपूर्णसच्चिदानंदःप्रत्यगात्मेति
सिद्धं ननुतथापिकोसौद्वैतद्रष्टेत्यद्यापिननिश्चितमितिचेत् यस्त्वपृच्छःकोहमितिचेत्ब्रह्मैव एवंतर्हिब्रह्मणोविकारित्वाप
त्तिरितिचेत्कोयंविकारः द्वैतंतद्दृष्टिर्वानाद्यःसर्वस्याद्वैतस्यब्रह्मातिरिक्तस्यनिषिद्धत्वात् नहियन्नास्तितत्कस्यचित्परि
णामः यथानरशृंगं ततोसद्वैलक्षण्यंदृष्टिरेवेतिचेत्

यद्यपिविकारजातमाविद्यकमितिवहुशोनिर्णीतंतथापिप्रकारांतरेणापितन्निर्णेतुमुपक्रमइतिभावः ब्रह्मणोद्वैतद्रष्टृभेदेविका
रित्ववदन्प्रष्टव्यः द्वैतद्रष्टरिपदार्थत्रयंवर्ततेद्वैतंतद्दृष्टिःस्वरूपंचतदभेदेस्वरूपाभेदेनपरिणामित्वप्रयुक्तेकिंद्वैतंतद्दृ
ष्टिर्वेतितत्सर्वथाप्ययुक्तमितिवक्तुंविकल्पयतिकोयमितिनिषिद्धत्वान्नेतिनेतीत्यादिवाक्यैरितिशेषः ननुभूतलेघटोना
स्तीतिनिषिद्धोपिघटोयथाम्रद्विकारस्तथाद्वैतंनिषिद्धमपिकस्यचिद्विकारःकिंनस्यादितितत्राह नहीति घटस्तुनसर्व
थानिषेध्यःप्रपंचस्त्वधिष्ठानादन्यत्रनास्त्यिकाधिष्ठानेचनिषिद्धः तर्ह्यसत्वान्नपरिणामइति अत्रैवोचितंदृष्टांतमा
ह यथेति नरशृंगात्प्रपंचस्यवैलक्षण्यंशंकते ततइति असद्द्वैतस्येत्यर्थः दृष्टिरपरोक्षप्रत्ययःततोसद्वैलक्षण्याद्विकारित्वं
द्वैतस्ययुज्यतेइत्यर्थः विलक्षणस्यभावोवैलक्षण्यंविलक्षणताप्रयोजकोधर्मोदृष्टिरित्यर्थः ॥

टी॰
वे॰मु॰
८०

तर्हि प्रपंचस्य विकारत्वे द्वैतत्वं न प्रयोजकं किंतु दृष्टिसंबंधित्वं तथा च सविशेषत्वे [ति] हीत्याये न दृष्टौ प्राप्तायां द्वैतस्य विकारित्वमप्रा
प्तं यान्नेति सैव तर्हि विकारोस्त्व इति दृष्टिपक्षमपि निराकर्तुं गुरुरंगीकारयति तर्हीति किंच ज्ञानज्ञेययोर्भेदस्य प्रावर्निरस्तत्वा
त्परिशेषादपि दृष्टेरेव विकार इति हेत्वंतरमाह तदतिरिक्तेति अंगीकारितमर्थं शिष्योंगीकरोति ओमिति किं दृष्टिशब्दे
न दृष्टिरुच्यते उत विषयाभिव्यक्तिफलाभिधं चैतन्यम् नाद्यः तस्याः स्वतो जडत्वेन प्रकाशकत्वानुपपत्तेर्दृष्टित्वादित्य
ह नेति न द्वितीय इत्याह दृष्टेरिति तत्परिणामत्वमात्मपरिमाणत्वं अनुपपत्तिस्पष्टयति नहीति किंचात्मा परिणमते
चेत्तर्हि सामस्त्येन सर्वात्मना उतैकदेशेन नाद्यः आत्माभावप्रसंगात् न द्वितीयः निरवयवत्वादिति हेत्वंतरमाह कार्त्स्न्येक
देशेति अयं दोषः कार्त्स्न्यैकदेशविकल्पाख्यः कस्तर्हि विवर्तशब्दार्थ इति शंकते किंत्विति किं प्रातीतिकाकारः कस्य

तर्हि प्राज्ञप्राज्ञविवेकेन दृष्टेरेव परिणामोस्तु तदतिरिक्तद्रष्टुरभावात् ओमिति चेन्न दृष्टेः फलरूपायाः आत्म
स्वरूपांतर्भावेन तत्परिणामत्वानुपपत्तेः नहि स्वरूपस्य परिणामः कार्त्स्न्यैकदेशविकल्पेन परिणामपक्षानुपप
त्तेश्च ननु विवर्तपक्षेप्ययं दोषः समान इति चेन्न विवर्तस्वरूपापरिज्ञानात् न ह्यधिष्ठानस्वरूपातिरिक्तं विवर्तो ना
म किंचिद्वस्त्वस्ति यदात्मपक्षे कार्त्स्न्यैकदेशविकल्पावतारः स्यात् किंत्वधिष्ठानमेव दोषवशाद्विलक्षणाकारेण
भासमानं विवर्त इत्युच्यते स एव विलक्षणाकारः कस्येति चेद्वस्तुतो न कस्यापि अधिष्ठाने तस्य बाधादन्यत्राप्रती
तेः भंग्यंतरेणासत्ख्यातिव्युत्पादनमेवैतदिति चेन्न ख्यातेरप्यध्यस्तत्वात् असत्ख्यातिवादिना चार्वाके
ना तथानभ्युपगमात् सर्वशून्यवादिनस्तु सर्वं निरस्तत्वात् किमिदं ख्यातेरध्यस्तत्वमिति चेत् वस्तुतो निष्प्रकार
कायाः सप्रकारकत्वेन भासमानमेवेति चेन्न स्यैव प्रकारस्य स्वरूपं वाच्यमिति चेद्वस्तुतो निर्विकल्पकख्यातिस्वरूप

तिरध्यासे उत वास्तवः आद्ये अधिष्ठानस्य तत्प्रसक्तिर्निवेदितं द्वितीयं दूषयति वस्तुत इति आत्मनो वास्तवानात्माकारत्वं नेति
नेत्याहरेवाधान्न संभवति आत्मनोऽन्यत्राप्रतीतेरेव तस्यान्यत्रासत्त्वमिति न वास्तवो विलक्षणाकारः कस्यापीत्यर्थः यद्वाऽसत्ख्या
तिवादी शंकते अधिष्ठानेति असत्ख्यातेरुपपादनमेतत् भंग्यंतरेण विवर्तवादव्याजेनेत्यर्थः तदेतद्दूषयति नेति प्रतिज्ञायां
हेतुमाह ख्यातेरिति परेषां मते ज्ञानं नाध्यस्तं अस्माकं तु तदप्यध्यस्तमिति न सर्वात्मना साम्यम् तदंगीभावे च न परसिद्धांतापत्ति
रित्यर्थः निरस्तत्वात् न विज्ञातुरात्मत्वात् इत्यत्रेत्यर्थः ननु ख्यातिर्नामात्मचैतन्यम् तस्याप्यध्यस्तत्वे शून्यताप्रसक्तिरि
त्यभिप्रेत्याशंकते किमिदमिति न स्वरूपेण रजतवत्ख्यातिरध्यस्तेति ब्रूमः किंत्वाकारांतरेण भासमानत्वादित्याह वस्तु

आकारांतरस्वरूपेणद्यात्मैवर्तार्हि तद्रूपेणैवप्रतीतिः किंनस्यात् इतिशंकते तथैवेति द्वैतस्वरूपमात्मैवेत्येवंप्रतीतिः किमुत्पन्नात्मोप
रोक्षज्ञानस्य उतान्यस्य आद्येऽदृष्टोपपत्तिरित्याह उचितमिति द्वितीयंदूषयति नत्विति अन्यथाकारप्रतीतिकालेस्वरूपप्रती
तेर्विरोधादयोगइतिभावः ननुभ्रांतिज्ञानविषयोऽधिष्ठानादिष्टः कश्चिदस्तिनवा नचेत्कथंभ्रांतत्वम् अस्तिचेत्तत्स्वरूप
पस्यवज्ञव्यत्वापत्तेरित्यभिप्रेत्याशंकते तस्येति द्वितीयमंगीकृत्यपरिहरति नकिमपीति रज्जुविषयप्रत्ययस्यसर्पाकारत्वं२४
तियदीति सादृश्यादितिहेतुमाह आकारेति तर्ह्यात्मन्याकारप्रतीतिर्नस्यान्निरवयत्वेनात्मसादृश्यादितितत्राह दोषेति अ
ज्ञानवशादित्यर्थः अतएवेत्यारभ्याविरोधाभावादित्यंतोग्रंथःस्पष्टार्थो निगदव्याख्यातः नन्वेवमिति रज्जुरेवमयाप्रतिपन्नान
तथैवतर्हिप्रत्येतव्यमितिचेदुचितमेव तद्विज्ञस्यनतुभ्रांतस्य तस्यभ्रांतत्वादेव किंतेनधिकप्रतीतमितिचेन्न किमपिकथम्
सोभ्रांतइतिचेत् अन्यप्रतीतेरन्यविषत्वाभिधानादेव तस्यभ्रां यथालोकेरज्जुप्रत्येतिसर्पमभिमन्यतेऽयंसर्पइतिकोसौ
वभिमानइतिचेत् परमार्थस्थितविषयस्याभासमानस्यामत्वनिश्चयः यदिवस्तुतोरज्जुप्रत्ययएवकथंतर्हिसर्पोल्लेखि
तयाप्रत्ययः परिस्फुरतीतिचेत् परमार्थस्थितविषयस्याकारसाम्याद्दोषवशाद्वेतिवदामः अतएववाधोत्तरंमन्यते
रज्जुरेवसर्पतयाप्रतिपन्नामयेति तत्किंसर्पोनप्रतिपन्नएवकः संशयः एवंतर्ह्यनुभवविरोधइतिचेन्न भ्रांतानुभव
विरोधेबाधोत्थितस्यकिंप्रतीतंकिंनप्रतीतंइति विवेकविरहात् अभ्रांतस्यतदनुभवाभावेनानुभवविरोधा
भावात् नन्वेवंसत्यधिष्ठानतत्प्रतीतिद्वयमप्यात्मैवस्वयंप्रकाशेप्रतीत्यंतरानभ्युपगमात् तथाचक्वेतिविके
स्यविवर्तस्यदर्शयितुमशक्यतयागतंविवर्तवादेन ततोऽतिस्फुटएवस्वसिद्धांतपरित्यागइतिचेन्न तस्यवाल्लव्युत्पत्ति
मात्रप्रयोजनतयाउपनिषत्तात्पर्यविषयत्वात् अन्यथाद्वैतदृष्टेर्वद्वैतापत्तेः ॥ ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
सर्पःइत्येवंव्युत्पादने सति दृष्टांते प्रामाणिकानुभवानुरोधेनाधिष्ठानंरज्जुस्तद्विषयिणीप्रतीतिश्चेतिद्वयंवर्तते नसर्पोनस
र्पविषयानुभवोभ्रांतिप्रतीतेरनादरणीयत्वात् दार्ष्टांतिके तुस्वप्रकाशेचिदात्मन्यधिष्ठाने तद्विषयिणीप्रतीतिरपिभास्यै ति
तथासत्यधिष्ठानमेवस्वरूपमपरित्यज्यरूपांतरेणभासमानंविवर्तइति वक्तोगतः रूपांतरस्याभावात् भानकर्तृ
त्वस्याप्यभावादितिशिष्योपमिद्धांते नगुरुं निगृह्णातिइत्यर्थः परिहरति वालेति मध्यमोधिकार्यत्रवालशब्दार्थः सोपाना
रोहणन्यायेनअद्वैतचैतन्येबुद्धिप्रवेशार्थंप्रपंचेमारोप्यनिषेधयंतीश्रुतिर्विवर्तेपर्यवसितेत्युच्यते नवस्तुतोऽन्याकार
प्रतीतिसद्भावप्रतिपादनपरासमन्वयविरोधात् तथैवप्रतीत्यात्मवस्त्रामाणिकतयाद्वैतापत्तेः ततःकथमपसिद्धांतइत्यर्थः

तिद्वयमेवदृष्टांतेऽतिरिक्त
प्रतीतिप्रत्येतव्ययोरसत्
त्वव्युत्पादनात् दार्ष्टांतिके
त्वधिष्ठानतत्प्रतीतिश्च ११८

टी०
वे०मु०
८१

द्वैतापत्तोपरिहारं शंकते मिथ्यैवेति सतो द्वितीयस्याभावात् नाद्वैतापत्तिरिति असत्वेति असत्वं मिथ्यात्वमुक्ते गगनकमलादावतिव्याप्ति
स्तन्निवारणाय कदाचित्प्रतीयमानत्वमिति कादाचित्कप्रतीतिविषयत्वमितियावत् प्रतीतिरत्रापरोक्षाविवक्षिता असत्वं नामसद्विल
क्षणत्वं कादाचित्कप्रतीतिविषयत्वं शुक्तिव्याप्यत्वेनात्मन्यप्रसक्तौ तितदर्थविशिनष्टि असत्वाविशेषेपीति कादाचिदितिस्वरूपक
थनं व्यावर्त्याभावाद्वैतलक्षणेपि सत्यप्रसक्ता प्रतीतिविषयत्वमित्येतावतैवचरितार्थत्वादिति त्रैकालिकासत्वं मिथ्यात्वमित्याद्यपक्षमि
ष्टापत्त्यादूषयति नाद्य मित्यादिना द्वितीयं मिथ्यात्वलक्षणं दूषयति नद्वितीयइति तत्रहेतुः तत्प्रतीत्येति अयमर्थः इत्याकारप्र
तीतेर्मिथ्यात्वं निर्वचता प्रतीतिविषयकं प्रतीत्यंतरमवश्यं वाच्यं प्रतीतिकर्मत्वघटितत्वाल्लक्षणस्य तथा च तदपि प्रतीत्यंतरं किंमि
थ्या उत पारमार्थिकं उतातुच्छं नाद्यः अनवस्थापत्तेः नांत्यः तद्धदेवाद्य प्रतीतेरपितुच्छत्वापत्तिः नापिमध्यमः द्वैतापत्तेरित्यर्थः
आद्यप्रतीतेर्मिथ्यात्वनिर्वाहाय तद्विषयं प्रतीत्यंतरं स्वीक्रियते नचानवस्थाप्रतीत्यंतरस्य साक्षिरूपत्वात् तस्याश्चस्वप्रका

मिथ्यैवसाद्वष्टिरिति चेत् किमिदं मिथ्यात्वं त्रैकालिकासत्वं असत्वाविशेषेपि कदाचित्प्रतीयमानत्वं वा नाद्यः इष्टाप
त्तेः नद्वितीयः तत्प्रतीत्यैवाद्वैत[illegible]तेस्तादवस्थ्यात् साक्ष्येवतत्प्रतीतिरितिचेन्न तस्यासंगत्वात् असंगोह्ययंपु
रुष इतिश्रुतेः साक्षिणः कदाचित्कत्वानुपपत्तेश्च किंचात्मनोद्वैतदृष्टिः प्रमाणसिद्धा भ्रांतिसिद्धा वा नाद्यः
अद्वैतागमविरोधात् नेतरः भ्रांतिसिद्धपदार्थस्यासत्वनियमात् अन्यथा भ्रांतित्वानुपपत्तेः तथा चात्मनोद्वैतद
ष्टिः कदाचिदपि नास्त्येव तथा च श्रुतिः यद्वैतन्नपश्यति पश्यन्वैतन्नपश्यतीत्याद्यात्मनो विलुप्तदृष्टिस्वभावस्य द्वैत
दृष्टिं वारयति वाल्लान्त्यातिविवर्तैर्ब्रह्मणः सकलं जगत् अविवर्तितमानंदमास्थिता कृतिनः सदेति स्मृतिरप्यात्म
नोद्वैतदर्शनाभावमनुमन्यते

शत्वान्नापि द्वैतापत्तिरात्मत्वादेवेतिशंकते साक्ष्येवेति साक्षिशब्देनाविद्यावृत्त्यारूढं चैतन्यमुच्यते उत शुद्धम् नाद्यः वि
शिष्टस्य मिथ्यात्वात्पारमार्थिकत्वे विशेषणस्यापि पारमार्थिकत्वप्रसंगः तथा चानवस्थातादवस्थ्यम् नचवृत्तिप्रतिफलितं चैतन्यं
वा३ स्वस्वरूपं वृत्तिं च भासयति स्वप्रकाशकत्वादितिचेत् प्रतीयमानत्वशब्देन प्रतीतिकर्मत्वस्योच्यमानत्वात् अभेदे च तदसंभवात्
अथ शुद्धं चेत् न तं साक्षिशब्दार्थत्वं हि समासी स्वमसंगिनमर्थं भासयति उतासंगिनमपि नाद्यः तस्यासंगित्वादित्याह तस्येति
द्वितीयं दूषयति साक्षिण इति प्रदीपादेस्स्वसंबद्धार्थावभासकत्वदर्शनादिति सूचयितुं चकारः किंचेत्यादिग्रंथो व्याख्या
तार्थः आत्मनि द्वैतदृष्ट्यभावं प्रमाणयति तथा चेति श्रुतिः पूर्वमेव व्याख्याता तत्रैव प्रमाणत्वेन वाक्यांतरमुदाहरति वाला
न्त्यातीति वाल्लीपदव्याख्यातं कृतिनः उत्तमाधिकारिण इति यावत्

सवित्वामात्रानन्त्यत्वैकालिकासत्वपक्षेतत्वमस्यादिवाक्यवैयर्थ्यं शंकते नन्विति तत्वमस्यादिशास्त्रं किंप्रत्यैकं भासयति उत तदज्ञाना
दिनिवर्त्तयति नाद्यः तस्यस्वप्रकाशत्वात् नद्वितीयः अत्यंतोऽसतो नित्यनिवृत्तित्वात् तथाच शास्त्रंव्यर्थस्यादितर्थः द्विती
यपक्षमाश्रित्यपरिहरति नेत्यादिना नासीदस्मिन्भविष्यतीत्यात्मकार्यबाधोत्पादकत्वमेवसंसारनिवर्त्तकत्वम् ननुनिवृत्तेर्ध्वं
सः तस्यपूर्वंनिराकृतत्वात् तदपिसंसारनिवर्त्तकत्वंप्रत्यग्ब्रह्मैकाकारापरोक्षव्यवहृत्युत्पादनद्वारेतिभावः अभिप्राय
निः मविद्वानाशंकते अत्यंतासत्त्वइति असन्निवर्त्ततइतिचेत्तत्किंसन्निवर्त्ततइत्युच्यते उतानिर्वचनीयं नोभययापीतिस
हेतुकमाह नसत्यस्यापीत्यादिना स्पष्टमक्षरार्थः स्पष्टार्थोग्रंथः ननुजगतोऽत्यंतासत्त्वेतन्निवर्त्तकत्वशास्त्रमित्येतन्नाकिं

नन्वात्मनोद्वैतदर्शनाभावेनित्यमुक्तस्यासंसारिणःशास्त्रसाध्यप्रयोजनस्याभावेनशास्त्रानर्थप्रसंगइतिचेन्नानि
त्यमुक्तस्यैवासंसारिणोत्यंतासत्संसारनिवर्त्तकत्वेनशास्त्रप्रामाण्योपपत्तेः अत्यंतासतोनित्यनिवृत्तत्वात्तत्रशास्त्र
व्यापारोऽनर्थकइतिचेन्न सत्यस्यापितुल्यत्वात् नहिसन्निवर्त्तयतिशास्त्रमितिक्वचिद्दृष्टम् अनिर्वचनीयंनिव
र्त्तयतुशास्त्रमितिचेन्न तत्राप्यदर्शनस्यतुल्यत्वात् नह्यनिर्वचनीयंनिवर्त्ततइत्युभयसंप्रतिपन्नंस्थलमस्ति तस्मा
स्मादिमुक्तश्चविमुच्यते निवृत्तंचनिवर्त्ततइत्यादिशास्त्रादत्यंतासत्संसारनिवर्त्तकत्वेनैवशास्त्रप्रामाण्यं
नित्यबोधपरिपीडितजगद्विभ्रमनदतिवाक्यजामतिः वासुदेवनिहतंधनंजयोहंतिकौरवकुलंयथापुनरिति
स्मृतिरपिजगदात्मकस्यविभ्रमस्यनित्यबोधस्वभावस्यात्मनःस्वरूपपर्यालोचयात्यंतासत्त्वमेवाह किंचश्रुतिरिति
कंशास्त्रंतत्वमसीतियेमन्यंते तान्प्रतिभवतुशास्त्राप्रामाण्यप्रसंगोदोषः तस्यप्रमाणैकस्वभावत्वात् येतुम
न्यंतेसदाद्वैतमेवास्तिद्वैतवादिनोनभिज्ञाःशास्त्राणांप्रतिकथमयंदोषःस्यात् शास्त्रस्यवातत्प्रामाण्यस्यवाप्रत्यक्षाति
रिक्तस्यानभ्युपगमात् अन्यथाताभ्यामेवाद्वैतक्षतिःस्यात् नचवेदप्रामाण्यानभ्युपगमेपाषंडत्वप्रसंगः

तं ननुप्रमितिमितिचोद्यंपराकुर्वन् शास्त्रस्यसार्थकत्वेनप्रामाण्यमुपसंहरति तस्मादिति श्रुतेरर्थांतरशंकानिव
र्त्तकंसंक्षेपशारीरकवाक्यमुदाहरति नित्यबोधेति बोधमहिम्नात्यंतासदित्यर्थः इयमेवार्थस्पष्टयति जगदात्मकस्ये
ति किंशास्त्रानर्थक्येनाप्रामाण्यप्रसक्त्यापादनं द्वैतवादिनंप्रति उताद्वैतवादिनंवा आद्येतेषामुपालंभेऽपिद्व
त्याद्वैतवादिनंतदापादनस्यायोग्यात् द्वितीयेप्रत्यक्षातिरिक्तंनाकिंचनापिसदतिकुत्राप्रामाण्यमापाद्यते इत्याह
किंचेत्यादितत्वादि किंचेत्यादिनाअनभ्युपगमात् इत्यंतेनवेदप्रामाण्यानंगीकारेपाषंडत्वापत्तिमुद्धरति नचेति
वस्तुतस्तुपाषंडत्वमात्मातिरिक्तमत्यंतासदेवेतितदापादनमेवाद्वैतवादिनंप्रतियुज्यतेइति ॥ ॥ ॥

टी०
वे०सू०
८३

ननु वेदस्याप्रामाण्यानंगीकारेपि तत्प्रामाण्यमंगीक्रियते न वा आद्ये द्वैतापत्तिः द्वितीये ब्रह्मात्मैक्यासिद्धिः प्रमाणाभावादिति नेत्याह नचेति । किमेतन्नोद्ये द्वैतदर्शिनं प्रति उताद्वैतदर्शनं प्रति आद्ये किंनः छिन्नं द्वितीये प्रमाणप्रमेयभावस्येवासिद्धिः यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतेः । किंच प्रमाणं किमर्थमपेक्ष्यते प्रतीत्यै चेत्तत्स्वप्रकाशकत्वेनापि तत्सिद्धेः अज्ञाननिवृत्तये तथात्वे द्वैतस्य सिद्धत्वेन तत्रानपेक्षणात् तस्याप्रामाणिकत्वप्रामाणिकत्वप्रसंगः त्वर्थः द्वैतदर्शिनं प्रति तस्य दोषत्वात् इत्युक्ते तदा दायशंकते ननु द्वैतदर्शित्वमिति धर्मेण तं दूषयति नाद्य इति धर्मः मनः सत्वा नांत्यः असत्तां वा अपुत्रस्य धर्मत्वादर्शनात् सत्र्येत द्वैतापत्तिरित्याह द्वैतापत्तेरिति द्वितीये दर्शने द्वैतं । विशेषणं वाच्यं उपलक्षणत्वे दर्शितत्वमेवात्मस्वभावः स्यात् तत्र स्वदर्शितत्वेनाप्युपपत्ते द्वैतपदव्यर्थं स्यात् तथा च द्वैतविशिष्टदर्शित्वमेवात्मस्वभावः स्यात् तत्र स्वदर्शितत्वेनाप्युपपत्ते ~~द्वैतपद~~ ~~व्यर्थं स्यात्~~

न चैवं प्रामाण्यानभ्युपगमे ऽद्वैतस्याप्रामाणिकत्वप्रसंगो दोषः द्वैतदर्शिनं प्रति प्रमाणाधीनाभिद्धकेवस्तुनि तस्य दोषत्वात् न च वेद ~~प्रामाण्य~~ ... प्रसंगादिति चेत् ननु द्वैतदर्शित्वं किमात्मनो धर्मः स्वभावो वा नाद्यः द्वैतापत्तेः नेतरः द्वैतजातस्य सर्वस्य स्वतः सिद्धि प्रसंगादिति चेत् ननु द्वैतदर्शित्वं किमात्मनो धर्मः स्वभावो वा नाद्यः द्वैतापत्तेः नेतरः द्वैतजातस्य सर्वस्य स्वतः सिद्धिसंभवति तस्य निरस्तसमस्तसामत्रे श्रुतिसिद्धात्मस्वरूपानुरोधेन द्वैतजातस्य सर्वस्य तुच्छत्वात् नहि तुच्छस्य स्वतः सिद्धिसंभवति तस्य निरस्तसमस्तसामर्थ्यस्य स्वतः परतो वा सिद्धुमशक्यत्वात् नन्वात्मभिन्नस्य जगतः तद्दर्शनस्य च तुच्छत्वं लौकिकानामभिमतं उत परीक्षिकाणां सर्वेषामेककाणां वा नाद्यः तेषामबाधितत्वबुद्धेस्तत्राप्याहततत्वात्तुच्छत्वस्य दूरनिरस्तत्वात् नेतरः परीक्षिकाणां सर्वेषामेक

नित्यानित्यविभागेन — मत्याभावात् सर्वशून्यवादिना निःशेषप्रमाणप्रमेयापलापिनाप्रामाणिकेनाशेषस्य तुच्छत्वस्वीकारात् तद्वि

सार्वदिककादाचित्क — रुद्धस्य च सर्वदा सर्वसत्वस्य सांख्यादिभिरभ्युपगमात् तस्मात्परीक्षिकाणामपि सर्वेषां परस्परविप्रतिपन्नेराप्यादि

त्वस्यात्वचरणकणभु — क्तस्य सर्वस्य तुच्छत्वमसंप्रतिपन्नमेव ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

गादिभिः स्वीकारात् — स्वस्वभावत्वे स्वभावत्वं द्वैतस्यापि स्यादिति दूषयति नेतर इत्यादिना द्वैतस्यात्मस्वभावत्वेस्वतः सिद्धिः स्यादित्युक्तं तदनुपपन्नं कि

तद्विरुद्धस्य ७४ स्०० — मात्मस्वरूपमिति कृत्वा स्वप्रकाशत्वमापाद्यते उत स्वातंत्र्येण आद्ये इष्टापत्तिरात्मनः स्वप्रकाशत्वस्याभिसिद्धित्वात् द्वितीये नि

षेधे च तन्निवर्त्तते इति श्रुत्यात्मभिन्नस्य तुच्छत्वबोधनात् सर्गप्रतिपादकवाक्यसिद्धप्रणीतस्य स्वरूपानुपपत्त्या च द्वैतस्य तुच्छत्वात् स्वतो वा परतो वा सिद्धिर्न इत्यादिति नेति प्रतिज्ञायां हेतुमाह श्रुतीत्यादिना श्रुतिसिद्धात्मस्वरूपानुरोधेन द्वैतस्य तुच्छत्वमुक्तं तदुपपादयितुं शंकते नन्विति लौकिकाः शास्त्रासंस्कृतमतयः शास्त्रसंस्कृतमतयः परीक्षिकाः एकमत्याभावमुपपादयति सर्वशून्येत्यादिना तद्विरुद्धस्य शून्यत्वविरुद्धस्य नित्येषां सार्वदिकं सत्वमनित्ये कादाचित्कमिति विभाग इत्यर्थः द्वैविध्यसत्वविरुद्धं सांख्यादिमतमाह तद्विरुद्धेति विरुद्धत्वमेवाह सर्वदा सर्वसत्वमेति सत्कार्यवादे स्वीकारात् न तावत्प्रागसत्वं वर्त्तमानकाले सत्वादेव नासत्वं ध्वंसस्य च तिरोधानमात्ररूपत्वा

त्मप्रामण्यवस्थायां सत्वात्सर्वदा सत्वमिति सांख्यमतं तथापातंजलादी
नां संग्रहणायादिपदम् ॥

तुच्छत्वासंप्रतिपत्तेः प्रत्नमाह तथा चेति तत्र तत्रेति शून्ये तथा सर्वदासत्वकादाचित्कसत्त्वपक्षौ तदभावादिति एकैकांगीकार
रस्याप्यभावादित्यर्थः तुच्छेऽपि परीक्षिकांगीकाराभावो सिद्धः ममपरीक्षिकस्य तत्रांगीकारसत्त्वादिति नेत्याह न चाथाधी
ति परीक्षिकासंमतिपरिहारे हेतुमाह तवेति प्रमाणनपरीक्ष्यव्यवहर्त्ता परीक्षिकः नच तुच्छे प्रमाणमस्ति तस्मात्तेन तुच्छ
त्वद्वेतरीतिहेतुमाह तुच्छेत्वेति ननु वस्तुनो द्वैरूप्यासंभवाच्च सर्वपक्षाः प्रमाणिकारा व तथा सति परस्परविगार
नात्कोवापरीक्षिकः किमत्र चोपादेयं किं वा हेयमिति नियामकाभावादेकस्याप्यनुपादानमिति नेत्याह नचेति प
रीक्षकत्वपक्षस्य चोपादेयत्वे विनिगमकत्वशंकते नित्येति स्ववाक्यसिद्धेणेति. यस्यहीति साज्यत्वेसिद्धांत्यभिमत
दृष्टांतमाह यथेति तुच्छत्ववादाद्याह एततर्हीति नन्वप्रामाणिकत्वेऽसिद्ध प्रत्यक्षादिमूलत्वादितरपक्षस्ये
तथा च लौकिकपरीक्षिकविरुद्धं जगतस्तुच्छत्वं कथमंगीकार्यमारोहति नचपरीक्षकाणांमतमपि
प्रत्येकं परस्परविरुद्धतया हेयमेवेति वाच्यम् तावताप्येकांगीकारस्य तत्र तत्राव्याहतत्वात् तुच्छ
त्वेऽप्यानंतरभावात् नचात्रापि मांगीकारस्त्वेवेति वाच्यं तत्राप्रामाणिकत्वात् तुच्छत्वग्राहकप्रमाणाभावात्
नच परीक्षिकाणामपि परस्परं विरुद्धानां मध्ये कस्य मतं समीचीनमिति विनिगमकाभावादेकम
प्यग्राह्यम् इति वाच्यम् नित्यनिर्दुष्टवेदमूलकत्वभावाभावाभ्यां विशेषात् यस्य हि मतं वेदमूलं
तद्ग्राह्यं यस्य तु तन्नास्ति तन्नाज्यं यथापासंडानां मतं हंत तर्ह्येतेनापि गतास्तु त्यैव विश्वासः श्रेयस्तु श्रु
तिसिद्धमेवमतमद्वैतस्य तदितरत्तु त्याज्यमेवाप्रामाणिकत्वात् श्रुतिविरुद्धत्वाच्च श्रुतिस्तु स
देव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन सावनेति नेतीति अथात आत्मा
यमादेशोऽमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः ॥ ॥ ॥ ॥ ॥ ॥ ॥
त्याशंकाहेत्वंतरमाह श्रुतिविरुद्धेति तथाश्च प्रत्यक्षादिश्रुतिविरोधेऽप्याभासी भवतीत्यर्थः ननु न श्रुतिः प्र
पंचस्यासत्त्वं तुच्छत्वपरास्ति समन्वयाधिकरणविरोधान्नेत्याह श्रुतिस्त्विति श्रुतिरात्मातिरिक्तस्य सर्ववस्तु
तुच्छत्वमभिमन्यतेऽत्यन्वयः श्रुतीरुदाहरति सदेवेत्यादिना मीयतेऽइति मात्राः मात्रा अस्य न सन्तोऽमात्रः अ
प्रमेय इति यावत् अथवा मात्रा एकदेशोऽवयवः तद्रहितः ते नस्वगतभेदनिषेधोऽस्ति द्विः तुर्य एव चतु
र्थशब्दार्थः अव्यवहार्यः अभिवदनादिव्यापाराविषय इत्यर्थः तस्य पुरुषार्थमाह प्रपंचोपशम इति
प्रपंचाभावरूपं तत्त्वं तदोपपद्यते यदि प्रपंचोऽसद्रूपो भवेत् असदभावस्य भावरूपत्वान्नेन विजातीयभे
दनिराकृतः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

टी. वे.सु. ८३

तस्यास्तुवेत्रूपतामाह शिवइति सजातीयभेदं निषेधयति अद्वैतइति तेनस्तुतार्थापत्तिः प्रपंचस्यत्रैकालिकाभावंबो
धयतीत्यर्थः नचैवं प्रपंचस्यप्रामाणिकत्व आभासोपस्थितस्याप्यभावप्रतियोगित्वोपपत्तेः अन्यथा नसुरांपिबेदि
त्यादौसुरापानस्यापिप्रामाणिकत्वं किंनस्यात् अभिमन्यतेइतिवदतामसमन्वयविरोधोपिनिरस्तः अन्यथाविं
वित्तितात्मसिद्धिरेवनस्यादित्यात्मसिद्धायेमेवप्रपंचतुच्छत्वानुमानमितिनकोपिविरोधगंधइति ननुकिं
मितितुच्छत्वमेवावेदयति उक्तात्मस्वरूपस्यप्रपंचमिथ्यात्वे नापिसिद्धउपपत्तेरितिनत्याह तदातिरिक्तस्येति
कथंचिदपिमिथ्यात्वेनवास्तवत्वेनवेत्यर्थः कथंतर्हि विवर्तवादादिस्वीकारइत्याशंकांपरिहरन्नुपसंहरति त
स्मादिति एवकारोभिन्नक्रमः तुच्छत्वपदेनसंबध्यते तेनश्रौततुच्छत्वमेवविवर्तादिवादस्यप्रमाणादिमूलत्वा
त्तदपिविवर्तवादाद्यधिकारिभेदे विरुध्यतेइत्यर्थः उक्तमर्थं वृद्धसम्मत्यासस्पष्टयति तदुक्तमिति वास्तवी
शिवोद्वैतइत्येवंप्रकारिकासजातीयविजातीयस्वगतभेदतत्प्रतिभासशून्यमात्मानंबोधयंत्यातदतिरिक्तस्य
सर्वस्यतुच्छत्वमभिमन्यते तदतिरिक्तस्यकथंचिदपिसत्त्वेद्वैतव्याघातप्रसंगात् तस्माज्जगतस्तुच्छत्वंश्रुत्य
नुमतमेव तदुक्तंगौडैः तुच्छानिर्वचनीयाचवास्तवीचेत्यसौत्रिधा ज्ञेयामायात्रिभिर्बोधैःश्रौतयौक्तिकं
लौकिकैः वशिष्ठोपीममेवार्थमाश्चर्यवदाह अहोनुचित्रंयत्सत्यंब्रह्मतद्विस्मृतंनृणां यदसत्तस्यम
विद्यात्वेनतुरःपरिवल्गति तथा अहोनुचित्रंपद्मोत्थैर्बद्धास्तनुरिरड्यः आविद्यमानायावि
द्यातयाविश्वंविलीकृतं तस्मादद्वैतदर्शनयोस्तुच्छत्वात्स्वतःसिद्धशुद्धबुद्धमुक्तस्वभावपरिपूर्णानं
दात्मनोऽद्वैतद्वयत्वमुपपन्नतरम् तथाचश्रुतिः ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षु
र्नवैमुक्तइत्येषापरमार्थता तदेवनिष्कलंब्रह्मनिर्विकल्पंनिरंजनं तद्ब्रह्माहमितिज्ञात्वाब्रह्मसं
पद्यतेध्रुवम् निर्विकल्पमनंतंचहेतुदृष्टांतवर्जितं अप्रमेयमनादिंयज्ज्ञात्वामुच्यतेबुधइतीत्येवम्
परिणामरूपतस्याःवेदांतवादस्यप्रथमसोपानत्वात् एवंप्रपंचस्यतुच्छत्वेस्मृतिमुपपाद्यस्मृतिमपितत्संवादयतिशि
शिष्टोपीति तत्रासत्यमुपजीव्यतेयस्माद्वैततद्दर्शनचतुच्छत्वादसत्तस्मादात्मनोऽद्वैतद्वयत्वमुपपन्नतरम्इत्युपसं
हरति तस्मादिति द्वैतस्यविवर्तत्वेपपन्नेइदानींप्रपंचस्यतुच्छत्वमुपपन्नतरमित्यर्थः अद्वैतमेवात्मतत्त्वमि
त्यत्रश्रुतिंप्रमाणयति तथाचेति श्रुतिरात्मनोद्वैतदर्शनशून्यत्वमेवाहेत्यान्वयः निरोधःप्रलयः वैदिककर्मानु
ष्ठातासाधकः निष्कलंनिरवयवंनिर्विकल्पकंविशेषणानात्मकं अंजनमविद्यादितद्रहितं तद्ब्रह्मलक्ष्यं
ब्रह्माहमितिमात्रात्कृत्यत्रात्मस्वरूपः स्वयंध्रुवमविचालिकूटस्थयत्तदात्मकोभवति अनंतोनाशः तद्रहितं हेतु
वर्जितंतस्यप्रमकार्यदृष्टांतवर्जितमनुपमंस्वतुल्यरहितं एतेनसजातीयभेदोनिरस्तः कारणत्वंप्रतिषेधयति

भवत्येवमात्मतत्त्वं किं ततस्तत्राह तस्मादिति यस्मादिदं वास्तवं दृष्टं तस्मात्सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोक्तं सत्यादि
स्वरूपमात्मानं स्वमभिन्नं विनिश्चित्य साक्षात्कृत्य विमुच्यते इति तज्ज्ञानफलं स्वस्वरूपप्राप्तिरित्यर्थः नन्वेतादृशात्मज्ञानं
यदि भवेत्तदा घटादिज्ञानवदुपलभ्येत साधनाभावान्न ज्ञायते इति चेन्न तत्साधनस्य प्रमाणश्रुतेः सत्त्वात्ततो न ज्ञाय
त एवेतादृशज्ञानमिति नेत्याह नचेति नच संप्रतमिति प्रतिज्ञायां हेतुवदनुपलम्भविरोधं प्रत्याह तदुत्पत्तिरिति
उत्पद्यमानस्य ज्ञानस्य पश्यन्प्रतिपेदे यो यो देवानां प्रत्यबुध्यते इत्यादिश्रुतिभ्यो दर्शनात् नानुपलम्भविरोध इत्यर्थः
यत्तु सत्यपि साधने ज्ञानं न जायत इति तदप्ययुक्तमित्याह साधनेति वेदानुवचनादिनोत्पन्नविविदिषाणि त्यानि
अथातो ब्रह्मजिज्ञासा इति सूत्रात् त्यवस्तु विवेकसाधनचतुष्टयेनाधिकारिणा पश्चाद्सूचिते न संपन्नस्याधिकारिणो गुरूपदिष्टमहावाक्यविचारानन्तरं ज्ञानोत्पत्ति
दर्शनात् कथं तर्हि संसारानुवृत्तिः श्रुतवेदान्तानामिति तत्राह मननेति असंभावनाविपरीतभावनानिवर्तकमनन

तस्मात्सत्यं ज्ञानमनन्तं च परमानन्दविग्रहं मन्त्रवर्णोक्तमात्मानं विनिश्चित्य विमुच्यते नचेतादृशात्मज्ञानं
न जायत एवेति मां प्रत्याह साधनचतुष्टयसंपन्नस्य विविदिषोर्मनननिदिध्यासनाभ्यामुपकृतश्रवणाद्दृष्टि
नसमनन्तरमेव तदुत्पत्तिदर्शनात् अन्यथा तादृगात्मप्रतिपादकागमानामप्रामाण्यप्रसंगः नच जातम
पि ज्ञानं साधनान्तरापेक्षया फलदो नार्या विलम्बत इति वाच्यम् तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहम
नुरभवं गन्धर्वः सूर्यश्चेति ब्रह्म वेद ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतिभ्यः आत्मज्ञानतत्फल
योः समानकालत्वनिर्देशनात् मध्ये साधनान्तरकालविलम्बयोरभावप्रतिपत्तेः ॥ ॥ ॥ ॥

नाद्युपक्रमाद्वाक्यविचारात्स्वशक्तिनान्तर्यगुरुवानुकूलव्यापारादनुष्ठितादप्रतिबद्धं ज्ञानं जायत एवेत्यर्थः नतु ज्ञानान्मुक्तिरिति
कोर्थः किं ज्ञानमेव मुक्तिसाधनमुत ज्ञानमपि नाद्यः विद्यां चाविद्यां चेत्यादिसमुच्चयप्रतिपादकवाक्यविरोधात् नहि
तीयः कर्मणैव हि संसिद्धिमास्थिता इत्यादिविरोधात् इत्याशङ्कनेत्याह नचेति समुच्चयपक्षमत्र निराकरोति
नच वाच्यमित्यत्र हेतुमाह तद्धैतदिति तद्धैतदेतदहमिति पश्यन्साक्षात्कुर्वन् एतस्मादेव दर्शनादृषिर्नामतो वामदे
वः प्रतिपेदे किल ज्ञानफलसर्वभावापत्तिप्रतिपादकान्मन्त्रान्ददर्शेत्यर्थः यथा भुंजतस्तृप्तिरतीतस्य भुक्तितृप्त्योर्मध्ये
कार्यान्तरं न प्रतीयते तथा पश्यन्नेव प्रतिपेदे इत्यत्रापि दर्शनसर्वभावापत्त्योर्मध्ये कार्यान्तरप्रतीतिर्वर्तमानार्थश
तृप्रत्ययनिर्देशेन नास्तीत्यर्थः यदा ब्रह्म वेद तदैव ब्रह्म भवतीति ब्रह्मभवनवेदनयोरेककालत्वप्रतीतेः काल
विलम्बोपि नास्तीत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ति·
वे·सु·
८४

कर्मैव मुक्तिसाधनमिति परा चष्टे तमेवेति न चश्रुति विरोधः संनिद्धिशब्देन तत्त्वज्ञानस्यैवोक्तत्वात् कषाये कर्मभिः पक्वे त
तो ज्ञानं प्रवर्त्तते इत्यादौ त्यागमात्र कर्मणां तत्त्वज्ञानसाधनीभूतांतःकरणशुद्धिहेतुत्वप्रतीतेः एतेन समुच्चयप्रतिपादकवाक्य
विरोधोपि परास्तः तत्रैवं वाकाशेषेण ज्ञानान्मुक्तिनिवर्त्तकत्वमेवाविद्योशब्दवाच्यानां कर्मणां प्रतीयते इति ज्ञानमे
व मुक्तिफलमिति स्थितं यदा चैवं तदावश्यं संसारभीरुणा तन्निवृत्तिसाधनं श्रवणादिसाधनैः संपादनीयमित्युपसं
हारव्याजेनाह तस्मादिति त्याग एव हि सर्वेषां मुक्तिसाधनमुत्तममिति शास्त्रमाश्रित्याह संन्यासेति यत्नतः सं
पाद्यत्वे हेतुमाह तदभाव इति इहेति पदद्वयं बाधितुं स्थितमत्रापि योजयित्वा श्रुतिं पठति इह संसारमंडले ब्रह्मण आ
त्मत्वेन चेदहं दितवंतो वयं ततोहमवेदि स्या ब्रह्मात्मसाक्षात्काररहितः स्यात् अस्तु तर्हि ततः को दोष इति
तत्राह महती विनष्टिरिति जन्ममरणादिलक्षणानंतरपरिणामाविनिष्टिः स्यात् तस्माद्वश्यमात्मसाक्षात्का

तमेव विदित्वातिमृत्युमेवेति नान्यः पंथा विद्यतेऽयनायेति साक्षान्नांतरप्रतिषेधश्रवणाच्च तस्मात्संन्यासमा
त्मज्ञानमेवास्य तत्त्वसाधनं प्रयत्नतः संपादनीयं तदभावे यतो महती विनष्टिः श्रूयते इह चेदवेदीदथ सत्य
मस्ति इह न चेदवेदीन्महती विनष्टिरिति तत्र उत्पन्ने च ब्रह्मात्मविज्ञाने विदुषः फलेन सह विद्योद्गारः स्म
र्यते विद्याविग्रहमग्रहेलादिदितप्रसंचमस्रेश्रेसराम्मुत्तृष्णोतमपूरुषमुनिधियामुंजादिषीकामि
व कोशात्कारणकार्यरूपविकृता त्वेष्या निःसंशयं नासीदस्ति भविष्यति च जगतः संसारदुःखोदधिः
पश्यामि चित्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कलचिदेकवपुष्यनंते आत्मानमद्वयमचित्यमुखैकरूपं
पश्यामि दग्धरशनामिव च प्रपंचम् २ अद्वैतमप्यनुभवामि करस्थबिल्वतुल्यं शरीरमहिनिर्ल्वयिनीव वी
क्षे २ एवं च जीवनमिव प्रतिभासते न च निःश्रेयसाधिगमनं च मम प्रसिद्धं ३ आश्चर्यमेव मम भाति कथं
द्वितीयं नित्ये निरस्तनिखिलेशिवचिदाकाशे आसन्पुरेति इमाः श्रुतयोः नष्टं यंत्रद्वितीयमभव
रः संपादनीय एवेत्यर्थः तत्त्वज्ञाने सति संसारो निवर्तते एवेत्यत्र विद्वदनुभवमपि प्रमाणयति उत्पन्ने चेति कारणा
दिकोशादनात्मराशेर्विविच्य केवल ब्रह्मात्मानुभवो मम संवृत्तः संसारश्चास न्निवृत्त इत्यर्थः तथापि जीवना
भासोप्यनुवर्त्तते इत्याह पश्यामीति न चैतावता मुक्तेः किंचिद्वैकल्यमित्याह तिष्ठामीति ननु संसारदर्शने
योविरुद्धत्वात्कथमेककालावस्थानमिति तत्राह दग्धरशनामिति अद्वैतदर्शनेन द्वैतप्रपंचो बाध्यते एव
त्यर्थः विपरीतशंकां प्रत्याह अद्वैतमपीति अद्वैतानुभवस्य कदाचिदपि परोक्षत्वं यथा परितः करादि निर्मोको
हि भासते इत्यर्थः स्वभावपरित्यागापत्तेर्न विपरीतशंकेति भावः एवं च जीवन्मुक्तिरपि मम प्रसिद्धेत्याह एवं चे
ति तत्त्वज्ञानावस्थायां शरीरं बाध्यमिति किं वक्तव्यं तत्त्वज्ञानात्प्रागपि द्वैतप्रपंचप्रतिभासो योममभूत्तत्राप्याश्चर्यमे

एवमित्याद्युपसंहृतं ततो ग्रंथः स्पष्टार्थः ननु ज्ञानादज्ञाननिवृत्तावपि संसारः कथं निवर्त्तते तस्य कर्मजन्यत्वात् तस्य च
विद्यमानत्वादिति शंकते नन्वविद्याया इति ननु कर्म नोपादानं प्रपंचस्य किंत्वविद्या सा च ज्ञानान्निवृत्ता तेन मूल:
संसारोऽपि निवर्त्स्यतीत्याशंक्य परसिद्धदृष्टांतेन परिहरति मृद्वेत्यादिना पूर्वपक्षमुपसंहरति तस्मादिति तत्त्व

एवं शास्त्राचार्यप्रसादपरो लोकं तितीर्षुस्त्वात्मतत्त्वस्य गुरुभक्त्या मनयोऽपि स्मर्य्यते अतोऽपीयं विद्या जायत ए
व तथाहि त्वत्पादपंकजसमाश्रयणं विना मे सत्त्वग्रस्य सन्निवृत्तः पुरुषः पुरासीत् त्वत्पादपद्मयुगलाश्रयणा
दिदानीं नासीत्तच्चास्ति न भविष्यति मे न बुद्धिः २ यस्मात्त्वमेव शरणं मम भोऽघ्रिकिंस्वं संसाररोगमपनेतुम
भिप्रवृत्तः त्वत्पादपंकजरजः शिरसादधानः त्वामाशरीरपतनादहमप्युपासे २ नन्वविद्याया विद्योपमर्दे
कृतेऽपि कथं संसारस्येहलोकपरलोकसंचारलक्षणनानाविधयोनिप्राप्तिपरिहाराभ्यामनेकविधदुः
खसंकुलस्य निवृत्तिः स्यात् तद्धेतोः कामकर्मादेः सदवस्थत्वात् न चाविद्यानिवृत्त्या तदुपादेयस्यापि नि
वेस्य निवृत्तिरावश्यकीति वाच्यम् वैशेषिककारणमुपादाने निवृत्तेऽपि क्षणं कार्यावस्थानवदनिवृत्ति
शंकाया दुरपह्नवत्वात् न च तत्क्षणोत्तरेऽनंत्यत्वे वेति न दोषः तत्क्षणवदुत्तरक्षणेऽप्यनुपपत्त्यभावस्यानुमा
नुशक्यत्वात् तस्मादज्ञाने निवृत्तेऽपि संसारो न निवर्त्स्यते प्रमाणाभावादित्यर्थः प्रयासः मेवं कर्ममूल
मनर्थानां तत्त्वज्ञानेन बाध्यते क्षीयंते चास्य कर्माणि तथा च श्रुतिशासनात् ज्ञाने जातेऽपि कर्ममूलकेः
संसारोऽनुवर्त्स्यतेइति यदुक्तं तत्र अविद्यावत्कर्मणोऽपि विज्ञानेन बाधितत्वात् अविद्यावत्कार्येणापि
विद्याया विरोधित्वाविशेषात् न हि संभवति रज्जुसाक्षात्कारेण तदविद्यानिवृत्तौ तत्कार्यसर्पादेरनुव
र्त्तते इति न च यतो ज्ञानमज्ञानस्यैव निवर्तकमित्यवधारणं शास्त्रकाराणामेवं सत्यमसमंजसमिति
वाच्यम् अज्ञानकार्यस्याप्यज्ञानानतिरेकात् तदभावे तत्सत्त्वानुपलंभात् न चात्र प्रमाणाभावः भिद्यते

ज्ञानस्याज्ञानवत्कर्मभिरपि विरोधस्याविशेषात् धर्माधर्मरूपं कर्मापि तेन निवर्त्तते इति श्रुतिस्मृतियुक्तिसिद्धत्वा
दिति परिहरति मेवमित्यादिना स्पष्टार्थो ग्रंथः शेषं सुगमं उक्तं युक्त्यात्मज्ञानात्कृतकृत्यतासंपन्नेत्युप॰म

टी· वे·सु· ८५

तस्मादिति इतिशब्दो ग्रंथसमाप्तौ एवं ग्रंथस्यावांतरप्रयोजनमाह श्रृणुप्रकाशेति नाहक सिंहदंष्ट्राधरीकृतीयपेत्यर्थः
एतेन वादीभकुंभनिर्भेदनार्थं मिदंयमभ्यसनीयेतिभावः श्रीक्ष्मतिरोहितार्थम् नानादीदितसज्जेनविदुषयं विनिर्मि

इद्यते ग्रंथिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुते नचैतत्पापांकांश्पुभकर्मनिवृ(
त्तौपरमेवेति वाच्यम् कर्मशब्दस्य शुभाशुभसाधारणत्वात् विद्यासामर्थ्यस्य चोभयत्रतुल्यत्वात् तस्मात्तैकात्व(
विज्ञानं शास्त्रदेशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवदित्यन्वयः । बुद्धिपूर्वकृतपापस्यापि ब्रह्मज्ञाने(
नदाहस्मरणात् यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेत्य
त्र सर्वशब्देन शेषपुण्यपापे गृहीत्वा तस्य सर्वस्यैव ज्ञानाग्निना दाहस्य भगवता प्रोक्तत्वाच्च । किंच यस्य दर्शन
मात्रादन्येषामपि पापक्षयो जायते काकथा ब्रह्मीभूतस्य स्वपापक्षये यदाह भगवान्वशिष्ठः यस्यानुभवपर्यं
तं तत्त्वे बुद्धिः प्रवर्तते तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वपातकैः तथाद्यं च कुलपावित्र्यहेतुत्वमपि ब्रह्मवि
दः स्मर्यते कुलं पवित्रं जननी कृतार्था । विश्वंभरा पुण्यवती च तेन अपारसंवित्सुखसागरेऽस्मिंल्ली
नं परे ब्रह्मणि यस्य चेतः १ तस्माद्यथोक्तब्रह्मात्मैकत्वविज्ञानेन कृतकृत्यो भवतीति नात्र विदितव्यमि·
ति प्रकाशानंदयतिनाकृतिनात्मविशुद्धये सिद्धांततमोक्तावल्लीबार । चितारं ध्रुवत्तौता १ अद्वैतानंद
संदोहासत्यज्ञानादिलक्षणा नारायणसमासक्ता श्रियस्सा प्रत्यहं भविता २ शृणुप्रकाशरचितां संदे
ता तिमिरापहां वादीभकुंभनिर्भेदे सिंहदंष्ट्राधरीकृताम् अर्थंदांतसारे सर्वस्वमजेयमधुनातनेः अशे
षेण मयोक्तं तत्पुरुषोत्तमयत्नतः ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ता सिद्धांततमोक्तिकश्रेणीदीपिकात्मप्रकाशिका १ विदितसकलवेदोर्नप्रसंशंतिलोके ग्रथितमपिमहद्भिः
किंपुनर्मादृशेन इति विफलश्रमेस्मिन्वाञ्छयेहं प्रवृत्तः स्वमतविमलतायै संतु मद्देतिमतः २ यदज्ञानादि·
दं भाति यज्ज्ञानाच्च प्रतीयते ब्रह्मसोतरदहं नित्यं नित्यसंवित्सुखात्मकम् ३ ३ ३३ ३ ३ ३ ३ ३ ३ ३ ३

श्रधिकारुपविशेषमवं सिद्धांतदीपिका निर्मिताराजतांशम्चत्सदानंदप्रदायिनी ५ इति श्रीमत्परमहंसपरिव्राज

दी
मु० सि
८६

सर्वोपि।

स्नातं तेन समस्ततीर्थसलिलैर्दत्तावनिर्यज्ञानांच कृतं सहस्रमखिलादेवाश्च संपूजिताः संसाराच्च समु-
द्धृताः स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्यब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ५ इति श्री
परमहंसपरिव्राजकाचार्यश्रीज्ञानानंदपूज्यपादशिष्यश्रीप्रकाशानंदविरचिता सिद्धांतमुक्तावली
शुभमस्तु पात संवत्कृतग्रह पदिक ख ल मिते माघे द्वितीयातिथौ लिखिता श्रीमद्रूपचंदसुधिना सिद्धांतमु
क्तावली

काचार्यश्रीप्रकाशानंदपूज्यपादश्रीनानादीक्षितविरचिता सिद्धांतमुक्तावलीटीका १